Shri Raghunatha Temple MSS. Library,
५६२८
JAMMU

No. २४६२
क

Title आगमकल्पलता

Author

Extent ३५४ पत्र Age

Subject तन्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

ज्वाला कपाल
[illegible] ग्रंथ

१८२ सुंदरी
१९२ [illegible]
१९८ पंचमी
२०५ [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri



© Dharmartha Trust J&K. Digitized by eGangotri

३२ पत्र नगलामुखि

नं. १४८६१ के
आगमकल्पलता
३५८ पत्राणि
तंत्रम्

5918

Common # 245/249

Missing # 252

Double # Page 336

Total # F = 354
+0
354

Comp. ...

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri



© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
क॰
१

ॐ श्रीगणेशाय नमः ॐ यत्पादपंकजयुगं हृ
दि संनिवेश्य विश्वं सृजत्यविकलं खलु पद्मज
न्मा विश्वं च पालयति संहरते महेशस्तं देवमा
दिपुरुषं सततं नतोस्मि नत्वा गिरीशं गिरिजां
गणेशं वाणीं मुनीन्द्रैः स्तुतपादपल्लवं विलो
क्य शास्त्रं यदुनाथशर्मणा वितन्यते ह्यागमक
ल्पवल्ली तथा प्रपंचसारसिद्धान्तं शारदाति
लकं तथा सपरिष्कृतमालोक्य तथा सारसमुच्च
यम् यत्नेन दीपिकां दत्वा तथा च लघुदीपिकां
तथा पूजाप्रदीपं च पुरश्चरणचन्द्रिकां मंत्रद
र्पणसिद्धान्ते मंत्रदेवप्रकाशिकां मंत्रनेत्रं च मं
त्रार्थं श्रीरामार्चनचन्द्रिकाम् मंत्रमुक्तावलीं र
त्नावलीं नानागणवादिकान् तंत्रं सनत्कुमारं
ख्यनारदीयं च तत्तः शातीम् पुराणागं सोमशंभु
मतं चागमस्य संहितां संहितां वैस्नवीं तद्वत्तत्सा
गरसंहितां संहितां कपिलप्रोक्तां श्रीमंत्रवरसं
हितां तंत्रं श्रीभुवनेश्वरीनयसिद्धान्तमादरात्
कल्पं श्रीनवदुर्गायास्तंत्रं संमोहनात्मकं २

© Dharmartha Trust J&K. Digitized by eGangotri

यग्रीवमतंतद्वत्तथाविज्ञानभास्करम्‌ मुक्ता
वतंत्रराजंच तथावैपिंगलामतं वामेक
श्वरतंत्रंच समस्तंराजिदीक्षितं विज्ञानेश्व
रसिद्धांतंसारश्रीसंहिताःक्रमात्‌ विज्ञान
ललितंपंचरात्रंनारायणीमपि वसिष्ठसं
हितांगार्ग्यसंहितांवैभवंतथा दिव्यसार
स्वतंशिक्षाट्टिकांकामिकमाद्यात्‌ होमा
वलीतरंग्रंथं प्रतिष्ठासारसंग्रहं संहितां
वैखवींतद्वत्संहितांब्रह्मणस्तथा कृशा
नोःसंहितांब्रह्मविष्णुरुद्रादियामलम्‌ त
थैववामलोद्धारंमत्स्यसूक्तमपिक्रमात्‌ पा
र्वतीहरसंवादंवाराहीतंत्रमाद्यात्‌ तथै
वकुब्जिकातंत्रंलविताज्ञानमाद्यात्‌ तथै
वयोगिनीतंत्रंक्रमशास्त्रिपुरार्णवम्‌ ।। ईशा
नसंहितातद्वत्सिद्धांतंविश्वकर्मणः तंत्रश्री
दक्षिणामूर्तेर्वैशम्पायनसंहिताम्‌ कुलचूडा
मणिंतद्वद्गावचूडामणिंतथा कुलार्णवंकुल
प्रेष्ठंहंसपारायणंतथा पुराणंविविधंतद्व
त्स्मृतिशास्त्राणिभाननम्‌ ज्योतिश्शास्त्राणि
वालोक्यसकलांपद्धतिंक्रमात्‌ ग्रन्थेयोमे

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰ ग्रहास्सन्ति —— नान्दृष्ट्वाचपुनःपु
क॰ नः सर्वेषांसारमुद्धृत्ययद्रनाथेनधीमता वि
१ धानंमंत्रयंत्राणां दीक्षादीनांप्रपंचितम् ।
2 ज्ञानानुसारतेज्ञेयं विभाव्यचमुहुर्मुहुः ना
नातंत्रस्थमंत्राणां ज्ञानं `` दितिदुर्लभं ।
अतस्तेषांप्रवोधाय विचार्यातिप्रयत्नतः
ज्ञानायमन्दवुद्धीनां समासेनप्रवक्ष्यते परं
करपटेनैव प्राकृतेनसुधियोमया न्यूनाति
रिक्तताचात्र शोधनीयामहाशयैः तथा।
दीक्षितमर्त्यानां यद्दोषंकथयामितत् यक्षा
त्वामानवःनित्यंदीक्षांकुर्वन्तुसत्तमाः ॥ अ।
गस्त्यसंहितायाम् अदीक्षितानांमर्त्यानांदो।
षंशृणावन्तुपातिइताः अन्नंविष्ठासमंतस्यजलं
मूत्रसमंतथा अदीक्षितकृतंश्राद्धंश्राद्धंवादी
क्षितस्यवा गृहीत्वापितरस्तेषांनरकेचसदारु
णे पतंत्येवनसन्देहोयावदिन्द्राश्चतुर्दश स
र्हस्तैरुपचारैश्च प्रीतियुक्तोयजेद्धरिं तः
थाप्यदीक्षितस्यार्चा देवागृह्णन्तिनैवच
कर्माखिलंवृथायस्मा तस्मादीक्षितःप
शुः तस्मादीक्षितंदृष्ट्वाकिंचित्कार्यंनसाधयेत्

© Dharmartha Trust J&K. Digitized by eGangotri

दीक्षाग्रहणकालेन पापराशिपलायते नि-
र्वाणपदसंयुक्तोवह्निर्गच्छतितत्परः तदा-
देवपितृणांनकार्याह्नोभवतिस्वयम् अन्य
थातत्कृतंकर्मकृतंभस्मनितल्यवत् तथा-
आगमेषुदीक्षायनित्यत्वंपरिचक्षते अनीश्वर
स्यमंत्रस्यनाक्तित्रातायथाभुवि तथादीक्षा
विहीनस्यनीहस्तामीपरत्रच नतपोभिजपैः
होमैःविविधैर्वापिसाधनैः नक्रियाभिःक-
दाचनदीक्षाहीनस्यसिध्यति किंचिदितिशे-
षः ॥ दीक्षामूलोजपंसर्वंदीक्षामूलंपरंतपः
दीक्षामाश्रित्यनिवसेद्यत्रकुत्राश्रमेवसन्
अदीक्षितस्यमरणोरौरवेनरकेव्रजेत् तस्मा
दीक्षाप्रयत्नेनसदाकुर्याच्चतांत्रिकात् का-
लेदृष्टान्तमंत्रैर्वैयोगदृक्ज्ञानिनरायमः मन्व
न्तरसहस्रेषुनिष्कृतिर्नैवजायते दीक्षिता-
नांतुसर्वेषामाधिकारोत्रनिश्चितं अतःप्रो
च्यमतोदीक्षांप्रवक्ष्यामिविशेषतः ॥ तथा
चवैशम्पायनसंहितायांशौनकंप्रतिव्यासवा
क्यं दिव्यज्ञानंयतोदद्यात्कुर्यात्पापक्षयंयतः
अतोदीक्षेतिसाप्रोक्तादेशिकैस्तंत्रवेदिभिः
यावत्नप्राप्यतेदीक्षापुरुषार्थफलप्रदा स
र्वसिद्धिकरीदीक्षा सर्वसम्पतदायिनी प्रति

© Dharmartha Trust J&K. Digitized by eGangotri

आ· क· ३

भास्वरवर्णानिकान्तिपुष्टिधराणिच मोह
नस्तंभनाकृष्टि मारणोञ्चाटनानिच वशी
करणंचकविता बुद्धिस्वधारणायुता तर्प
णंवसमुद्रस्यवक्त्रस्तैत्यंवरोजयत विधि
नैवाभयंचैव पोषकं दुःखापहंतथा धर्मा
र्थकाममोक्षाणि ददात्येषानसंशयः आ
साध्यसाधनीदीक्षा अदैवदेवकारिणी ये
ष्यसन्तिपर्वदीक्षा सर्वकामदुघाभुवि ते
व्रजंतिपरंस्थानं गुर्वाराधनतत्पराः ॥ इति
आगमकल्पलतायांप्रथमः पटलः १ ॥
अथातः संप्रवक्ष्यामिलक्षणंगुरुशिष्ययोः ॥
मंत्रमुक्तावल्यां ॥ गकारः सिद्धिदः प्रोक्तो रेफः
पापस्यदाहकः उकारोविष्णुरव्यक्तस्त्रितया
त्मागुरुःपरः गणेशोत्राभिनायुक्तोगुरुत्थावरु
द्रयामले अवदातः तयेः शुद्धः स्वोचिताचा
रतत्परः आश्रमेवेदवित्क्रोधरहितः सर्वशा
स्त्रवित श्रद्धावाननसूयश्चप्रियवाक्प्रियद
र्शनः शुचिः सुवेशस्तरुणः सर्वभूतहिते
रतः श्रीमाननन्दतमतिर्भद्राभद्रविमर्शी
कः ॥

विस्मनाचसमन्वितः वरि
ष्ठयात्मकोमंत्रस्तवर्गफलंप्रदः

© Dharmartha Trust J&K. Digitized by eGangotri

शान्तस्वकृतधीश्चान्तः कृतज्ञः शिष्यवत्सलः
नूहापोहप्रकारज्ञः सर्वभूतकृपालयः ३
त्यादिलक्षणोपेतो गुरुस्यात् त्रैमधुतिः ॥ शा
रदातिलके ॥ मातृतः पितृतः शुद्धः शुद्ध
भावो जितेन्द्रियः सर्वागमानां साराज्ञः सर्व
शास्त्रार्थतत्त्ववित् परोपकारनिरतो जपपूजा
दितत्परः अमोघवचनः शान्तो वेदवेदार्थपार
गः योगमार्गानसन्धायी देवताहृदयंगमः
संहारोद्धारयोग्यैर्योदान्तश्चब्राह्मणोत्तमः मं
त्राणां च रहस्यज्ञो मंत्रविन्साधकोत्तमः उदा
रः सत्यवादी च गृहस्थो गुरुरुच्यते इत्यादिगु
णसम्पन्नो गुरुरागमसम्मतः देव्यागमे शिव
वाक्यं शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेश
वान् शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमा
न् आश्रमे ध्याननिष्ठश्च मंत्रतंत्रविशारदः
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥
तथा चोक्तं सारसंग्रहे ॥ गृहीतमंत्रः त्यक्तव्यो
गुरुर्वा दोषसंयुतः स्त्रीवत्स्यरोगी च पा
तकी भ्रष्ट एव हा पि वा एवंविधं गुरुं त्यक्त्वा सद्गु
रुं समुपाश्रयेत ॥ तथा च गौतमीये ॥
गृहीतमंत्रस्त्यक्तव्यः साधकेन सदैव हि।

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रा॰
क॰
४
५

अनिगेहस्थितोमंत्रोह्यनुच्चार्यश्चयोमनः सं
स्कारहितोमंत्रोविधिदीक्षाविवर्जितः त्य-
क्तासर्वप्रयत्नेन पुनर्ग्राह्यं यथाविधि ॥ ब्र-
ह्मवैवर्ते ॥ पितुर्दीक्षायतेर्दीक्षादीक्षाचवनवा
सिनः विरक्तस्यचयादीक्षानसाकल्याणदायि
नी ॥ स्कन्दपुराणे ॥ साध्यंसाध्यंचयन्मंत्रंम
त्पितुर्वामकेश्वरि स्वप्नलब्धोपियोमंत्रस्तंमंत्रं
यत्नतस्त्यजेत् नीचवर्णाद्गृहीतंयत्तथावैरवा
नसादपि विविक्ताश्रयतेश्चैवपितुर्दीक्षांवि
वर्जयेत् ॥ वृहन्मत्स्यसूक्ते ॥ पितुर्मंत्रंनगृ-
ह्णीयात्तथामातामहादपि कनिष्ठात्सोदरा-
द्वापिवैरपक्षाश्रितात्तथा प्रमादाद्वातथाज्ञा
नात्पितृदीक्षांसमाचरेत् प्रायश्चित्तंततःकृ
त्वापुनर्दीक्षांसमाचरेत् पितुर्दीक्षायतेर्दीक्षा
दीक्षाचवनवासिनः अनाश्रमीणांयादीक्षा
धनादीक्षाधननाशिनी ॥ तदुक्तंनारायणीय
तंत्रे ॥ पितुर्मन्त्रंनगृह्णीयात्तथाशैवाश्रितस्य
च ॥ कदाचिदपिगृह्णातिपुनःसंस्कारमर्हति
इत्यादिवचनादेभ्योमंत्रंनगृह्णीयादित्यर्थः तथाच
निर्वीर्यंचपितुर्मंत्रंशैवशाक्तेनतुच्छति इभिकोलि
कमंत्रदीक्षापरं योगिनीतंत्रेशाक्तिविषामपिकृत्य
दी

© Dharmartha Trust J&K. Digitized by eGangotri

त्वान्निषेधात् महातीर्थे उपरागे सति सर्वत्र
न दोषः सायुग्ं पृष्टं त्वयात्र स्नवद्यामि सकलं
तव ब्रह्मणा कथितं पूर्वं वसिष्ठाय महात्म
ने वसिष्ठोपि स्वपौत्राय मन्त्रं दत्तवान् स्वयं
प्रसन्नहृदयः स्वच्छः पिता मे करुणानिधिः
कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान् इ
त्यादि विशेषापवन संहितायां शौनकं प्रति व्या
सवाक्यं ॥ विद्यामंत्रमपि पितृर्गृह्णीयादि
तिभावः प्रायश्चित्तं त्वयुतगायत्रीजपः सर्वत्र
तथादर्शनात् योगिनीतंत्रे निर्वीर्यं च पितुर्मं
त्रं तथा मातामहस्य च स्वमलब्धं स्त्रियादत्तं सं
स्कारेणैव शुद्ध्यति स्वमलब्धे च कलशे गुरोः
प्रणां निवेशयेत् वटपत्रे कुंकुमेन लिखित्वा
ग्रहणं शुभे तत्र सफलमाप्नोति अन्यथा विफ
लं भवेत् इदं तु सद्गुरोभावे तत्स्तत्वे तस्मात् एकमं
त्रं गृह्णीयादिति स्वप्ने तु कालनियमः स्वप्ना
सन्नियमे नहीति नारदवचनात् वर्जनीयग्रहं
वक्ष्ये मंत्रिणा हितकाम्यया ॥ तथा च बृहत्स्य
र्यसंहिते ॥ अपुत्रो मृतपुत्रश्च कुशीच वामनस्त
था कटदीर्घामदंत श्च स्त्रीजितोप्यधिकांग

नाः हीनांगः कुनाथी रोगी बह्वाशी बहुजल्प
कः एतैर्दोषैर्विहीनयोः सगुरुशिष्यसम्मतः
अथेदानीं ग्रन्थवर्यशिष्यलक्षणमुच्यते ॥ त
था च रुद्रयामले ॥ राज्ञि चामात्यजो दोषः प
त्नीपापं स्वभर्तरि तथा शिष्यार्जितं पापं गुरुः प्रा
प्नोति निश्चितम् अतो विचार्य यत्नेन कुर्याच्छि
ष्यं सदा गुरुः तथा च शारदातिलके ॥ शिष्यः कु
लीनः शुद्धात्मा पुरुषार्थपरायणः अधीतवेदः
कुशलो दूरमुक्तमनोभवः हितैषी प्राणिनां
नित्य मास्तिकस्त्यक्तनास्तिकः स्वधर्मनिर
तो भक्त्या मातृपितृहितोद्यतः वाङ्मनःका
यवसुभिर्गुरुशुश्रूषणोद्यतः एतादृशगुणो
पेतः शिष्यो भवति नापरः ॥ तथा च याम
ले ॥ शिष्यः शुद्धमना ज्ञानी पुरुषार्थपराय
णः अधीतशास्त्रस्तत्त्वज्ञो हितैषी प्राणिनां सदा
नास्तिकाचाररहित आस्तिकश्च जितेन्द्रियः स्वध
र्मनिरतः शुद्धः पितृमातृहितेरतः शुश्रूषुर्गुरुभ
क्तश्च जितात्मा श्रद्धयान्वितः कामक्रोधादिरहि
तो निविशेमंत्रपूजने वाङ्मनःकायवसुभिर्गुरुशु
श्रूषणोद्यतः सर्वात्मना तितीर्षुश्च भवाब्धेर्भवरुः स्ववि

त

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मणो धर्ममोक्षार्थी कामार्थी विगतस्पृहः
किंवा कामार्थमोक्षार्थी निष्कामश्चाथवा द्वि
नः मातृवद्गुरुपत्नीषु भ्रातृवत्तस्तेष्वपि देव
बुद्ध्या सदा तेषु भक्त्या पूजनमाचरेत् एते सदै
वानुकम्प्या वर्ज्यानन्यान्निबोधत इदानीं वर्ज्य
शिष्याणां लक्षणं कथयामि च पाशाण्डकुशे।
अलसा मलिनाः क्रुद्धा दाम्भिकाः कृपणाः ख
लाः दरिद्रा रोगिणः क्लिष्टः रागिणो भोगला
लसाः असूयामत्सरग्रस्ताः शठाः परुषवादिनः
अन्यायोपार्जितधनाः परदाररताश्च ये विद्विषां
वैरिणश्चैव अज्ञाः पंडितमानिनः नष्टव्रताश्च ये
केचित् पिशुनाः कष्टवृत्तयः बह्वाशिनः क्रूर
चेष्टा दुरात्मानश्च निन्दिताः इत्येवमादयोऽप्यन्ये
पापिष्ठाः पुरुषाधमाः एवंभूताः परित्याज्याः शि
ष्यत्वेनोपकल्पयेत् यद्येते उपकल्प्येरन् देवताः क्रो
धभाजनाः भवन्तीह दरिद्रास्ते पुत्रदारविवर्जि
ताः नारकाश्चैव देहान्ते तिर्यक्त्वं प्रभवन्ति ते।
तथा प्रणाभितस्तेभ्यो निन्दितेभ्यो ददान्ति ये
विनश्यत्येव सकलं सेकतो शालिवीजवत्॥ त
थाच सारसंग्रहे॥ शठः क्रूरश्च मूर्खश्च लुब्ध

कोभक्तिवर्जितः अतिमाहृसिकश्चैवहृषि।
तोदेवनिन्दकः कुलनिंदापरश्चैवपरधारर
तस्तथा पतैर्दोषविहीनोयः सशिष्यःशिष्ट
सम्मतः नदेयंपरशिष्येभ्यापरिचर्यारतेष्वपि।
तथाचब्रह्मवैवर्ते।। प्रातिकूल्यंगुरोर्नित्यंमनसा
पिनकारयेत सदाशिवधियानित्यमेकाग्रमस
निवासिनम गुरुंवन्देतचेद्दूरेमनसावन्दनंच।
रेत प्रातःशिरसिशुक्लेब्जेद्विनेत्रंद्विभुजंगुरुं
वराभयकरंशान्तंस्मरेत्तन्नामपूर्वकं अज्ञान
तिमिरान्धस्यज्ञानांजनशलाकया चक्षुरुन्मी
लितंयेनतस्मैश्रीगुरवेनमः ब्रह्मविष्णुशिवादी
नांपूजनेयत्फलंलभेत तत्फलंसमवाप्नोतिप्रत्य
हंवन्दनेगुरो गुरुर्ब्रह्मागुरुर्विष्णुगुरुस्साक्षात्म
हेश्वरः संतुष्टस्तुगुरुर्यस्मैतस्मैतुष्टंजगत्त्रयं शि
वरुष्टेगुरुस्त्राता गुरौरुष्टेनकश्चन अविद्योवा।
सविद्योवा गुरुरेवतुदैवतं अमार्गस्थाश्च।
मार्गस्था गुरुरेवपरागतिः यथासिद्धर
सस्पर्शात्ताम्रंभवतिकांचनम सन्निधानेगु
रोरेव शिष्यःशिवमयोभवेत भवार्ण।
वतरिः शास्ता गुरुरेवसदागतिः ।।७।।

© Dharmartha Trust J&K. Digitized by eGangotri

गुरोतिष्ठतियस्त्वन्यमासनम्पूजयेद्गुरुः सद्ग
गतिमवाप्नोतिपूजासाविफलाभवेत् प्राणि
पत्यगुरुंपश्चान्मोहाद्विप्रतिपद्यते युगको
टिसहस्राणि नरकेपच्यतेतथा येगुर्वव
ज्ञांकुर्वन्ति पापिष्ठाः पुरुषाधमाः नते
षांनरकेक्लेशा निस्तारोस्तिकथंचन ः यैः
शिष्यैस्त्वसदावाच्या गुरवोप्यवमानिताः
पुत्रमित्रकलत्रादि संपद्भ्यःप्रच्युताद्धिते श्र
धित्विष्यगुरुंमोहात्परुषंप्रवदन्तिये स्तक
रत्वंभवत्येव तेषांजन्मशतेष्वपि येगुरुद्रो
हिणोमूढाः सततंपापकारिणः तेषां
नयावत्सुकृतं दुष्कृतोस्यान्नसंशयः येषां
भक्तिर्गुरोस्थैर्या मुक्तिस्तेषांकरेस्थिता शु
श्रूषयाधनेधान्यैश्चफलैः वाक्यैःशुभावहैः
वशंकुर्याद्गुरुंधीरस्स्वच्छन्दहृदयेनवै यस्यना
स्तिगुरोभक्तिर्ज्ञानंचापितथाविधम् नतस्य
जायतेसिद्धिः कल्पकोटिशतैरपि गुरोभ
क्तिःसदाकार्यागुरुश्चेद्दोषसंयुतः महा
पातकयुक्तोवा गुरुर्देवःसदाशिवः ॥ त
थाचदिव्यागमे ॥ गुरुशय्यासनंयानंपादुकां

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा· क· १

वैवपीठकं स्नानोदकं तथा छायां लंघयेत्तक
दाचने गुरोरग्रे पृथक्पूजामौद्धत्यं च विवर्जये
त् दीक्षाव्याख्याप्रभुत्वं च गुरोरग्रे परित्यजेत् गु
रुमंत्रदेवतानामैक्यं संभावयेद्धिया विज्ञानस्या
प्रमेयस्य निर्गुणस्याशरीरिणः साधकानां हि
तार्थाय ब्रह्मणो रूपकल्पना मंत्रश्रेष्ठो हि गुरुर्य
त्र तत्र तुष्टो जगत्पतिः देवे रुष्टे गुरुस्त्राता गुरौ रु
ष्टे न कश्चन गुरुर्देहं समाश्रित्य मंत्रदेहो न तिष्ठ
ति तत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता त
स्माद्ब्रह्मदात्रं सत्यो न मतं तं पितृभ्योऽधिकं गु
रुं तस्मात्सर्वप्रयत्नेन गुरुर्मान्यो धनादिभिः य
त्प्रकाशात्परं स्थानं प्राप्यते भुवि दुर्लभं गन्धैर्मा
ल्यैर्धूपदीपैः संपूज्य गुरुमग्रतः ततो मंत्रं च गृ
ह्णीया दक्षिणाच्छायमस्तकं दशावेशः त
थामातः श्वश्रुरस्य तथा दश ॥ पितृणा-
मेकपंचाशत् स्वर्गं गच्छन्ति निश्चितम् नन्द
न्ति पितरः सर्वे पुत्रे मंत्रार्थसाधिनि गच्छ
न्ति स्वर्गभोगांश्च स्वर्गवासः सुनिश्चयः
॥० वेस्सवेवेस्सवंग्रात्सं भ्रोवेशेवेव ०॥
॥० ॥० श्राक्रके ॥ ०॥ ०॥ ०॥

© Dharmartha Trust J&K. Digitized by eGangotri

कलौशक्तिमथानंच ब्राह्मणादिभिरेवच ना।
शूद्रस्याधिकारोस्तिपुराणेनिगमात्मके शूद्र
शिष्यमनोज्ञान मुत्कर्षनहिसर्वथा लाभार्थे
यदितत्कुर्याद्धिस्वमंत्रंविनैवहि प्रणवाद्येन।
दातव्यंमंत्रंशूद्रायसर्वथा ग्रात्ममंत्रंगुरोम।
त्रं मंत्रबीजपसंज्ञकम ग्रात्मकौलिकमंत्रं।
च नैवदद्यात्कदाचन गोपालस्यमनुर्देयो
मेदेशस्यापिपादजे तत्पत्नीचापिसूर्यस्य ग
णेशस्यमनुस्तथा षष्ठीदशादिकारीस्या द
न्यथापापभाग्भवेत ॥ तदुक्तंतंत्रराजे ॥ पु
स्तकेलिखिताविया येनसुन्दविजप्यते नजा
यतेतस्यसिद्धि हानिरेवप्रजायते ॥ इति।
श्रीग्रागमकल्पलतायांद्वितीयः पटलः ॥२॥
ॐगुरुस्त्वात्मविशुद्ध्यर्थं शिष्यं तुपरिशोधये
त अब्दकेनभवेद्योग्योब्राह्मणोऽब्दद्वयात्परः
वैश्योवावर्षैस्त्रिभिः शूद्रः चतुर्भिर्वत्सरैः सदा।
शिष्येणापितथाकार्यं स्वकीयाभीष्टमिच्छता
गुरुवित्तिशेषः॥ तथाचगौतमीये॥ शुभेक्षि
त्वानमाचर्यनमस्कुर्याद्गुरोस्सदाम सूर्यंशिवं
हरिंदुर्गां वाणींचकमलालयाम मातरंपि।

© Dharmartha Trust J&K. Digitized by eGangotri

आ॰ क॰ ८

४

तरंनत्वाब्रह्मणाम्नविनोप्यच फलंपुष्पंसमंग
ल्यंगृहीत्वाभक्तिसंयुतः पुरुषार्थसमावाप्त्यैस।
शिष्योगुरुमाश्रयेत आत्मविज्ञापनंकृत्वापित्र
मातृकुलान्विते गुरुस्तेनैवसंबोध्य प्रणमेद्दण्ड
वद्भुवि गुरोरग्रेसमुत्थायपुटांजलिकरस्थितः
विचारयमहावाहोमद्दितंमंत्रवर्यकं गुरुर्विचा
रयेत्तस्माद्देयमंत्रांश्चयत्नतः॥ एवंच॥ स्वता
रराशिकोष्ठानामनुकूलंभजेन्मनुं॥ एवं॥ अर
णामंत्रंनगृह्णीयादकुलंचतथैवचेत्यादिवचना
त चक्रविचारस्यावश्यकत्वात्प्रथमंतन्निरूप्यते।
अथवक्ष्येविचारंहिचक्राणांसिद्धिदैरतवे आदौकु
लाकुलंचक्रमकथाख्यंद्वितीयकं तृतीयमरण
धनाख्यंचतुर्थंवर्गसंज्ञकं पंचमंराशिचक्रंस्या
त्षष्ठंनक्षत्रचक्रकम सप्तमंगणचक्रंस्या।
दष्टमंमष्टकमष्टतम नवममृदितंचक्रं दश
मंनाडिकाह्वयम॥॥ क्रमेणाह॥
॥ शारदातिलके॥ कारणात्पंचभू।
ताना मुद्भूतामातृकादयतः अतोभूता।
त्मकावर्णाः पंचपादविभागतः वाय्व।
ग्निभूजलाकाशाः॥०॥०॥०॥०॥

© Dharmartha Trust J&K. Digitized by eGangotri

पंचाशल्लिपयः क्रमात् पंचह्रस्वाः पंचदी
र्घाः बिन्द्वन्ताः सन्धिसम्भवाः पंचशः कादयः
षत्तलसहान्ताः समीरिताः स्वनामाद्यक्षरा
णांतन्मित्रंवास्वकुलंवरम् पंचपंचेतिदशव
र्णाइत्यर्थः ॥ वाय्वग्नीत्यादि अआएकचटतप
यषाः मारुताः इईऐखछठथफरक्षाः आ
ग्नेयाः उऊओगजडदवलवाः पार्थिवाः ऋॠ
औघझढधभसा वारुणाः लृॡअंङञणन
मशानाभसाः पंचह्रस्वाइति अइउऋऌ पंच
दीर्घः आईऊॠॡ बिंद्वन्ताइति बिंदुरन्तेयस्य
तेन अंइत्यर्थः एतेनविसर्गस्यानुपयोगोल
क्ष्यः ॥ तथाचपिंगलामते ॥ मंत्रसाधकयो
र्योवर्णः स्यात्पार्थिवोयदि तत्कुलंतस्यत
त्त्वात्कमेवमन्येषुलक्षयेत् ॥ सन्धिसंभवेति ॥
एऐओऔस्वनामाद्येति एकत्रोभयावस्थानेस्व
कुलम् ॥ तदुक्तंवाराहीतंत्रे ॥ साधकस्याक्ष
रंपूर्वंमंत्रस्यापितथाक्षरम् यद्येकभूतदैवत्यं
जानीयात्स्वकुलंहितत् मित्रमिति परस्परमै
त्रम् ॥ तदुक्तंनारायणीये । पार्थिवेवारुणं
मंत्रमाग्नेयस्यापिमारुतम् पार्थिवानामतत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

आ॰ क॰ ४ १

णांशत्रुर्वैमारुतेस्थितं आग्नेयस्याम्भसोश
त्रुरम्भसः तैजसंस्मृतं एतेषामेवसर्वेषाम्।
विरोधेननामसं परस्परविरुद्धानांनकुर्यान्मे
लनंक्वचित् अकुलाकुलेचक्रेसमस्तपुरु
षार्थदं वक्ष्येऽकथहचक्रेप्रालिखेच्चतुरस्र
कं मध्येरेखात्रयंदद्यात्प्रागग्रामुदगग्रगां च
तुरस्रंभवेत्तत्रचतुष्कोष्ठसमन्वितं पूर्वापराग्र
न्दद्यान्मध्येरेखाद्वयंततः उदग्दक्षिणदी
र्घंचदद्याद्रेखाद्वयंपु
यः ततःषोडशको
ष्ठान्जायतेचक्रव
र्यकं अादिक्षान्तेलि
खेद्वर्णान्क्रमेणानेन
मंत्रवित् ।। पिंगलाम
ते ।। इन्दुग्निरुद्रनव
नेत्रयुगार्कदिक्षु अ
ष्टषोडशचतुर्दशभौ
मिकयुपातालपंचदशवह्नि हिमांशुकोष्ठेवर्णा
लीवलिपिभवान्क्रमशस्तुधीमान् नामाद्यव
र्णमारभ्ययावन्मंत्राद्यमक्षरं चतुर्भिःकोष्ठैरेकैक
मितिकोष्ठचतुष्टयं ।।

अ	इ	उ	ऋ	ऌ
आ	ई	ऊ	ॠ	ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ञ
च	छ	ज	झ	ङ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	ह
ष	ल	ल	स	
वायु	अग्नि	भूमि	जलं	आकाश

© Dharmartha Trust J&K. Digitized by eGangotri

पुनःकोष्ठककोष्ठेषुसर्वतोनाम्नमुदितः
सिद्धःसाध्यःसुसिद्धोरिःक्रमाज्ञेयाविचक्षणैः
सिद्धःसिध्यतिकालेनसाध्यस्तुजपहोमतः
सुसिद्धोग्रहणादेवरिपुर्मूलंनिकृन्तति सि
द्धार्णाबान्धवाज्ञेयासाध्यास्तेसेवकाःस्मृताः
सुसिद्धाःपोषकाप्रोक्ताःशत्रवोघातकाःस्मृ
ताःजपेनबन्धुसिद्धास्यात्सेवकोधिकसेवया
पुष्णातिपोषकोभीष्टंघातकोनाशयेद्ध्रुवम् ।
सिद्धसिद्धोयथोक्तेनद्विगुणात्सिद्धसाध्यकः
सिद्धःसुसिद्धोर्धजपात्सिद्धारिर्हन्तिबान्धवान्
साध्यसिद्धोद्विगुणकः साध्यसाध्योनिरार्थ-
कःसाध्यसुसिद्धोवज्जपात्साध्यारिर्हन्तिगोत्र
जान् सुसिद्धसिद्धोर्धजपा
त्साध्योद्विगुणाधिकः
ग्रहणात्सुसिद्धस्तु सु
सिद्धारिःस्वगोत्रहा अरि
सिद्धःसुतंहन्यादरिसाध्य

अक थह	उ प	आ खद	ऊच फ
ओड व	ऌ म	औढ श	ॡ ञ य
ईघन	ॠज भ	इग ध	ऋछ ब
अः त स	ऐठल	अंण ष	एट र

स्तुकन्यकाम् पत्नीमरिसुसिद्धस्त्वर्यरिर्मृ
लघातकः ॥ एषुदोषेषुसर्वत्रमायांकामम
थापिवा त्रिसंवादोप्रियंदद्यात्तुहृणावि
मुक्तये इतितंत्रमार्गे ॥ इतिअकथहचक्रं

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
क॰
१॰
10

तदुक्तं तंत्रराजे ॥ कथमृणितं मंत्राणां साध
कानां च मे वद पूर्वजन्मकृताभ्यासात्तु पादस्याः
फलाभिकृत पापेनष्टफलावाप्तिः कालेदेहत
यादृणी मंत्रः संप्राप्तिमात्रेण प्राकृतस्सिद्धये
भवेत सिद्धमंत्रान्गुरोर्लब्धा मंत्रीयस्सिद्धिभाग्नः
लक्ष्मीमतासर्वपूज्यो मंत्रभोगमवाप्तवान सम
त्रस्यऋणीतेयो भजनेतस्यपूर्वगं तस्मादृण
विशुद्धिस्तु कार्यास्सर्वैस्तु सर्वदा ॥ तथाचाग
मकल्पद्रुमे ॥ पूर्वापरं द्वादशसंख्यरेखास्त्रैयाम्या
नवस्यं च तथा च तन्वं द्वौ द्वौ स्वरौ पंचसकोष्ठके
षु पोषान्स्वरान्षट्सु षड्डेकमेकं कादीनदृषो
षान्विलिखेत्ततो र्गानेकेकमेकादशमस्थले
षु ॥ इन्दुर्दनेत्र रविपंचदशर्तुवेद वहून्या
युधाष्टनवभिर्गुणितांश्चसाध्यान दिग्भू
गिरि गजाग्निमुनीषु .... श्रुतिवेदषट्व
ह्निभिश्च गुणितानथ साधकांकैन ॥
इन्द्रादिभिर्गजैर्हृतैः गणितैः
स्वकोष्ठसाध्यं च साधक
लिपिं वदिगा ॥
॥० ॥० दिग्भिश्च ॥ ० ॥ ० ॥
० ॥ ० ॥ ० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नाम्नो द्दलादकद्दवाङ्गनभक्तशेषं ज्ञात्वोभयो
रधिकशेषत्र्यरणं धनं स्यात ॥ अस्यार्थः ॥ य
स्मिन्कोष्ठे साध्यसाधकयोर्वर्ट्कट्टश्यते तत्कोष्ठ
स्थितांकं गृहसंख्याकैः पूरयित्वाष्टभिः भागमा
हरेत सर्वत्र हरणमष्टभिरेव द्दावकाभावात्म॰
नपर्यन्तावस्थानं षट्कालकालइतिवचनद्दयं सि
द्धांकप्रदर्शकमिति निष्कर्षः ॥ प्रकारान्तरमा
ह ॥ तथाच सुन्दरीरहस्यवृत्तौ ॥ पूर्वापरायतं
लेखांगेयाद्दादशकं क्रमात क्रमेणैवात्र जायंते
कोष्ठान्येकादशक्रमात तेषु वर्णान्लिखेन्मंत्रीस्व
रादिक्रमयोगतः द्दौ द्दौ स्वरौ पंचमसकोष्ठकेषु शे
षान्स्वरा षट्स्वषडेकमकम कादीनद्दशेषाल्वि
लिखेत्ततोर्णानेकैकमेकादशमात्रकेषु साध्या
काविलिखेद्दर्थे साधकांकानधो लिखेत इन्द्र
र्दानेत्रेत्यादि ॥ मंत्रीयद्यधिकांकस्यान्नदामंत्रंज
पेत्सुधी समेपि च जपेन्मंत्रीनजपेत्त्रयणाधिके॰
गुणितेनहृतांकानां यच्छेषं जायते स्फुटं तदं॰
कं कथयाम्यत्र द्दादशागारसंस्थितं षट्कालका
लवियदग्निसमद्रवेदावाकाशशून्यदहनाः
खलसाध्यवर्णाः युगमहि पंचवियदस्वरयु—

२

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
क·
११

शंकख्यामाग्निवेदशशिनः खलसाधकार्णाः
अन्यप्रकारमाह ॥ कोष्ठान्येकादशान्येववेदैन·
पूरितानि च अकारादिहकारान्तं लिखेः कोष्ठे
षु तत्ववित् प्रथमं पंचकोष्ठेषु क्रमाद्दीर्घक्रमेण
तु ह्रस्वं ह्रस्वं लिखेत्तत्र विचारे खलु साधकः शेषे
ष्वेकैकशो वर्णान्क्रमशस्तु लिखेत्सुधीः षंका
लकालेत्यादि ॥ अस्यार्थः ॥ साध्यवर्णान्स्व
यंजनरूपेण पृथक्कृत्वा षकालाद्यंकैर्गुणिताकृ
त्वा तथा साधकनामाक्षराण्युक्ताद्यंकैर्गुणयि
त्वा ष्टसंख्याभिर्हृत्वा उभयोश्च साध्यसाधकयोः शे
षस्याधिकरूपसंख्यां धनं ज्ञात्वा मंत्रं दद्यात् ॥
मंत्रः शोहृणीभवति ॥ तदाशुभदायको भ
वति धनी चेत्तथा ॥ उक्तं तन्त्रेत्यादि ॥
नामाद्यलादिवचनं तत्विस्तु विषयग्रामार्णनच
न्द्रिकाधृतत्वात् प्रकारान्तरमाह तंत्रराजे ना
माद्यक्षरमारभ्य यावन्मंत्रादिमं भवेत् त्रिधा
कृत्वा स्वरैः हृत्वा तदन्यद्विपरीतकम् साधका
नामाद्यक्षरतो गणनया यावन्मंत्रादिमाक्षरं·
तत्संख्या त्रिधाकृत्वा सप्तभिः हृत्वाधिकं त्व
णं शोधं धनं स्यात् ॥ तदन्यदिति ॥ ० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्राद्यक्षरमारभ्य यावत्साधकनामाद्यक्षरं भ
वेत्तावत्संख्यसमगुणां कृत्वा त्रिभिर्हरेत् साध्यना
मद्विगुणितं साधकेन समन्वितं अष्टभिः वा
हरेत्छेषं तदन्यद्विपरीतकं अस्यार्थः साध्यना
मस्वरव्यंजनभेदेन संयोज्याष्टभिर्हृत्वाक्षराणां ध
नं ज्ञेयं तदन्यदिति साधकानामाक्षराक्षरव्यं
जनभेदेन द्विगुणीकृत्य साध्याक्षरेण संयोज्या
ष्टभिर्हृत्वाक्षराणां धनं ज्ञेयमिति ॥ ऋणधनच
क्रम ॥ वनचक्रं प्रवक्ष्यामि

९	९	९	[illegible]	३	४	४	०	०	०	३
१४	२०	२	१२	१५	६	४	३	७	८	९
अ आ क ठ ब	इ ई ख ड भ	उ ऊ ग ढ म	ऋ ॠ घ ण य	ऌ ॡ ङ त र	ए च थ ल	ऐ छ द व	ओ ज ध श	औ झ न ष	अं ञ प स	अः ट फ ह
०.	१	७	४	८	३	७	५	४	६	३
२	२	५	[illegible]	[illegible]	२	[illegible]	०	४	४	१

ज्योतिरागमसः मतं मंत्राणामविशोधार्थं नामाद्य
क्षरपूर्वकं अष्टकोष्टान्समापाद्यवर्गान ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा० क०

१२

12

ष्टालिविनतः पक्षिमार्जारपंचास्यश्वनसर्पाखु
दंतिनः मेषक्रमात्कादिवसवर्गाश्रिताइमे
साध्यसाधकयोः प्रीतिः ज्ञातव्याजातितः सदा ॥
पक्षिमार्जारयोर्वैरं वैरंकुक्कुटपक्षिणोः वैरंपक्षि
भुजंगानांश्वाघ्रवंगजसिंहयोः मेषकुक्कुटयोर्वै
रंप्रीतियुक्त्याविचारयेत् एवंवर्गकवरंज्ञात्वागरुडी
यात्मंत्रमुत्तमम् प्रकारान्तरमाह वाराहीतंत्रे ॥
मार्जारकुक्कुटव्यालेः पक्षिणांवैरिताभवेत् मा॰
र्जारस्यश्वनाखुभ्यांसिंहस्यदंतिनः सदा कुक्कुट
स्याभ्यांयगोतभ्यांखगाखुभ्यांचभोगिनः उत्त
रस्यात्सर्पाभ्यांहरिणांसहदन्तिनः भुजंगसिं
हयोः मैत्रीमेषस्यषकयोस्तथा लोकादन्यत्र
विज्ञेयंव्यवहारप्रयोगतः इतिवर्गचक्रम् ॥
इदानींतप्रवक्ष्यामिराशिचक्रंविशेषतः सूत्र
हयंपूर्वपरायतेतन्मध्येहयंयास्य

अआइत्यादि १६	पक्षी	कखगघङ	मार्जारः
चछजझञ	सिंहः	टठडढण	श्वा
तथदधन	नागः	पफबभम	आखुः
यरलव	गजः	शषसह	मेषः

© Dharmartha Trust J&K. Digitized by eGangotri

कुवेरभेदात् एकैकमीशाननिशाचरेन्द्रहुताश
वाय्वोर्विलिखेत्ततोऽर्णान् वेदाग्निवह्नियुगलस्व
वर्णान्त्रिसंख्यान्यांवेषुवाणशरपंचचतुष्टयान्तान्
मेषादितःप्रविलिखेत्सकलांश्चवर्णान्कन्यागतांश्च
विलिखेद्यथासाध्यवर्णान् तथाचवृहत्सर्त्येसह्लैके वे
दाग्निवह्नियुगलद्विवाणवाणेषुवाणेषुपयोधिसंख्या
न् मेषादिकोष्ठेषुभिलिख्यवर्णान्षडेवशादीर्युवतौ
लिखित्वा तथाचसारसंग्रहे चतुर्भिर्यादिभिःसा
र्धंस्यात्तकारस्तुमीनगइति शारदायां वालेगौरेव
रंध्रोणांशमीशोभेतिराशिषु क्रमेणभेदितावर्णाः
कन्यायांशादयस्थिताः तथाचवराहसंहितायां ज
न्मःस्वराशितोवर्ज्याः षष्ठाष्टरिःफगाःशुभाःएक
द्वित्रिचतुःपंचसप्तमास्यदशरुद्रगाः लग्नोथतनुभ्रातृ
वन्धुपुत्रशत्रुकलत्रकाः वेलवमतेतत्रशात्रस्थानेवन्धु
रितिपाठः मरणधर्मकर्मायव्ययद्वादशराशयः
नामानुरूपमेतेषांशुभाशुभफलंदिशेत् स्वराशेर्म
त्रराशयन्तंगणनीयाविचक्षणैः राशीनांशुद्धताज्ञेय
त्येनेत्युक्तत्रस्तीतिव्ययं तत्रायमुपदेशः पूर्वपश्चिमा
यतंरेखाद्वयंदक्षिणोत्तरायतंरेखाद्वयंईशानादिको
णेषुरेखाचतुष्टयं तत्कोष्ठेषुपंचाशद्वर्णान्मेषादितो

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रा॰
क॰
२३
13

वक्ष्यमाणक्रमेणालिखेत् अआइई मेषे उऊऋ
वृषे ॠऌॡ मिथुने एऐ कर्कटे ओऔ सिंहे अंअः
शषसहळः कन्यायां कखगघचटतलायां चछज
झञ॰ वृश्चिके टठडढण धनुषि तथदधन मकरे
पफबभम कुम्भे यरलव मीने॥ लग्नाद्यनमित्यादि
क्रमेणागणनीयं मीनेलकारमितिकेचित् चतुर्भिर्दी
दिभिः सार्धं स्याल्लकारस्तु मीनक इति वचनात्॥
वाराहीतंत्रे॥ एकोवाप्यथ पंचमोथ नवमो राशोस्व
कान्यान्यवा राशोस्यादृशमो द्वितीयसहितः षष्ठोभ
वेत्सकाः रुद्राग्निस्वरसंख्यायानिगदितो मंत्रः स्वयंपो
षकः स्याद्वेदष्टमवत्सरघ्नुतिमिति मंत्रः स्वयंघातकः
लग्नाधनेभ्रातृशत्रुपुत्रमित्रकलत्रका मरणांधर्मकर्मा
यव्ययाद्वादशाराशयः अत्रराशिचक्रेचतुर्थस्थाने शाय
नत्वबन्धः एवंषष्ठस्थानेबन्धुः नशत्रुरितिकाश्चित् न
श्चिन्तनीयं इतिराशिचक्रं॥ अथनक्षत्रचक्रं तथाच
योगिनीतंत्रे अरहिमुद्दिश्य
वक्ष्यामि शिष्याणांहितं।
कामपयाः पूर्वापरायतारोरवा
दशादेयः प्रयत्नतः इटदति
णादीर्घाश्चरेवादेयाप्रतिष्ठं

उऊऋ मि ॠ टॢलॢ	मेषे अआइई	यरलव मी प फबभ म कुं
एऐ कर्के	ओं	तथदधन मं
सिं ओऔ अं अः शषसहळः	कखगघचटत लायां	टठडढण व छजझ धं फ वृं

© Dharmartha Trust J&K. Digitized by eGangotri

नवत्रितयसंयुक्ताः कोष्टानांसप्तविंशतिः जायते

चतथाकुर्यालिपिवर्णांस्तेषुच पद्वैकर्म्यंविनृ

पावनिभुजशशियुग्मादपत्तायगैदकद्विविनृपम्य

वनिशशाशिद्वेकपत्तायिवेदाः अश्वन्यादिक्रमे।

णनत्रमिदृगदितेशोषभेविंदुसगौजघ्ननत्त्र भेदा

दष्पपरिगणयेज्जन्मसमृत्तक्रमेण जन्मसंपद्विप

त्क्षेमंप्रत्यरिःसाधकोवृधः मैत्रंपरममैत्रंचजन्मा

दीनिपुनःपुनः गणयेन्नक्रमादेवफलेनामान्

नृपतः जन्मत्वेनभवेहानिः सम्पत्तिःस्याश्चसम्पा

दि विपन्नार्वैविपत्तिःस्यात्क्षेमेमंगलमादिशेत प्र।

त्यरोशत्रुवृद्धिःस्यात्साधकेसिद्धिसाधनम वधत्वे।

चवधोज्ञेयोमित्रत्वेमित्रवर्धनं अतिमित्रेभवेत्सोख्यं

ताराचक्रमिति।स्मृतं विपद्वयःप्रत्यरिश्चपरित्या

ज्यामनीषिभिः निजनामादिकंवर्णमादायपुरतः

श्रियेनामाघत्तरपर्यंतंगणनीयम्बुधैःत्रिभिः क्रत्या

त्तानराशिविषयं ज्ञातेन्नतदेव सिद्धार्थमाह पूर्वा

परायतांदशरेखांदत्वादक्षिणोत्तरायतांचवैरेवाच

रेखाचतष्टयंदत्वासप्तविंशतिकोष्टेषुवक्ष्यमाण

क्रमेणपंचाशद्वर्णालिखित तद्यथा अश्वअश्विनी

देवगणः अभरणीमानुषः ईउऊकृत्तिकाराक्षसः

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा·
क·
१४
14

अअलललरोहिणीमानुषः पमृगशिरः देवः पे
आर्द्रामानुषः ऊंऔपुनर्वसुः देवः कःपुष्यः देवः
खिगश्लेषाराक्षसः चटमघाराक्षसः वपूर्वफल्गु
नीमानुषः फउ·हस्ता देवः टठचित्राराक्षसः ड
स्वातिदेवः फणाविशाखाराक्षसः तथदअनुराधादे
वः धज्येष्ठाराक्षसः नपफमूलंराक्षसः वपूर्वषाढा
मानुषः भउत्तराषाढामानुषः मश्रवणादेवः यर
धनिष्ठाराक्षसः लशतभिषामानुषः वशपूर्वभद्र
पदामानुषः षमहउत्तरभद्रपदामानुषः अंअः
लंक्षः रेवतीदेवः तृतीयपंचमसप्तमवर्जनीयानिन
क्षत्राणि स्वनक्षत्राद्देवगणनीयं स्वनक्षत्रात्तानेस्वनामा
घक्षरसंबन्धिनक्षत्राद्देवगणनीयं प्राद्दक्षिणेपनगणा
धेस्वाथकाक्षरतः मधीरिति ॥ तथाचज्योतिषे ॥
हस्तस्वातिमृगाश्विनीहरिगुरुपौष्णानुराधादितिश्वा
न्द्रारोहिणीवाजराणिभरणीपूर्वाणिभानिश्वान्द्रारव
ये ज्येष्ठाश्लेषविशाखमूलवरुणाग्नस्त्वाष्ट्रचित्रामघाः क
थ्यन्तेमुनिभिः यथाक्रममिमेदेवानराराक्षसाः ॥
ज्योतिषे ॥ कटपयवर्गभवैरिहपिण्डान्त्यैर·
क्षरैरंकाननेनेन्नमूत्यंज्ञेयंतथास्वरेरक्षरैरेव·
म ॥ ॥ पिण्डसंयुक्तेअक्षरे ॥ ॥०॥

© Dharmartha Trust J&K. Digitized by eGangotri

शारदातिलके॥ प्राप लो भा पट् प्राज्य रुद्र स्वा
त्रि रु रु करः लोकलोप पट्ः प्रयः वाव लो
चो भेषुभेदितः वर्णाविक्रमात्स्वराण्येतान्रेवत्यंश्रा
गतेतानिदा गवाक्षतंत्रे प्रायंसमोगुणंवेदंत्रूपंत्रूपंय
संशशी प्रायंप्रायंतथाचन्द्रत्रिपायंसमोयुग्दके ग
णोकगुणत्रिःसोमयमान्तेसोमायंगुणाः वेदंवेतिय
मेदष्टकंसंख्याश्वत्यसेनिधिः स्वनामाद्यक्षरस्य
नक्षत्रेणामंत्राद्यक्षरस्य विचारः रसाष्टनवभद्राणि
युग्मयुग्मप्रभेदतः इतराणिनभद्राणिज्ञातव्यंमं
त्रकोविदः तथाचमंत्रचार्डमणौ आरभ्यजन्मन
क्षत्रंमंत्रनामावसानिकं युग्मतारद्वयंचतुष्टयमिति
इतिनक्षत्रचक्रं तथाचगन्धर्वतंत्रे चक्रंवक्ष्येकडमा
ख्यंप्रसिद्धंसर्वसिद्धिदं मंत्राणांग्रहणेमंत्रीसर्वथा
नविचारयेत् राशिचक्रेलिखेमंत्रीवर्णान्क्लीबविव
र्जितान् अकारादिक्षकारान्तान्विलिखेत्क्रमतःसु
धीः आदिकोष्ठेयथावर्णाजायन्तेकडमाःक्रमात् वि
लिख्यगणयेज्जन्मनामाद्यक्षरपूर्वकं सिद्धसाध्यसु।
सिद्धारिक्रमेणैव

अआ श्रद्धि	इ भर	ईउऊ रुति।	ऋॠ लृलॄ	ए म	ऐ श्री	ओऔ पं	कवि तृपद	खग श्र
घट म	च ष्ट	छज उ	फड द	ढ ठ वि	ड स्ता	ण ग वि	सस द्द उ	थ ज्य
नपफ मृ	व षु	भ उ	म म्र	यर यं	ल श	वश षु ५	उप	लक्ष श्रंम्रः

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
क॰
१५

15

पुनः पुनः यदिमंत्रानशोभनेतोविचारेणकथ्यतावन
नक्षत्रानिषदमाश्रित्यगृह्णीयान्मंत्रमुत्तमे अन्यथा ॥
अकारादिक्षकारान्तेचक्रमार्गक्रमेणन मेषादितो
मीनान्तेगणयेत्क्रमतः स्वधीः नामः स्वनामतोमे
गीयावमंत्रायमहरं सिद्धः साध्यः सुसिद्धोरिपुनः सि
द्धादयः पुनः नवैकपंचमेसिद्धः साध्यः षट्दशायुग्म
के सुसिद्धस्त्रिसप्तमकेरुद्रे वेदाष्टद्वादशेरिपुः एतत्रैक
थितंदेविश्रकडमादिकमुत्तमे ॥ इदंतुगोपालविषा
यं ज्ञेयं पाशांकुशे ॥ इतितालेमहाचक्रंकथयामि
समासतः षट्कोणेविलिखेदग्रेसमरेखेमनोहरम


आवक सि यह हुगणा ह	मे अकडम	मृः ठभ मी ऊं ट अं
क ईचनल		ओ ङ फ मे
गृ टष ष क ति णा ऊ व	प छ यष तं	ओ क पह हूं धे स्पेजन

पूर्वादिविलिखेद्वर्णाना
दिक्षांतान्यथाक्रमात उ
दिमेसेपदरदिशाद्वितीये
सेपदोत्तयः तृतीयेचतुर्थे
विन्द्यामन्तर्येवन्धुविस
वः पंचमेसेप्राप्यात्मा
षष्टेसर्वविनाशकः स्वनामाद्यक्षरादिमंत्रान्य
क्षरपर्यन्तंगणनीयम ॥ गकुदेचातुरगणपद
फलदाः ४ नंडो टावलङ्धवयटटलरुग्रेणा
दश्च ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥


© Dharmartha Trust J&K. Digitized by eGangotri

ईल्हभवठ कपक उउथमष ऊएजयपखफमन

पूर्वोक्तवज्रयं
पद्माङ्कएवा
द्वावशेहिगी
दुमानिमान
धान्याकः न
लद्वाणिमनी
विणाः ज्यष्टा
शतभिषग्म्



लथनिष्टाश्लेषकृत्तिकाः विज्ञामघाविषाखाः स्वस्ता



गशहस्तदे
वताः अश्वि
नीरेवतीपुष्य
स्वातिहस्तपु
नर्वसुः अनू
राधामृगशि
रः श्रवणादे

वतारकाः इदं चक्रं नरद्वेवकान्तर्गतम् तेनैवास्य
सविताथीधात पृथग्गुपादानेनसंप्रदायानुयोयात अ
थनाडीचक्रं तथा च तंत्रे एकानाडीस्थितायस्यगुरुमं
त्रादेवताः

अआअ	इभे	ईउऊ	मसल्ल लृगाव	ऐमर	ऐआ	ओगेपु	कति	खगसे
बलम	बृह	फजउ	वघद	दहशि	इस्ता	ढमनि	तथदय	धत्ये
नपफहू	बूर	भउ	नम्र	यरचे	लश	वशह	पमढउ	लःअंःहे

तत्रदोषोरुजंमृत्युंक्रमेणफलमादिशेत् ॥ नक्षत्र
मेकंयदिभिन्नराशिर्नेदम्पतीतत्रशुभंलभेते अभि
न्नर्क्षमथयदिचैकराशिस्तदाशुभंस्यान्मुनयोवदन्ति
तथाचज्योतिषे ॥ सर्पाकारेचटनविशेषः कृत्तिक
मुखयमदैवतशेषः पृष्ठेमृतहृतिमध्येरोगः क्रोडेव
निताविनवियोगः गेयाभिनेयपुच्छादोषरूपधनवरू
स्तनवदन्तिवराहः ॥ एतद्गुरुवचनस्यामूलत्वाद्दिवा
द्रप्रकरणेविवाहेष्वनभीष्टइति ॥ तथापिसम्प्रदाया
वरोधाल्लिखितं आदौकुलाकुलंचक्रमकथास्द्वि(?)
तीयकंस्तृतीयस्याधस्यात्वेचतुर्थेवर्गसंज्ञकम् ॥

पंचमे— शिवचक्रंस्यात्षष्ठेनक्षत्रचक्रकम् सप्तमंगण
चक्रंस्यादष्टममकडमेलनम् नवमंमुदितेचक्रेद
शमेनाडिकाह्वयम् उक्तेनानाविधंचक्रंनानातंत्रस्य
दर्शनात् वाराहीतंत्रे ॥ ताराचक्रंराशिचक्रंना
मचक्रंतथैवच अत्रचैकक्षमेलनंज्ञात्वानान्यचक्रंवि
चारयेत् ॥ अथापवादः ॥ तथाचोक्तमग्निपु
राणे ॥ हंसस्याष्टाक्षरस्यापितथापंचाक्षरस्य
च नपुंसकस्यमंत्रस्यसिद्धादीनैवशोधयेत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शारदातिलके मंत्रविद्याविभागेनत्रिविधामंत्रजा
तयः मंत्राःपुंदेवताज्ञेयाविद्यास्त्रीदेवतास्मृता पुंस्त्री
नपुंसकात्मानोमंत्राःसर्वेसमीरिताः हुंमंत्राहुंफट्
न्तास्युर्द्विठान्तास्युस्त्रियोमताः नपुंसकानमंतो
स्युभिद्यन्तेमनवःत्रिधा शास्तास्तेत्रिविधामंत्रावश्य
शान्त्यभिचारके विचार्यनियतंमंत्रीगरुडीयात्सर्व
सिद्धये मंत्रविनानैवसिद्धिकुत्रापिजायतेरुद्रयाम
यामले नृसिंहार्कवराहाणांप्रसादप्रणवस्य च पि
ण्डाक्षरमंत्राणांसिद्धादीन्नैवशोधयेत पिण्डाक्ष
रमंत्राणांसंपुटाक्षरमंत्राणां तथाचोक्तंसारसं
हितायां तथैकाक्षरकूटेचमालामंत्रेतथैवच नि
त्यानांहंसमंत्राणांसिद्धादीन्नैवशोधयेत तथाचाग
मेशाविमर्षिण्यां एकाक्षरेतथाकूटेमालामंत्रेत्रिवी
जके समलभ्रान्तिपादन्तेसिद्धादीन्नैवशोधयेत वै
ष्णवेषुचमंत्रेषुकेचिदिच्छंतिपण्डिताः विंशत्यर्णाधि
कामंत्रामालामंत्राःप्रकीर्तिताः देवीपुराणे ॥ का
लिकायांचतारायांकुल्लुकायांत्रिकूटके तथैकाक्षर
कूटेशिवपंचाक्षरेतथा षडक्षरेतथातस्यैवविष्णोरष्टा
क्षरेतथा विष्णोर्द्वादशार्णेचरामचन्द्रस्यतारके वै
ष्णवेषुचभैरव्यांसुन्दरीमंत्रवर्यके सारस्वतेचबाली

© Dharmartha Trust J&K. Digitized by eGangotri

आ.
क.
११

यांसिद्धादीनेवशोधयेत्। वैलवेषुचमंत्रेषुकेचि
दिच्छंतिपण्डिताः॥ वचनान्तरे॥ शुद्धंप्रशस्तमापरे स
र्वत्रविचारस्यावश्यकत्वं अन्यथादुरदृष्टवशाद्
णमंत्रस्यवैरिमंत्रस्यस्वभावात्मान्नतदोषस्यदृष्ट
त्वादितिसांप्रदायिकाः आम्नायापि॥ आराधनास्या
त् प्रथममासफलंवक्ष्येयामलक्रमेणतत् यत्ना
त्वामानवानित्यंभाग्युःमासजंफलं वैशाखेतशु
भादीनांविपुलांश्रियमादिशेत्॥ ज्येष्ठेमरणप्रदा
चैवआषाढेसर्वसंपदः॥ श्रावणेरत्नहानिःस्या
द्भाद्रेणदुःखदामता॥ आश्विनीरत्नसिद्धिःस्यात्कार्ति
केज्ञानसिद्धिदा मार्गशीर्षेसर्वावाप्ति पौषेज्ञानवि
नाशिनीमेधावृद्धिकरीमाघेफाल्गुनेसर्ववश्यकृ
त् चैत्रेपीडाप्रदाचैवमलमासंविवर्जयेत्॥ चैत्रे
पीडाप्रदाचैवमलमासान्विवर्जयेत् चैत्रेनगोपाल
विषयं गोतमीतंत्रोत्वात् तथाच मधुमासेभवेद्दी
नाद्रुःखायेत्यादिवचनानामन्यत्रनिषेधः दीक्षाका
लप्रवक्ष्यामिसाधकानांसुखावहं॥ देवीपुराणे शाव
कालेचवैशाखेदीक्षाश्रेष्ठफलप्रदा फाल्गुनेमार्गशी
र्षेचैवज्येष्ठेदीक्षातुमध्यमा अषाढमाघमासेचकनिष्ठा
साप्रकीर्तिता निन्दिताश्रावणेपौषेतथाभाद्रपदेषुच

© Dharmartha Trust J&K. Digitized by eGangotri

निर्मितेषुपिमासेषुदीक्षोक्ताग्रहणेशुभा विषुवेप्य
यनद्वंद्वेसंक्रांत्यांमदनोत्सवे दीक्षाकार्याष्टकालेष्व
पवित्रीगुरुपर्वणि गुरुपर्वाह वसिष्ठसंहितायां
षष्ठीभाद्रपदेमासिइषेकृष्णाचतुर्दशी कार्तिकेनव
मीशुक्लातृतीयामार्गशीर्षके पौषस्यनवमीशुक्ला
माघेचैवचतुर्थिका फाल्गुनीनवमेशुक्लाचैत्रीकाम
त्रयोदशी वैशाखेचतृतीयाचैवज्येष्ठेदशाहरातथा आ
षाढेपंचमीशुक्लाश्रावणीकृष्णपंचमी एतानिगु
रुपर्वाणितीर्थान्याहुर्मनीषिणः मंत्रमुक्तावल्यां ॥
शुक्लपक्षेप्रकुर्वीतकृष्णेवादेशिकोत्तमः शुक्लेसर्वस
मृद्धिःस्यात्कृष्णेवादेशिकोत्तमः शुक्लपक्षेमध्यमतो
भवेत् राजमार्तंडेये गुर्वर्कभार्गवाशुद्धेदीक्षाद्धारि
कारिणी शुभेक्षिशुभलग्नेचदीक्षैश्वर्यप्रदायिनी रु
द्रयामले शुक्लपक्षेशुभादीक्षाकृष्णेवापंचमाद्दिना
त् क्षीणेन्दौव्रतदीक्षांचनकुर्यान्मंत्रवित्तमः शारत्का
लेयुगाद्यायांग्रहणेचन्द्रसूर्ययोः आराधनेचतुर्गायाः
कुर्याद्दीक्षांप्रसन्नधीः ब्रह्मवैवर्ते संक्रांत्यांग्रहणादु
ह्रेदीक्षांकुर्यात्सदाबुधः सूर्यग्रहणकालस्यसमानो
नास्तिभूतले अत्रयद्यत्कृतंकर्मअनंतफलदंभवेत्
नवारतिथिमासादिशोधनंसूर्यपर्वणि सूर्यग्रहण

© Dharmartha Trust J&K. Digitized by eGangotri

आ॰
क॰
१८
18

कालेच रविसंक्रमणे तथा अत्र लग्नादिशुद्धिं च न
कुर्यात्संत्र वित्तमः पुष्करस्यमस्तके ॥ ग्रहणे च तथा
तीर्थे नास्ति कालनिश्चयः मत्तीर्थे कवियो ग्रामे दंत
धावनपर्वणि मंत्रदीक्षां प्रकुर्वाणो मासत्वादीन्न शोध
येत ज्येष्ठस्य शुक्लपक्षादश्यां तत्पर्वाभिधीयते चैत्रस्य
शुक्लद्वादश्यां दामनेपरिकीर्तितं शशिदिनकर
योग्रहणे जन्मनिमिष्यस्य मकरसंक्रांत्यां करण
समयो च गुरोर्नेत्रते तद्दीक्षिणायां सोमग्रहे विश्व
संत्रं स्वयंर्णके न चाचरेत अथवान्यप्रकारेणादी
क्षाग्रहणमुत्तमं शिष्यानाद्रयगुरुणं कृपयादी
येत यदा तदा लग्नादिकं किंचिन्न विचार्यं कर्णं च न
सर्वदा वा ग्रहाः सर्वे नक्षत्राणि च राशयः यस्मिन्नह
नि संतुष्टो गुरुस्सर्वे शुभावहाः संतुष्टो हि गुरौ यत्र
संतुष्टः सर्वदेवताः यदैवेच्छा तदा दीक्षा गुरोराज्ञानु
रूपतः नकालनियमस्तत्र न देशनियमस्तथा
गुरुं संतोषयेद्धन्यमात्मस्वयमेव तथा भवेत् ॥
अथ तिथिफलम् ॥ अथ तिथिफलं वक्ष्ये यथा
मेलात्क्रमेण च ॥ प्रतिपत्संस्कृतादीक्षा ज्ञा
न नाशकरी मता द्वितीयायां भवेज्ज्ञानं तृतीया-
यां शुचिर्भवेत चतुर्थ्यां धननाशस्यात् पंचम्यां॥

© Dharmartha Trust J&K. Digitized by eGangotri

बुद्धिवर्धनं षष्ठ्यां ज्ञानक्षयं सप्तम्यां लभते सप्तमीदिने
अष्टम्यां बुद्धिनाशः स्यान्नवम्यां मरणं भवेत् दशम्यां
राजसौख्यं च एकादश्यां शुचि भवेत् द्वादश्यां सर्वसिद्धि
स्त्रयोदश्यां दरिद्रता तिर्यग्योनिश्चतुर्दश्यां किंभिर्मा
सावसानके पञ्चदश्यां धर्मसिद्धिः स्याद्द्वाध्यायं विवर्ज
येत् सन्ध्यागर्जितनिर्घोषभूकम्पोल्कानिपातके त्रि
रात्रं वर्जयेन्मंत्री श्रुत्युक्तानपि वर्जयेत् तथा च वसिष्ठ
संहितायां ॥ द्वादश्यामपि कर्तव्यं त्रयोदश्यामथापि वा
त्रयोदशी विदानेयन्नहिल विषयं तथा द्वादश्यामपि वा
मार्चनवेत्क्रियाश्रुतवचनात् त्रयोदशी चतुर्दशी प्रशस्ता
सर्वकामदेति सनत्कुमारसंहिता श्रुतवचनादिति ।
श्रिंत्य वाराणं च फलं वक्ष्ये सर्वतंत्रानुसारतः रवौ ।
गुरौ तथा सोमे कर्तव्यं बुधशुक्रयोः रविवारे भवेद्धितं ।
सोमे शांतिर्भवेत्किल आयुर्दं गारको हंति तत्र दीक्षां वि
वर्जयेत् बुधे सौन्दर्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ शु
क्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे नक्षत्राणां
फलं वक्ष्ये दीक्षाणां समासतः कृत्तिकादीनां तत्रैव स
दसत्फलमाप्नुयात् तथा च ज्ञानमालायां अश्विनी रोहि
णी स्वाति विशाखा वा हस्तिभेषु च ज्येष्ठोत्तरत्रये चैवं कुर्या
न्मंत्राभिषेचनं रोहिणी श्रवणार्द्रा च धनिष्ठा चोत्तरात्रयं

© Dharmartha Trust J&K. Digitized by eGangotri

पुष्यः शतभिषकचैव दीक्षानक्षत्रमुच्यते ॥ तथा च
सारसंग्रहे ॥ अश्विनी श्रवणार्द्रा स्वा रेवती चोत्तरात्रयं
पुष्यः शतभिषकचैव दीक्षादिषु प्रकीर्तिताः ॥ तथा
च यामले ॥ अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवं
कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् मृगशी
र्षे सुखावाप्तिरार्द्रायां बन्धुनाशने पुनर्वसौ धनाढ्यः
स्यात्पुष्ये शत्रुविनाशनं अश्लेषायां भवेन्मृत्युर्मघायां दुः
खमोचनं सौन्दर्यं पूर्वफल्गुन्यां प्राप्नोत्यत्र न संशयः ज्ञा
नं चोत्तरफल्गुन्यां हस्ते चैव बली भवेत् चित्रायां ज्ञान।
सिद्धिः स्यात्स्वातौ शत्रुविनाशनं। विशाखायां भवेत्सौख्य
मनुराधा च वृद्धिदा ज्येष्ठायां सुतहानिः स्यान्मूलायां की
र्तिवर्धनं पूर्वषाढोत्तराषाढे भवेतां कीर्तिदायके श्र
वणे च भवेद्दुःखी धनिष्ठायां दरिद्रता ॥ बुद्धिः शतभिषा
यां च पूर्वभाद्रा सुखप्रदा सौख्यं चोत्तरभद्रायां रेवत्यां की
र्तिवर्धनं ॥ दीक्षायोगं प्रवक्ष्यामि। रुद्रयामलदेशितं
वृषसिंहे च कन्यायां धनुर्मीनाख्यलग्नके चन्द्रतारा
नुकूले च दद्याद्दीक्षां सदा गुरुः। स्थिरलग्ने विष्णुम
न्त्रे शिवमंत्रे चरे शुभं द्विःस्वभावगतं मंत्रं शक्ति
मंत्रेषु शस्यते निषिद्धमासेषु न तद्दिशोषामृतिभे
दतः षष्ठीं भाद्रपदे इषे तथा कृष्णा चतुर्दशी ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कार्तिकेनवमीशुक्लामार्गेशुक्लातृतीयका पौषेचन
वमीशुक्लामाघेशुक्लचतुर्थिका फाल्गुणेनवमीशु।
क्लाचैत्रेशुक्लचतुर्दशी त्रयोदशीतिवापाठः ॥ वैशा
खेचादितयाचैवज्येष्ठेदशहरातिथिः आषाढेपंचमीशु
क्लाश्रावणेशुक्लपंचमी एतानिदेवपर्वाणितीर्थेको
टिफलंलभेत ॥ मतान्तरंच ॥ चैत्रीत्रयोदशीशुक्लावै
शाखेकादशीसिता ज्येष्ठेचतुर्दशीकृष्णाआषाढे
नागपंचमी श्रावणेकादशीभाद्रेरोहिणीसहिता
ष्टमी अश्विनीचमहापुण्यामहाष्टम्यप्यभीष्टदा का
र्तिकीनवमेशुक्लामार्गशीर्षेतथासिता षष्ठीचतुर्द
शीपौषेमाघेचैकादशीसिता फाल्गुणेचसिताषष्ठी
चेतिकालविनिर्णयः ॥ योगिनीतंत्रे अयनेग्रहणे
चैवविषुवेचन्द्रसूर्ययोः रविसंक्रान्तिदिवसेयुगाद्या
यांस्मरेच्छिवं मन्वंतरास्वसर्वासुमहापूजादिमेतथा
चतुर्थीपंचमेचैवचतुर्दश्यष्टमीतथा तिथयःशुभ
दःप्रोक्ताइत्यादिवचनाचतुर्दश्यष्टमीतिप्राक्तिविष
यम चतुर्थीतिथिर्गणेशवचनं। ततकलौ — क्र
मात निन्दितेष्वपिकालेषुदीक्षाग्रहणेशुभा स्व
र्यग्रहणकालस्यसमानोनास्तिभूतले तत्रयद्यत्कृ
तंसर्वमनन्तफलदंभवेत रविसंक्रमणेचैवसूर्य

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रा॰
क॰
१॰
20

ग्रहणेनया तत्रलग्नादिकंकिंचिन्नविचार्यंकथंच
न॥ एवंचन्द्रग्रहणेपितथा॥ अमावस्यासोमवार
भौमवारीचतुर्दशी सप्तमीरविवारेचसूर्यपर्वशतैः
समाः॥ वाराहीतंत्रे॥ शुक्रोस्तोयदिवाहृद्येगुर्वादित्यो
भवेद्यदि मेषवृश्चिकसिंहेषुतदादोषनविद्यते॥ दी
स्थानंप्रवक्ष्यामिनानातंत्रानुसारतः गोशालायांगु
रोर्गेहेदेवागारेचकानने पुण्यक्षेत्रेतथोद्याने न
दीतीरेचमाश्रमे धात्रीविल्वसमीपेपर्वताग्रेगुहासु
च॥ गंगायोतत्कृतंसर्वंकोटिकोटिगुणंभवेत अथ
भक्ष्यंप्रवक्ष्यामिमंत्रिणांसर्वसिद्धिदं॥ तथावोक्तंशा
रदातिलके॥ भक्ष्येषुहविष्यंशाकादिविहितंचफलेप
यः मूलंसक्तुयवोत्पन्नोभक्ष्याण्येतानिमंत्रिणां॥ त
थावोक्तंसारसंग्रहे॥ दीक्षांकृत्वायदामंत्रीउपवासंस
माचरेत तस्यदेवः सदारुष्टः शापंपतनिमूर्धनि दाता
गृहीतानोपोष्येदुपवासःस्त्रियंभवेत तस्मादत्रेसमश्री
याद्धविष्यान्नपोकरि। कृत्वागमकल्पताठीपलः त
स्मात्कुर्मात्प्रयत्नागमोक्तेनवर्त्मना दीक्षांकुर्युःप्रयत्नेन
साधकाःसिद्धिकांक्षिणः प्रसंगादागमस्यप्रथमालिखि
ते नित्यपूजांविविनिवर्त्यदारुवल्कागामेद्रुमं ततःप्रणामेद्धा
नेमानंदपितनंदपितनंदतथा ततोभिलषितांविद्यामध्यमे
हृदुमनिधौ॥

© Dharmartha Trust J&K. Digitized by eGangotri

यद्ययंसर्वशास्त्रार्थज्ञातेतिवज्रगुरुबुधाः तदालो
कहृयार्थेवज्ञानशास्त्रंसमभ्यसेत नज्ञानेनविना
मुक्तिर्ज्ञानंभक्तिंविनानहि भक्तिस्तुभागवद्भक्तसं
गेनपरिज्ञायते बहूनिज्ञानशास्त्राणिसंतीवहिति
मण्डले यस्ययानिमनोज्ञानितानितानिसमण्डले
यस्ययानिमनोज्ञानितानितानिसमभ्यसेत एकेन
मुनिनाप्रोक्ताःप्रकाराबहुवस्तथा किंसत्यंकिमत
थ्यंवानासत्यविकलानराः तेनागमंज्ञानशास्त्रम।
भ्यसेत्प्रयतः शुचिः आगमेसर्वशास्त्राणिह्याग
मेसर्वदेवताः आगमेसकलंपुण्यमागमेकिंनल
भ्यते आगमेयन्नलभ्येतब्रह्माण्डेतन्नलभ्यते आग
तंशिववक्त्रात्तगतंतगिरिजाश्रवं मलत्रयविनाशा
यतस्मादागमउच्यते शारीरोत्पत्तिजीवेचमायीशा
रीरकार्मणाम ज्ञानंतेनावृतंविद्धिभवबन्धप्रवर्त
कंशारीरोत्पादकोविस्मस्तद्भयाननिकृंतति ज्ञाना
र्थंभक्तियोगस्यतस्मादागममभ्यसेत तस्माद्दीक्षांप्र
कुर्वीतह्यागमोक्तेनवर्त्मना अथदीक्षाविधिंवक्ष्येमं
त्रिणांहितकाम्यया विनातयानलभ्येतसर्वमंत्रफ
लंयतः चतुर्विधासासन्दिष्टाक्रियावत्यादिभेदतः।
क्रियावतीवर्णमयीकलात्मावेदमय्यपि तत्रक्रिया

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
क॰
२१

21

वतीदीक्षावज्ञाननिगद्यते पुनर्वेदमयीयोगगो॰
प्याशिष्यप्रबोधिनी अथकलावतीदीक्षाविधानंचाभि
धीयते ॥ तथाचशारदातिलके ॥ देशिकोविधिव
त्स्नात्वाकृत्वापूर्वाह्णिकीःक्रियाः यायादलेकृतोमो
नीयागार्थंयागमण्डले ततोभूमितलेशुद्धेतुषांगार
विवर्जिते पुण्याहंवाचयित्वात्नमण्डपंरचयेच्छुभे
पंचभिःसप्तभिर्हस्तैर्नवभिर्वामितान्तरं षोडशस्तंभ
संयुक्तंचत्वारस्तेषुमध्यगाः अष्टहस्तसमुच्छ्रायाः सं
स्याप्याद्वादशाभितः पंचहस्तप्रमाणास्तेनिच्छिद्राः
ऋजवःशुभाः तस्यचमांचेनिरवनेन्मदिग्माक्षेत्रवि
तमः तस्यचमांशेतेषांस्तंभानांपंचमांशमित्यर्थः ना
रिकेलदलैर्वंशैःसाधयेत्तत्समंततः द्वारेषुवाणानिस्यः
क्रमात्तोरमोहीकहा स्तंभोच्छ्रायाःस्मृतेस्तषांसमह
स्तैःपृथक्पृथक् तेषांतोरणानांदशांगुलपरिमाणे
नतत्प्रविणारहुरितः ॥ तिर्यक्फलकमानेस्या॰
दितिस्तम्भहयोपरि काष्टस्येतिशेषः ॥ स्तं
भानामर्धमानतःइतिसार्धहस्तत्रयमितिशेषः
॥ शूलानिकल्पयेत्तन्मध्ये तोरणोहस्तमा॰
णतः ॥ दिव्यध्वजानिबध्नीयाल्लोकपाल
समप्रभान ॥ ॥ ० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तथा चोक्तं शारदायाम् इन्द्रमग्निं यमं रक्षो वरुणं
पवनं विधुं पीतो रक्तोऽसितो धूम्रः शुक्लो धूम्रः सि
तावुभौ गौरोऽरुणः क्रमादेते वर्णतः परिकीर्तिताः
कपिशकपिलनीलश्यामलश्वेतधूम्राभमलशुचि-
सितवक्त्रावर्णतो वासवाद्याः क्रमदीपिकायाम् वि
तानदर्भमालाद्यैरलंकुर्वीत मण्डपं तत्त्रिभागमिति
हेरत्निमात्रसमुच्छ्रितं चतुरस्रां ततो वेदिं मण्ड
लाय प्रकल्पयेत् तदुक्तं गौतमीये वेदिं संरचयेन्मंत्री
चतुरस्रां यथाविधि शुक्लमृत्स्ना च या भूमिर्ब्राह्मी
सा परिकीर्तिता कृष्णा भूमिर्भवेच्छूद्रा वत्तथापरि
कीर्तिता ब्राह्मी सर्वार्थसिद्धिः स्यात् क्षत्रिया राज्यदा मता
धनधान्यकरी वैश्या शूद्रा तु निन्दिता मुने प्रागेवदी
क्षा दिवसान्मण्डपं कारयेत् सुधीः चतुर्विंशत्यंगुला
त्म हस्तं तत्र विदो विदुः कर्तुर्दक्षिणहस्तस्य मध्य-
मांगुलपर्वणः मध्यस्य दीर्घमानेन मानांगुलमुदा
हृतं यवानां तण्डुलैरेकमंगुलं चाष्टभिर्भवेत् अदी
वैद्यो जितैर्हस्तैश्चतुर्विंशांगुलैर्भवेत् अष्टभिस्तै
र्यवैर्ज्येष्ठं मध्यमं सप्तभिर्यवैः कनिष्ठं षड्भिरुद्दि
ष्टं हस्तं च मुनिसत्तम सर्वतोभद्रवचनप्रकारमाह
चतुरस्रं चतुष्कोष्ठकोणसूत्रसमन्वितं चतुर्ष्वपि च-

© Dharmartha Trust J&K. Digitized by eGangotri

आ. क. २२

22

कोणेषु कोणसूत्रचतुष्टयं मध्यमध्ये यथा मत्स्याभ
वेयुः पातयेत्तथा पूर्वापरायते द्वे द्वे मंत्री यास्यान्तराय
ते पातयेत्तेषु मत्स्येषु समं सूत्रचतुष्टयं पूर्ववत्कोण
केष्टेषु कोणसूत्राणि पातयेत् यावच्चतुष्टयं मेत्र षट्
पंचाशत्पदान्यपि तावन्तेनैव विधिना तत्र सूत्राणि पा
तयेत् षड्विंशतापदैः मध्ये लिखेत्पद्मं सलक्षणं बहिः
पंक्त्याभवेत्पीठं पंक्तियुग्मन वीथिकाः द्वारं शोभोप-
शोभास्त्राश्रिष्टाभ्यां परिकल्पयेत् शास्त्रोक्तविधिना
मंत्री ततः पद्मं समालिखेत् पद्मदेत्रस्य संत्यज्य द्वादशां
शं बहिः सुधी तन्मध्ये विभजेद्वृत्तैस्त्रिभिः समविभाग
तः आद्यस्य कर्णिकास्थाने केसराणां द्वितीयके तृती
ये तत्र पत्राणां मूलकोशान दलाग्रके बाह्यवृत्तान्तरालस्य
मानेयद्विधिना सुधीः निधाय केसराग्रेषु परितोर्ध्व
निशाकरान् लिखित्वा सन्धिसंस्थाने तत्र सूत्राणि पात-
येत् दलाग्राणां च यत्मानं तन्मानं वृत्तमालिखेत् तदन्त
रालेतन्मध्ये सूत्रस्योभयतः सुधीः आलिखेद्वाह्यवृत्तेन
न दलाग्राणि समं ततः दलमूलेषु युगशः केसराणि
प्रकल्पयेत् एतत्साधारणं प्रोक्तं पंकजं तंत्रवेदिभिः
पदानि त्रीणि पादार्थे पीठकोणेषु मार्जयेत् अव
शिष्टैः पदैर्विद्वान् गात्राणि परिकल्पयेत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पदानिवीथिसंस्थानेमार्जयेत्संत्यभेदततः दिक्षुद्वा
राणिरचयेद्द्विचतुष्कोष्ठकैस्ततः पदैस्त्रिभिरथैकेन
शोभाःस्युर्द्वारपार्श्वयोः उपशोभास्त्वेकेनत्रिभिः
कोष्ठैरनन्तरं अवशिष्टपदैःषड्भिःकोणानांस्यात्प्र
तद्द्वयं रंजयत्पंचभिवर्णैमण्डलंतन्मनोहरम् पीतं
हरिद्राचूर्णंस्यात्सितंतण्डुलसंभवं कुसुम्भचूर्णं
मरुणंकृष्णंदग्धपुलाकजं विल्वादिपत्रकंश्याममि
त्युक्तंवर्णपंचकं अंगुलैकेनविस्तारःसीमारेखाः
सिताःशुभाः कर्णिकांपीतवर्णेनकेसराण्यरुणेनच
शुभ्रवर्णेनपत्राणितत्सन्धीञ्श्यामलेनच रजसारंज
येत्संधीन्वापीतैरक्तकर्णिकाकेसराःपीतरक्ताःसु
रक्तानिदलानिपिसन्धयः कृष्णवर्णास्तुःपीतेना
पिसितेनवा रंजयेत्पीठगात्राणिपादास्तुरक्तप्रभाः
गात्राणितस्यशुभ्राणिवीथिषुचतसृष्वपि आलिविल्व
ल्पलतिकादलपुष्पसमन्विताः वर्णैर्नानाविधैश्चित्राः
सर्वदृष्टिमनोहराः द्वाराणिश्वेतवर्णानिशोभारक्ताः
समीरिताः उपशोभापीतवर्णाःकोणस्यासितभानिः
च तिस्रोरेखाबहिःकार्याः सितरक्ताःसितक्रमात म
ण्डलंसर्वतोभद्रमेतत्साधारणंस्मृतम् शिष्योपिसत्रचा
गत्यशुचिःपूर्वमुपोषितः संकल्पंचततःकुर्यात्त्वत्कि॥

© Dharmartha Trust J&K. Digitized by eGangotri

आ॰
क॰
२३
23

वाचनपूर्वकं पश्चाच्छिष्योगुरुंतत्रत्वृणुयाद्भक्तिसं
युतः शक्त्यागुरुंभूषयेद्देववस्त्रालंकारभूषणैः गोभू
हिरण्यवस्त्राद्यैः कुण्डलादिभिरुज्वलैः अन्यैश्चाभर
णैश्चैवतथावित्तमर्चयन्॥ गुरुंसंपूजयेद्भक्त्याशि
ष्योसौशुभचेतसा दम्भाहंकारमानंचगुरोरग्रेविवर्ज
येत् कृतांजलिपुटोभूत्वाप्रणमेद्गुरुमग्रतः॥ अथा
तोभगवन्परमात्मस्वरूपिन् परमकारुणिकागुरोस
कलपुरुषार्थसाधनमंत्रदीक्षाभिषेकपूर्वकंमांप्रसा
दय इत्युक्त्वाथविंशतिषड्भिन्नयीदक्षिणांगुरोः सह॰
संप्रजपेन्नत्रगायत्रीमात्रयागुरोः वक्ष्यमाणक्रमे॰
णात्रसंस्कुर्यान्मंत्रमुत्तमम् गुरुरितिशेषः॥ संस्कृ
त्यदशांशमंत्रेततः पूजांसमाचरेत् पादौप्रक्षालये॰
त्स्नात्वाततोमण्डपसन्निधिम् आचम्यविधिनामस्यक
सामान्यार्घ्यंविधायच अस्त्रेणपात्रंसंप्रोक्ष्यहृन्मंत्रेणसमर्च
येत् तीर्थमावाहयेद्गंधादीनिक्षिपेत्प्रणवेनतु धेनुमु
द्रांदर्शयेत्तुसामान्यार्घ्यमुदाहृतः द्वारमस्त्राम्बुभिःप्रोक्ष्य
द्वारपूजांसमाचरेत् ऊर्ध्वोदुम्बरकेविघ्नंमहालक्ष्मींसर॰
स्वतीम् ततोदक्षिणशाखायांविघ्नंतत्रैशामम्पतः त
योः पश्चिमेगंगा यमुनेपुण्यवारिभिः देहा॰
ल्यामर्चयेदस्त्रंप्रतिहारमितिक्रमात् ॥ १ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

किंचिद्दक्षिणवामपार्श्वं देहलीं लंघयेद्गुरुः । अंगं संको
चयन्नंतः प्रविशेद्दक्षिणांघ्रिणा । अनन्तरं दैशिकेन्द्रो दि
व्यदृष्ट्यवलोकनात् । दिव्यानुत्सारयेद्विघ्नानन्तरिक्षां
तरिक्षगात् । पार्ष्णिघातैस्त्रिभिर्भौमानिति विघ्नान्निवारये
त् । सिद्धार्थाक्षतसंयुक्तं नाराचास्त्राभिधायुधः । अपस
र्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्ता
रस्ते नश्यन्तु शिवाज्ञया । इत्यनेनास्त्रमन्त्रार्थं मण्डपा
न्तः परिक्षिपेत् । नैरृत्यां दिशि वास्त्वीशं ब्रह्माणं च सम
र्चयेत् । पंचगव्यार्घतोयाभ्यां प्रोक्षयेद्यागमण्डलं । तेनै
व ताडयेद्दर्भैर्धर्मणाभ्यस्त्राणामतनम् । वर्धनागुरुकर्पू
रैर्धूपयेद्देनरं सुधीः । विकिरान्विकिरेत्तत्र सप्तजप्तमाश
रेवना लाजचन्दनसिद्धार्थभस्मदूर्वाङ्कुराक्षताः । वि
किरा इति संदिष्टः सर्वविघ्नौघनाशनाः । विकीर्य विकि
रान्पश्चात्मार्जनं कारयेत्सुधीः । अस्त्रजप्तेन दर्भाणां मु
ष्टिना मालवेत्सुधीः । ईशस्य दिशि वर्धन्या आसनाय प्र
कल्पयेत् । वर्धनी विकिराधिष्ठातृदेवता तस्या आसना
य वर्धनीमीशानकोणे विष्टरोपरि । वर्धना इति यस्याः
प्रसिद्धिः । पुण्याहं वाचयित्वा तद्ब्राह्मणान्परितोष्य च
उक्ते च मण्डले पूर्वे वेदिकायां समालिखेत् । मेरुपृष्ठस
दिक्कन्दः पृथिव्यामतलं मतम् । देवता कूर्मसंस्थानः

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰ क॰ २५

24

मंस्मरेद्दृष्टिपूर्वकं विनियोगो हि मंत्रस्य आसनेन परि
कल्पितः पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता
त्वं च धारय मां देवि पवित्रं कुरु चासनं । इति मंत्रजपमी
ठयाऽस्मु खवाप्युदङ्मुखः स्वस्तिकादिक्रमेणैव कल्प
कायाविशेषतुषः स्थापयेद्दक्षिणभागे पूजाद्रव्याणि
देशिकाः सतामितांबुसंपूर्णं सव्योरुं कुंभं सुशोभितं
प्रक्षालनाय करयोः पृष्टपात्रं निधापयेत् चूतपुष्पालि
तान्दीपान्स्थापयेत्परितः शुभान् दर्पणं चामरं छत्रं तो
लवृंतमनोहरं कृतांजलिपुटो भूत्वा वामदक्षिणपा
र्श्वयोः नत्वा गुरुं गणेशानं भूतशुद्धिं समाचरेत् । या
मले । तथा पुटांजली भूत्वा वामे गुरुत्रयं यजेत् दक्षिणे
च गणेशानं मूर्ध्नि देवं विभावयेत् करशुद्धिं समापाद्य
कुर्यात्तालत्रयं ततः ऊर्ध्वोर्ध्वमस्त्रमंत्रेण दिग्बंधमपि
देशिकः तेन संजनितं तेजो रक्षां कुर्यात्समंततः भू
तशुद्धिं ततः कुर्याद्देशिकः स्थिरमानसः ॥ त
थाचोक्तं शारदातिलके ॥ शोषणादिभूतानां भू
तानां यद्विशोधनम् अहदयब्रह्मसंयोगात् भूतशुद्धि
रियं मतः सुषुम्णावर्त्मनात्मानं परमात्मनि योजयेत्
त्मनि योजयेत् योगयुक्तेन विधिना चिन्मंत्रेण समा
हितः ॥ चिन्मंत्रेण हंस इति मंत्रेण ॥ ० ॥ ० ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कारणोसर्वभूतानांतत्वान्यपिविचिन्तयेत् बीजभा
वेनलीनानिव्युत्क्रमात्परमात्मनि ततःसंशोषयेद्देहं
वायुबीजेनवायुना वह्निबीजेनतेनैवसन्दहेत्सकलं
तनुं विश्लेषयंस्तदादोषानमृतेनामृताम्भसा आपा
दप्लावयेद्देहमापादतलमस्तकं वायुबीजेनयमिति
बीजेन वह्निबीजेरमिति ॥ अमृतेअमृतबीजेवमित्य
र्थः आत्मलीनानितत्वानिस्वस्थानेस्थापयेत्ततः आ॰
त्मानंहृदयांभोजमानयेत्परमात्मनः मनुनाहंसदेव
स्यकुर्यात्न्यासादिकंततः हंसदेवोहंसइतिस्वरूपं॥
ऋषिच्छन्दोदैवतानिन्यसेत्मंत्रस्यमंत्रवित् आत्म
नोमूर्ध्निवदनेहृदयेचतदाक्रमात् ॥ तथाचवृद्धमतस्य
स्के ऋषिन्यासोमूर्ध्निदेशेछन्दस्तुमुखपंकजे देव
ताहृदयेचैवबीजंतुगुह्यदेशके शक्तिंचपादयोश्चैव
सर्वांगेकीलकंन्यसेत् ऋषिस्तुमहेश्वरमुखाज्ज्ञात्वाय:
साक्षात्तपसामनुं संसाधयतिशुद्धात्मासतस्यऋषिरी
रितः गुरुत्वान्मस्तकेचास्यन्यासस्तुपरिकीर्तितः सर्वेषां
मंत्रतत्वानांछादनाच्छन्दउच्यते अक्षरत्वात्पदत्वाच्च
मुखेछन्दःसमीरितं ऋषिच्छन्दोपरिज्ञानान्नमंत्रः
फलभाग्भवेत् दौर्बल्यंयातिमंत्राणांविनियोगमजान
तां ॥ इतिऋष्यादिन्यासावश्यकत्वंसिद्धमितिभावः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
क॰
२५
25

ऋषादीनादमंत्रचूडामणेः उपासकान्महादेवि शृ
णुष्वैकमनाः स्वयं मनुश्चन्द्रः कुवेरश्च मन्मथस्तदन
न्दै लोपामुद्रा मनुनन्दिः शाक्तः स्कन्दः शिवस्तथा
क्रोधभट्टारकाश्चैव पंचमीपरिकीर्तिता दुर्वासश्चापि सो
धृन्योववसिष्ठश्चपराशरः और्वोवह्निर्यमश्चैववैनन्तो
वरुणोपिच वायुविष्णुः स्वयंभूश्चभैरवोगणपस्तथा
अनिरुद्धोभरद्वाजोदक्षिणामूर्तिरेवचवटुकोगणपति
श्चैवलक्ष्मीगंगासरस्वती धात्रीशेषःप्रमत्तश्चउन्मत्तः
कुलभैरवः धात्रीधरित्रीक्षेत्रपालोहनूमांश्चदत्तोगरु
डएवच शुकदेवः प्रह्लादश्चरामोरावणएवच कश्य
पःकौसकुम्भोश्चजमदग्निर्भृगुस्तथा बृहस्पतिर्धंड
श्चैष्टादशात्रयोयुधिष्ठिरः अर्जुनभीमसेनश्चद्रोणाचा
र्योजयद्रथः दुर्योधनस्तथाकुंतीसीताचरुक्मिणी
तथा सत्यभामाद्रौपदीचउर्वशीचतिलोत्तमा पुष्पद
न्तश्चबुद्धश्चबाणः कालोजयद्रथः कैलासउत्तसिन्धु॰
श्चउदधिर्हिमवांस्तथा यदवश्चमहावीरः कल्पवृ॰
क्षास्तसाधकाः महाविद्याप्रसादेनस्वस्वकामसं॰
मन्विताः ॥ महाविद्यासारः ॥ तथामुण्डमालातं
त्रे ॥ कालीतारामहाविद्याषोडशीभुवनेश्वरी भै
रवीछिन्नमस्ता ॥ ॥ ० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

विद्याधूमवतीतथा बगलासिद्धविद्याचमातंगीक
मलात्मिका एतादशमहाविद्यामहादेवीप्रकीर्तिताः
विद्यायमूलमंत्रेणप्राणायामंयथाविधि ॥ प्राणाया
मस्यलक्षणमाहत्रिपुरासारसमुच्चये प्राणोवायुःश
रीरस्थआयामस्तस्यनिग्रहः प्राणायामइतिप्रोक्तो
द्विविधःकथ्यतेहिसः सगर्भोनिगर्भश्च सगर्भोमंत्र
जाप्येननिगर्भोमात्रयाभवेत् अगस्त्यसंहितायांत ।
त्कथितंकुंभकेनैवच मात्रावनलिनीम — संहत्यो
त्पलस्यभेदने दलेदलेचयःकालःसकालोलवसं
ज्ञकः लवैस्त्रुटिस्त्रिंशद्भिःकलात्तावत्रुटिंविदुः क
लाभिस्तावत्कलोज्ञेयास्तावत्काष्ठानिमेषकः स्वांगुलिस्फो
टनस्यमात्राष्टादशाभिस्मृता कालेनयावतास्वीयोह
स्तःस्वंजानुमण्डलेपर्येतिमात्रासातस्याःस्वकीयश्वा ।
सतल्यमा अथवामजानुनीति मात्राच ॥ वामजानुनि
हस्तस्यभ्रमणंयावताभवेत् कालेनमात्रामाज्ञेयामु ।
निभिस्तंत्रपारगैः यामले ॥ प्राणायामंततःकुर्याद्भा
गभवेनसमाहिताः दक्षांगुष्ठेनदक्षेचघ्राणेसंपीड्यमंत्र
वित् इडयापूरयेद्वायुंमात्राषोडशभिःक्रमात् अंगुष्ठा
नामिकाभ्यांचधृत्वानासाद्वयंततः ततस्तुकुंभयेद्वायुं
एकाग्रेणचतुर्गुणैः अनामयातथावामनासांधृत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

श्री· तदक्षिणे द्वात्रिंशद्भिश्चमात्राभिर्वायोश्चरेचनंचरे
क· त् स्वचित्ते मूलचक्रतनिधायाक्षरन्समभ्यसेत् ततोर
२९ चनमार्गेणप्राणवायुंप्रपूरयेत् पुनःषोडशमात्राभिः
26 कुम्भकंचसमाचरेत् ततःषष्ठितमैर्मंत्रीनासापुटोवि
सृज्यच पुनश्चरेचयेद्वायुंद्वात्रिंशन्मात्रयायुतः वा
मेनपावपिबेद्वायुंमात्राभिःषोडशैःक्रमात् नासापु
टौविपीड्यथपूरकस्यचतर्गीणैः रेचयेद्दक्षिणेवायुं
द्वात्रिंशन्मात्रयायुतः वामेनपानंदक्षिणेनरेचनमि
तितत्प्रथमप्राणायामाभिप्रायेणाहृन्यात्तनदसंभ
वति प्राणायामविधिंसम्यकथितंयत्नतोमया॥ अ
धमामध्यमश्चैवप्राणायामस्तथोत्तमः अधमोजन
येत्स्वेदंमकंपोभवतिमध्यमे उत्तमेखचरीसिद्धिःप्राप्न
यान्नात्रसंशयः प्राणायामैःकृतैःशश्वन्नित्यंषोडश
भिःसुधी दिनान्दिनंचयत्पापंतत्सर्वंनश्यतिध्रुवं कनि
ष्ठानामिकांगुष्ठैः यन्नासापुटधारणं प्राणायामस्सविज्ञे
यस्तर्जनीमध्यमेविना प्राणायामेनपापानिनश्यन्त्येवन
संशयः प्राणायामत्रयंकुर्यात्प्रत्यहंमूलमंत्रतः जपादेव
जपान्नेवसाधकःसिद्धिकांक्षयः विदध्यान्मातृकान्यासं
मंत्रन्यासादनंतरं अंगुष्ठादिष्वंगुलीषुन्यसेदंगैः स्वजाति
भिः जातयश्चनमःस्वाहावषट् हुंवौषट् हंकारः॥

© Dharmartha Trust J&K. Digitized by eGangotri

एवंच जातिषट्कमिति प्रोक्तं हृदाद्यंगसंयुतम्
अस्त्रांतं तलयोन्यस्य कुर्यान्नालत्रयादिके दिशास्तै
र्वध्नीयाच्छोटिकाभिः समन्ततः हृदयादिषु विन्य
सेदंगमंत्रान् ततः सुधीः हृदयाय नमः पूर्वं शिरसे
वह्निवल्लभाः। शिखायै वषडित्युक्तं कवचाय हुमी
रितं नेत्रत्रयाय वौषट् स्यादस्त्राय फडिति क्रमात् व
ह्निवल्लभाय स्वाहा षडंगमंत्रानित्युक्त्वा षडंगेषु नियो
जयेत् अंगुष्ठाग्राद्वाग्रनांगुष्ठाद्धृदि शीर्षे शिखा पुनः अ
धोंगुष्ठमुष्ट्या तथा मुष्टिर्धर्मदोर्द्वन्द्वशाखया नेत्रं त
र्जनिमध्यमेस्त्रं तं गं मुष्टियुग्मके निरंगुष्ठतर्जनी
भ्यामंगमुद्राः समीरिताः मुद्राः स्वस्वमुद्राः अन्
क्तषडंगस्य पंचांगानि मनोर्यस्य तत्र नेत्रमनु त्यजेत्
अंगहीनस्य मंत्रस्य स्वेनैवांगानि कल्पयेत् स्वेनैव मू
लमंत्रेणैव तत्तत्कल्पोक्तविधिना व्यापकन्यासमाच
रेत् कल्पयेदात्मनो देहे पीठं धर्मादिभिः क्रमात् अंसो
रुयुग्मयोर्विद्वान् आदक्षिणेशानदेशिकः धर्मं ज्ञानं स
वैराग्यमैश्वर्यं विन्यसेत् क्रमात् धर्मादयः स्मृताः पादाः
पीठगात्राणि चापरे मुखपार्श्वनाभिपार्श्वेष्वधर्मादी
तैरपि प्रवक्तुं नैव शक्यस्व श्रीविद्याषोडशाक्षरी अथात
संप्रवक्ष्यामि वरीयां बीजसंयुतां लक्ष्मी परा मदनवाग्भ
व शक्तियुक्तात्तारं च शक्ति कमला सकलाश्च विद्याः श्री
श्रादिकं च विपरीततया प्रसिद्धं श्रीषोडशाक्षरमिदं ग
मन्त्रप्रसिद्धं लक्ष्मी श्रीं परा ह्रीं मदनाः क्लीं वाग्भवः ऐं श
क्तिः सौः तारः ॐ शक्तिः ह्रीं सकला श्रीं सकलाश्च विद्याः
कएईल ह्रीं हसकहल ह्रीं सकल ह्रीं श्राद्यादिकमिते
सौः ऐं क्लीं ह्रीं श्रीं इति षोडशी भवति योगिनीतन्त्रे श्री
बीजं मायास्मरयोनिलाराः शक्तिश्च माया कमला च वि
द्या श्राद्यादिबीजैश्च विमलोमनोज्ञा श्रीषोडशी यं च
शिवप्रतिष्ठा तथा च रुद्रयामले श्रीमाया मदनो वाणी
परा ताराशिवप्रिया हरिप्रिया त्रिकूटा सा परावाणी म
नोभवः माया लक्ष्मीर्महाविद्या श्रीबीजं षोडशाक्षरी का
मराजलोपामुद्रयोर्विशेषमाह तन्त्रान्तरे मायादिश्च स्मा
दिश्च वाग्भवादिश्च पार्वति परादिश्च स्मरादिश्च पंचधा षो
डशी भवेत् तथा अनयोराद्ये माया श्री कामबीजं काममा
या श्रीबीजं श्री माया कामबीजं ॥

२६३
193

© Dharmartha Trust J&K. Digitized by eGangotri

तदात्रिविधाष्टादशाक्षरी क्लींह्रींने सर्वयोनिलक्ष्मी
तृतीयमिदंभगवताचार्येणाप्युक्तं अतोविशेषः ब्रह्म·
बीजंयदादशधात्रिकूटेहेविद्युल्लभे प्रथमासुन्दरीदेहिद्वितीया
ब्रह्मसुन्दरी शक्तिकूटेमहेशानि अनन्तसुन्दरीमता
पश्चात्षोडशाविद्यामतभेदेनदर्शिता बीजाङ्गंषड्विधं
वक्ष्येषड्बीजाङ्गंचषोडशीम् वाग्मायाकमलाकामतां
तीयमणवादिनी कामराजाख्यविद्यांचलोपामुद्राम
कीलितां षड्विधांषोडशार्णांतामतीकंबीजपूर्विकां
वाक् पेमायाह्रींकमलाश्रींकामः क्लींतांतेयः सौः प्र
णवः नइतिषट् बीजानिप्रत्येकंविद्यादौदद्यात् वैख
रीवाच्यभेदावादशाक्षराणवर्णेन मूकीभूताहि पश्यं
तीमध्यमामध्यमाभवेत् वैखरीमध्यमापश्यंतीपराः
शब्दप्रतिपादकाः तासामप्यगम्याः ब्रह्मविद्यास्वरूपाहि
मुक्तिभुक्तिफलप्रदा एकोच्चारणमात्रेणवाजपेयफलं
लभेत् अश्वमेधसहस्राणिप्रादक्षिण्येभुवस्तथा गं
गादितीर्थयात्राःस्युः सार्धकोटिसमन्विताः कलांना
र्हन्तिदेवेशिनात्रकार्याविचारणा एकोच्चारणमात्रेण
ब्रह्मसाक्षान्नसंशयः षोडशार्णामहाविद्यानप्रका·
श्याकदाचन गोपनीयाचसाविद्यानारीणांयोनिवत्स
दा विनागुरूपदेशेनश्रीविद्यांषोडशाक्षरीं दृष्ट्वापि

अ॰ ज्ञ्यतेयस्तुसभसोयोगिनीगणैः श्रीगुरोःकृपयाल
भ्यासर्वसाम्राज्यदायिनी भुवनत्रयसौभाग्यत्रैलोक्याक
र्षकारिणी सुधानंदिनीवेगश्राहूचातुर्यदायिनी सौ
भाग्यभाग्यसंपन्नाकलपटलदायिनी परंब्रह्मणिलीनत्वं
ददातियथाउन्मे प्रपंचसागरेलीनग्रुहूरेद्वैदमातृकाः
यस्याःसमीलितोनित्यंभुवनानिचतुर्दश अभूवन्सर्वभू
तानितेषांकारणरूपिणी चतुःसागरपर्यंतंकृपालो
कनोभवेत् ब्रह्मांडकोटिजननीमहामोदप्रदायिनी
निःसवंतिमहामेधाविस्तुः लिंगायथाबकू वक्त्रैःप्रकाश
हृहवोविद्यास्तुवरहवस्तथा वाग्भवान्तसमुत्पन्नास्तस्मा॰
द्वाग्भवउच्यते मातृकास्तुतथैवात्रवाग्भवाब्धिःस्मृताःक
मात् अतस्तुवाग्भवंवीजंशद्बब्रह्ममयंविंदुः पालयंति
जगत्सर्वं तदात्रैलोक्यमोहिनी मोहयंतिकामकलाप
त्रैपोत्रविवर्धिनी स्त्रीपुंसत्वभावेसकलंग्रथितंमणिसूत्र
के तदासौभाग्यसंपन्नाब्रह्मस्थाननिवासिनी सौभाग्य
वर्गगहनाविश्वयोनिविनीरिता सात्वासंविन्मयीदेवी
ज्ञानभोगप्रदायिनी षोडशार्णातकथिताश्रीविद्याग्र
द्यरूपिणी नदेयायस्यकस्यापिदेयाप्राणप्रदायिनी इत्ये
वकथितंसर्वंतानार्णवसमीरिता भेदद्वादशसंयुक्तषोड
शीवेदसंख्यकाः ससाध्याधास्तुविद्यारहस्यंश्रीकमोदितम्

© Dharmartha Trust J&K. Digitized by eGangotri

कथयाम्यत्र तत्सर्वं साधकानां सुखावहं काममिंदुस

मायुक्तं चतुर्थस्वरभूषितं नादविन्दुसमायुक्तं ब्रह्मवि

ष्णुमहात्मकं पकान्तरमिदं देवि सुंदर्याः परिकीर्तितं

वामाज्येष्ठात्मयारौद्रीशक्तित्रितयात्मिका ज्ञानेच्छाक्रि

यात्रितयात्मिका कामः ककारः इन्द्रो लकारः चतु

र्थस्वर ईकारः नादोर्धचन्द्रः विन्दुरनुस्वारः तेन क्लीं इति

श्रीत्रिपुरसुंदर्याः पकान्तरबीजो भवति एवंभूतायास्तु

विद्याया वाग्भवे कामराजके शक्तिबीजे च तदन्वयो

ज्ञेयः साधकोत्तमः इदं भुक्तामभुमतीमंते मोक्षमवाप्नुया

त् याया विद्या स्थिता चैव दन्तरेण विवर्जिता सा सा स्यात्

सिद्धिरहिता ज्ञातव्या महतु निश्चयैः पतस्याः श्रुतिमात्रेण

किं न सिद्ध्यति साधकं तेषां नानेकप्रकारमाह आद्यबीजद्व

यं भद्रे विपरीतक्रमेण तु विलिख्य परमेशानि तितनोर्न

निसम्पुटयेत् अन्तर्मुखा वरारोहे कुमारी त्रिपुरेश्वरी प

श्चिन्तु पंचसंख्याकैः बीजैः संपुटितां यजेत् षट्कूटा

परमेशानि विद्येयं षोडशाक्षरी आद्यबीजद्वयं क्रीं श्रीं

इति बीजद्वयं चन्द्रान्तं वरुणान्तं च शाक्रादिमंडितं पृथ

क् वामाक्षिविन्दुनादाढ्यं विद्यादौ योजयेद्विवेः इत्य

भिधानात् विपरीतक्रमं आदौ लक्ष्मीबीजं ततः शा

क्तिबीजमित्यर्थः अन्तर्मुखेति अन्तर्मध्यबीजमिति

© Dharmartha Trust J&K. Digitized by eGangotri

श्र॰

१९५

195

सुरवामाद्येस्मकः कुमारींवाला तस्यामध्यवीजमा
दौदेवंतेनक्लींपैंसौः इतिवीजंभवति तथाच श्रींक्रींक्लीं
पैंसौः इतिक्रमशः पंचवीजानिभवंति एतैः पंचवीजैः
त्रुटितांषट्कूटांलिखेत् त्रुटितक्रममाह प्रथमंव्यस्त
नवालामंत्रेण ततोवीजद्वयेनमंत्रस्वरसात् तत्र्यस्तेन
वालामंत्रेणसंपुटत्वंकात्यकवाक्यतावालात् क्रतिश्च
मामायेनादःपरालक्ष्मीः कुमारिका विद्याव्यस्ताश्रीःपरा
वेति अस्यार्थः माश्री मायाक्रीं तारांऐं पराक्रीं लक्ष्मीः
श्रीं कुमारिका विद्याविषयें क्रमात्कूटत्रयमितिनेचेवि
रोधात् व्यस्तद्वयंचांतमुखादिनोक्रुप्रेण उक्तंच श्रीक्र
मसंहितायां मामायेमदनोयोनि परैनानिमुखेक्रुल
वेदादिर्भुवनेशानीश्रीवीजंचत्रिकूटकं षट्कूटांसंत्रुटी
कुर्यादाद्यैः पंचभिरत्तरैः अस्यार्थः माश्री मायाक्रीं म
दनः क्लीं योनिः ऐं परासौः तथाच श्रीं क्रीं क्लीं पैंसौः इ
तिवीजानि आदौदेयानि वेदादिः ॐ भुवनेशानीक्रीं म
दनः क्लीं योनिः ऐं श्रीवीजंचश्री तथाच ॐक्रींश्रीं इति
वीजत्रयं पंचवीजांतरंत्रिकूटादौदेयंत्रि
कूटकमिति कएईलक्रींहसक
लक्रींसकलक्रीं इतिकूट
त्रयंलिखेत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अनन्तरं पूर्वं पंचबीजानि पुटितक्रमेण देयानि तथा च
श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं हसकलह्रीं स
कलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इति मंत्रो भवति इत्यन्यत्रो
क्तक्रमलाभात् गुरुक्रमोप्येवमेव षट्कोटस्तावत्
तारमायारमानंदेसुंदरीबीजत्रयं च तेनैकवाक्यता
बलात् एवं सुन्दरी त्रिकूटभेदात् षट् त्रिकूटभेदो
द्रष्टव्यः ज्ञानार्णवेपि शिवरूपा शक्तिरूपा महात्रि
पुरसुन्दरी वेदादिमंडिता देवि शिवशक्तिमयी सदा
तद्भेदास्तु सकलाः षट् कूटाः परमेश्वरि इत्युक्तं त
त्र शिवरूपात्भुवनेशानी शक्तिरूपात् लक्ष्मीः तेन
ह्रीं श्रीं इति बीजद्वये मायादिः प्रणवः तेन ह्रीं श्रीं ॐ
इति बीजत्रयं भवति तेनाद्यैः प्रणवाद्यैर्बीजत्रयैः मंडि
तेत्यर्थः एवं च तारपुटिता माया त्रिकूटं चेति व्याख्या
नमपास्तं तंत्रविरोधात् एवं सुंदरी त्रिकूटभेदात् बह
वश्च षोडशीभेदा द्रष्टव्याः त्रिकूटमात्रस्यैव तत्र षट्क
त्वात् दक्षिणामूर्तितन्त्रे द्वितीयस्यादियुग्मं तु विपरी
तं लिखेत्सुधीः बालांचान्तर्मुखं कृत्वा विलिखेत्तदनंत
रं तारमायांततो लक्ष्मीक्रमात्कूटत्रयं लिखेत् बालादि
संपुटं कार्यादि मारव्यां परमेश्वरी द्वितीयस्येति द्वितीय
बीजमादौ कृत्वा श्रीं ह्रीं इति बीजद्वयं लिखेत् तदनं

© Dharmartha Trust J&K. Digitized by eGangotri

श्र॰ ततोबालामंत्रमुखंकृत्वामध्यबीजमादौदत्वालिखेत्
तदनंतरं तारंप्रणवः ॐ मायाह्रीं लक्ष्मीः श्रीं बीजमितिबी
जत्रयंलिखेत् तथा श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं इतिभव
ति तत्कूटत्रयंलिखेत् ततोबालादिसंपुटंकुर्यात् वामा
ख्यां श्रीविद्या तथाच श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईल
ह्रींहसकहलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इतिभवति
एवंचत्वार्याणिवर्णतंत्रान्तरेयोरविरोधः लक्ष्मीःपरामदनयो
नित्रिपुराचशक्तिसारंपराचकमलाप्यथमूलविद्या श
क्त्यादिभिश्चविपरीततयासहितंश्रीमंत्रराजमुदितंपर
देवतायः इत्यादिसंगच्छते इदंवचनंश्रुतिश्च एतदाधे
वाङ्व्यं लक्ष्मीः श्रीं पराह्रींमदनः क्लीं योनिः ऐं शक्ति
सौः तारंॐ पराह्रीं कमलाश्रीं एतेनश्रींह्रींक्लींऐंसौः
ॐह्रींश्रींइतिबीजानिभवति अनन्तरंमूलविद्या कए
ईलह्रींहसकहलह्रींसकलह्रींइति बीजत्रयात्मिका॰
शक्त्यादिभिश्चेति शक्त्यादिबीजैर्विपरीततयाव्यस्तक्र
मेणपुटितांकुर्यात् श्रींह्रींक्लींसौःॐऐंश्रींकएईलह्रीं
हसकलह्रींसकलह्रींसौः ऐंक्लींह्रींश्रींइतिमंत्रोभव
ति क्रमोच ह्रींश्रीं ॐ श्रीं ह्रीं ऐं क्लींसौः क
एईलह्रींहसकहलह्रींसकल ।
ह्रीं सौः ॥

१९८
198

© Dharmartha Trust J&K. Digitized by eGangotri

क्लींऐंश्रींक्रीं इतिमंत्रः पूर्वभेदत्रयेलिखिते ऐंक्रींश्रींय
दिबीजत्रयमध्ये यद्येकंबीजंविधादौदीयते तदात्रिकूटाः
सकलाःषोडशार्णाभवंति तद्यथा ऐंकएईलह्रींहसक
हलह्रींसकलह्रीं १ क्रींकूटत्रयं २ श्रींकूटत्रयंइत्यादि वो
द्धव्यं इतिभेदचतुष्टयं गन्धर्वतन्त्रे लक्ष्मीर्मायाकामदेवो
वाग्देवीप्रणवंतथा मायालक्ष्मीबीजयुग्मंप्रान्तेमूलमन्त्र
त्रयं वालान्तर्नीयंप्रथमंमध्यमंभुवनेश्वरी प्रान्तेविलासि
न्याचोक्ताभंत्रःषोडशकूटवान् लक्ष्मीःश्रीं मायाह्रीं काम
देवःक्लीं वाग्देवी ऐं प्रणवंॐ मायाह्रीं लक्ष्मीबीजयुग्मं
श्रींश्रींप्रान्तेमूलमन्त्रत्रयं सुन्दर्याःकूटत्रयं वालान्तर्नीयंसौ
प्रथमे ऐं मध्यमेक्लीं भुवनेश्वरीह्रीं प्रान्तेविलासिन्याश्रीं
तेन श्रींह्रींक्लींऐं ॐह्रींश्रींश्रींकएईलह्रींहसकहलह्रीं
सकलह्रींसौः ऐंक्लींह्रींश्रीं इतिमंत्रः तंत्रांतरे कामोमाया
रमावालात्रिकूटास्त्रीभगांकुशे कालीकामकलाकूर्चाः
सर्वादौप्रणवःप्रिये कामःक्लीं मायाह्रीं रमाश्रीं वाला
ऐंक्लींसौः सुन्दर्याःकूटत्रयं स्त्रीस्वरूपभगः ऐं अंकुशःक्रों
कालीक्रीं कामकलाईं सर्वादौप्रणवः ॐ तेन ॐक्लीं
ह्रींश्रीं ऐंक्लींसौःकएईलह्रींहसकहलह्रींसकलह्रींस्त्रीं
ऐंक्रोंक्रींईंहूं इतिमंत्रः तंत्रांतरे श्रींमायामदनोवाणीप
रानारंभिविधिया हरिप्रियात्रिकूटासापरावाणीमनोभ

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र· वः मायालक्ष्मीः महाविद्यासा बीजं षोडशापरा स्वरूपं
श्रीं मायाह्रीं मदनःक्लीं वाग्गीऐं परासौः मादङ्गं शिव
प्रियाह्रीं हरिप्रियाश्रीं संदर्पाः कूटत्रयं परासौः वाग्गी
ऐं मनोभवःक्लीं मायाह्रीं लक्ष्मीःश्रीं तेन श्रीं ह्रीं क्लीं ऐं सौः
ॐ ह्रीं श्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं कएईल-
ह्रीं हसकहलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इतिमंत्रः तंत्रांतरे
श्रीं ह्रीं क्लीं ऐं क्लीं सौः ऐं ह्रीं श्रीं ग्रां ह्रीं क्रौं श्रीं ह्रीं क्लीं सौः
तुरीया हसकलह्रीं हसकहलह्रीं सकलह्रीं सौः ऐं क्लीं
ह्रीं श्रीं इतिमंत्रः तंत्रांतरे श्रीं ह्रीं क्लीं ऐं क्लीं सौः ऐं ह्रीं श्रीं
ग्रां ह्रीं क्रौं श्रीं ह्रीं क्लीं सौः तुरीया हसकलह्रीं हसकह-
लह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं कएईलह्रीं हसकह
लह्रीं कएईलह्रीं हसकलह्रीं हकहलह्रीं कहयलह्रीं
हकलसह्रीं कएईलह्रीं कहावलसह्रीं कएईलह्रीं हसक
लह्रीं हकहलह्रीं कहयलह्रीं हसलसह्रीं इतिमंत्रो भवति
वैसव्येकोनविंशार्णाः इत्यादौ पूर्वोक्तपंचबीजानि देयानि
अनन्तरं नवकूटं वैसवी देयी अनन्तरं पूर्वरूपंचबीजा
नि उल्टक्रमेण देयानि तेन श्रीं ह्रीं क्लीं ऐं सौः ॐ
ह्रीं श्रीं हसकलह्रीं हसकहलह्रीं सकलह्रीं कएईल
ह्रीं हसकहलह्रीं सकलह्रीं सौः ऐं क्लीं एतेन प
कोनविंशार्णा भवति ॥

© Dharmartha Trust J&K. Digitized by eGangotri

गौरीसमादशनितरीति आदौ पूर्वोक्तपंचबीजानि देया
नि अनन्तरं सचित्कूटाशांकरी देया तदंतं तंत्रे त्रुटितक्रमे
णां पूर्वदत्तपंचबीजानि देयानि तेन श्रीं ह्रीं क्लीं ऐं सौः
ऐं क्लीं श्रीं हसकहलह्रीं हसकहलह्रीं सकलह्रीं हस
कलहसकहलसकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इति मंत्रः
इत्यागमकल्पलतायां पंचदशः पटलः वक्ष्यामि पंच
मीविद्यां सर्वतंत्रेषु गोपितां यां ज्ञात्वा मंत्रिणो नित्यं भु
क्तिमुक्तिमवाप्नुयुः रुद्रयामलके ग्रंथे शिवेनोक्तं त
त्परा कथयामास ग्रंथे ते पाल्हिवस्य वचसा कियत्
मायैव परमा विद्या पंचकूटात्मिका परा मयापि वं
द्यते नित्यं तत्प्रसादादहं प्रभुः जगतामीश्वरत्वं च सर्वं
तस्यानुकंपया ब्रह्मत्वं ब्रह्मणा प्राप्तं विष्णुत्वं विष्णुना
स्वयं सुरासुरमुनीन्द्रैश्च महत्त्वं तत्प्रसादतः शिवोप
देशतः कर्ता विश्वामित्रो भवन्मुनिः हर्ता च शिवत
ल्पो सौ स्रष्टा च यथा त्वत्तुल्यकः सृष्टिसंहारकारी च वि
श्वे वा भवत्स्वयं अतिगुह्यतरा विद्या ब्रह्मविद्यैव केव
ला सर्वदा मोक्षदा विद्यानिःसीमानन्दरूपिणी
सर्वदानन्दहृदयप्राप्तेनाभावतत्परः जितेन्द्रियो
गुरुभक्तः पंचमीं समुपासयेत् नित्यानन्दस्वरूपेण
केवल्यानन्दमानसः सुखानन्दस्वरूपेण पंचमी

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰ समुपासयेत् वर्णरूपेण सा देवी जगदाधाररूपिणी
ग्रतरात्सर्वमुत्पन्नं जगदेतच्चराचरं नित्यमेकाक्षरं ब्रह्मअत
रं परमं पदं तदेकमक्षरं गुह्यमादिकूटान्तमध्यगं जप्यात्
साधयेत्सर्वं वक्तुं शक्यं न किं फलं तदेव परमं गुह्यं सर्व
सौभाग्यदायकं तदेव पंचकूटस्य पंचतत्वेन पंचमी त
स्योद्धारं प्रवक्ष्यामि यज्ज्ञात्वा च शिवो भवेत् कामं विष्णु
तं शक्तिः माया शाक्तस्ततः परं पश्चाद्देवी महामायावी
जान्ते विनियोजयेत् एवं तु वाग्भवं बीजं कथितं देवदु
र्लभं कामं ककारः विष्णुः अकारस्तत्स्मृतं तथा चोक्तं
ककारादि क्षकारान्ता वर्णास्तु शिवरूपिणः व्यंजन
त्वात्स्वरान्ते तेनोच्चारसहिता यतः उच्चारे स्वरसंभिन्ना
स्वरादेव न संशयः इति तेन वर्णस्योच्चारणीयत्वात्
सस्वरककारमात्रं लभ्यते शक्तिः एकारः माया ईकारः
शाक्तो लकारः महामाया ह्रीं तेन कएईलह्रीं इति पंच
वर्णात्मकं वाग्भवबीजं भवेत् एवं तु वाग्भवं बीजं कथि
तं देवदुर्लभं एतज्ज्ञात्वा महाबीजं वागीश्वर्यप्रदायकं व
क्तुं नाकि मिहोक्तेन जप्तेनापि च बीजकं वागीशस्पर्धते
वाक्यैः सर्वज्ञोऽपि विजायते मूकोऽभवति वागीशो गीर्प
तिर्जायते नरः सर्वेषां रंजनं वाक्यं करोत्येव न संशयः
शिवबीजं समुद्धृत्य शक्तिबीजमनेन तवमू ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तदधः कामवीजं तु भूव्योमानलसंयुतं चतुर्थस्वरसंयु
क्तं विन्दुनादविभूषितं प्रथमं कामराजस्य कूटं त्रैलो-
क्यपूजितं शिववीजं हकारः शक्तिवीजं सकारः काम
वीजं ककारः भूवीजं लकारः व्योम हकारः अनलो
रेफः तद्युक्तः चतुर्थस्वर ईकारस्तद्युक्तः नादोर्धच
न्द्रस्तद्युक्तः तेन ह्रीं इति भवति तेन हसकलह्रीं इति
पंचवर्णात्मकं कामराजवीजत्रयात्मकमाद्यवीजं भवति
मध्यकूटं प्रवक्ष्यामि कामराजस्य मध्यगं अतिगुह्यत
रं वीजं दुर्लभं भुवनत्रये वियद्धंससंयुतं पश्चान्मादनं तद
नंतरं तदधो हंसवीजं तु शाक्रवीजं ततः परं विसुपदं
वह्नियुतं माया विन्दुविभूषितं अर्धेन्दुमस्तकाक्रान्तं
वीजं त्रैलोक्यदुर्लभं मध्यकूटमिदं प्रोक्तं सर्वसौभाग्य
दायकं वियत् हकारः विसुः अकारः तद्युक्तः माद
नं ककारः हंसवीजं हकारः शाक्रवीजं लकारः विसो
पदे हकारः वह्निः रेफः तद्युक्तः माया ईकारः तद्युक्तः
विंदुरनुस्वारः तद्युक्तः अर्धेन्दुरर्धचन्द्रः तद्युक्तः तेन
ह्रीं भवति तेन हकहलह्रीं इति पंचवर्णात्मकं कामरा
जस्य मध्यवीजं भवति तृतीयं तु प्रवक्ष्यामि कामराज
स्य दुर्लभं कामवीजस्य पश्चात्तु शिववीजं नियोजयेत्
तस्याप्यधो भृगुवीजं तु शाक्रवीजं ततः परं वियद्वह्निसमा

ग्रं· हूं चतुर्थस्वरसंयुतं नादबिन्दुसमायुक्तं लक्ष्मीयं कूट
युग्मं कामबीजस्य पश्चात् ककारस्य पश्चात् शिवबीजं
हकारं वायुबीजं यकारः शक्तिबीजं लकारः वियत् ह
कारः वह्निरेफः तद्युक्तः चतुर्थस्वरः ईकारः तद्युक्तः
नादोर्धचंद्रः तद्युक्तः बिन्दुरनुस्वारः तद्युक्तः तेन क्लीं
इति भवति तेन कहयलक्लीं इति पंचवर्णात्मकं काम-
राजलक्ष्मीयबीजं भवति शक्तिकूटं प्रवक्ष्यामि त्रैलो-
क्ये तु सुदुर्लभं यज्ज्ञानात्साधकाः सर्वे लभन्ते भुक्तिमु
क्तिं प्राणबीजं समुद्धृत्य कामबीजं समुद्धरेत् प्राण
बीजं हकारः कामबीजं ककारः इन्द्रबीजं लकारः श
क्तिबीजं सकारः शान्तं हकारः वह्निरेफस्तद्युक्तः च
तुर्थस्वर ईकारः नादोर्धचन्द्रः बिन्दुकलानुस्वारः त
द्युक्तः तेन ह्रीं इति भवति तेन हसकलह्रीं इति पं
चवर्णात्मकं शक्तिबीजं भवति फलं चास्य विशेषेण
साधनं च मनोरमं कथितं च विस्तार्य संक्षेपा
त्कथ्यतेऽधुना एषा विद्या महाविद्या गुह्याद्गुह्यातिसि
द्धिदा भोगदा मोक्षदा विद्या सर्वकार्यार्थसिद्धिदा
वाग्भवं प्रथमं कूटं शक्तिकूटं च पंचमम् ॥ म
ध्यकूटत्रयं देवि कामराजं मनोहरम् कामरा
जं प्रवक्ष्यामि कूटभेदेन तत्त्वतः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञात्वायस्यायेनित्यंमस्ताध्यमपिभूतले सौभाग्यं
प्रथमंस्थानंमहाभोगप्रदायकं द्वितीयंशुभदंकू
टंमहासौभाग्यप्रदायकं तृतीयंसर्वसौभाग्यंसर्वसौ
भाग्यप्रदायकं त्रिकूटात्मकरूपेणकामराजंमहत्स
वं एवंकूटत्रयेणैवविद्यासौभाग्यसुन्दरी एकत्र
पंचकूटेनमहासौभाग्यसुन्दरी पश्चात्पंचकूटेन
नित्यंकूटत्रयात्मिका दुर्लभासर्वलोकेषुमहासौ
भाग्यसुन्दरी एतस्याएवविद्यायामध्यकूटस्यम
ध्यमं मध्यकूटस्यमध्यकूटत्रयस्य जप्त्वानन्दमयो
भूत्वासर्वकाममुपालभेत् इयंसुप्रभावतीनाम्नीवि
द्यात्रैलोक्यदुर्लभा आकर्षणकरीविद्याचित्ताह्ला
दनकारिणी साधकंचप्रवक्ष्यामियस्मादाकर्षणं
भवेत् स्वर्गेमर्त्येचपातालेनारीणांपुरुषस्यच ना
यैवप्रणाविशेषेणभवंतियेनकर्मणा तासामाक
र्षणंचैववक्ष्येतत्प्रथमंशृणु तास्तानार्यःसमायां
ति यायाः सर्वार्थकामदाः दर्शनाद्भ्रमणात्तस्यास्त
त्क्षणात्खेचरोभवेत् शृण्वामधुमतीनाम्नीदेवकन्या
सुदुर्लभा साचाच्छतिचकामार्तालीशर्षंतिप्रकाम
दा देवकन्यासहस्रैस्तुवेष्टिताकामरूपिणी भुनक्ति
साधकैः सार्धंनानाभोगान्सुदुर्लभान् यत्रकुत्रस्वदे

अ
शेवा गतं कामयेत नरः तथैव नीयते सापि साधक
स्य वरांगना पाताले नागकन्यां वा स्वर्गे वा देवकन्य
कां आनीयते यतेशक्तिः साधको यां च वांछति खे
चरी भूचरी वापि स्वल्पसाध्यां च मानुषी डाकिनी
योगिनी चैव आनीयते सदा अथवा निर्मिता
कन्यां मनसा चारुहासिनी अदृष्टपूर्वां युवतिं तत
क्षणं तां समानयेत् यद्यद्वांछयते कामे तत्तत्कामे
प्रयच्छति एवं मधुमती सिद्धिर्विधिना न स्य जायते
विद्यास्व भावती नाम्नी त्रिषु लोकेषु दुर्लभा मन्त्रा
वापि साधकाः अणिमाद्यष्टसिद्धीनां जायते ध्रुवं एषा गं
र्व विद्या च गुह्या चाति दुर्लभा महाभोगकरी वि
द्या महदैश्वर्यदायिनी दृष्टं तं चलयेत्तं च दर्शनाद
र्शनं तथा प्रवेशं परकायस्य कामरूपो भवेद्ध्रुवम्
अंजनं गुटिकादीश्च या या विद्याः सुदुर्लभाः विदि
तं जायते तस्य साधकः खेचरो भवेत् आधीनाः सि
द्धयः सर्वा वश्या भवन्ति देवता जीवन्मुक्तो भवेत्सो
पि कल्पान्तरं भवेद्ध्रुवि त्रैलोक्ये दुर्लभा विद्या पंचमी म
ध्यमध्यगा एषा स्वभावती देवी मुक्तिदा भोगदा परा
शाकले नरदेविद्या या गदितं मदिमामहे एकान्तरेण
कथितं त्वस्य विधेय केवलं पाशालिः सर्वभूतेषु जना
त्रैलोक्य कारिणी सा परमपंचमी विद्या सर्वाधार स्वरूपिणी

© Dharmartha Trust J&K. Digitized by eGangotri

ज्योतीरूपेण सा देवी परतेजः स्वरूपिणी सा एव पं
चमी विद्या आकाशवो धरूपिणी श्वेतं रक्तं हरिद्राभं
कृष्णनीलेन्द्रसन्निभं वर्णानि विविधान्येव तस्याभे·
दानि तत्त्वतः आकृतिः प्रकृतिश्चैव नानारूपाणि तत्त्व
तः तस्याभेदान्यनेकानि तेजांसि च गुणानि च सा ए
व जगत्सर्वं सा एव परमा कला नान्यत्परतरं किंचि
द्विद्यते तद्दृष्टिकृतं पुंसां रूपं स्त्रियो रूपं यस्मान्यत्
पश्यसि मे सर्वं तत्परमं रूपं तस्या एव न संशयः
कान्तिः पुष्टिस्तथा तुष्टिः श्रद्धा लज्जा घृणादयः
महामोहकरी विद्या अस्त्वविद्यैव केवला महाभूत
दिने नक्तं श्मशाने यदि साधकः सहस्रैकप्रमा·
णेन किं न सिद्ध्यति मन्त्यहं योगांगेन लभेन्मुक्तिं·
नानाभोगेन केवलं भुनक्ति विपुलान्भोगान्·
सा नानाविधांस्तथा यद्यच्छ्रेयस्करं लोके भुंक्ते
विपुलं सुखं शून्यागारे विहारे वा यो जपेन्निर्जने
परं आकर्षणं भवेत्तस्य सर्वकामं न तो लभेत्
प्रपद्यमानन हृदयो द्वितीयमुपभोगवान् तती
यमुपभोगेन चतुर्थमुपभोगवान् चतुर्थं प्र
णमं पुण्यं मंत्रसिद्धिकरं परं चतुर्थं तु विशेषे·
ण भोगयेत्कामयेत्सदा चतुर्थदर्शनात्सिद्धि

© Dharmartha Trust J&K. Digitized by eGangotri

श्र॰

२०१

201

श्रवर्षदर्शनात्तुरवं चतुर्थदर्शनाद्धीरः स्नायांल
भतेफलं पंचकूटात्मिकाविद्यासर्वमंत्रेषुगोपिता रु
द्रयामलतंत्रेषु विशेषेण प्रकाशिता इयंगुप्ततरा
विद्यानाख्येया यस्य कस्यचित् विद्याचूडामणिःश्री
क्रासर्वेषामुत्तमोत्तमा जपपूजादिकंचास्याः पश्चाद
स्याम्यशेषतः अथयंत्रं प्रवक्ष्यामि सुंदर्याः सुमनोह
रं यस्यविज्ञानमात्रेण सर्वसिद्धीश्वरो भवेत् नदुक्तं
स्नानार्णवेप्रातरुत्थायदेवेशि गुरुंनत्वास्वनामतः
संध्यास्नानादिकं देवि विधाय मनुवित्तमः ॐकमा
रुणादेहस्तु रक्तवस्त्रादिभूषितः नांबूलपूरितमु
खोधूपामोदसुगंधितः कर्पूरवोदरिस्थांगो रक्ता
भरणभूषितः रक्तपुष्पकृतोमानी रक्तगंधानुलेपन
रक्तामनोपादिष्टास्तुलातारुणगृहेस्थितः सर्वशृं
गारवेशाढ्यास्त्रिपुरीकृतविग्रहः मनःसंकल्पर
क्तोवा साधकः स्थिरमानसः भूप्रदेशोसमेशुद्धेगो
मयेनेपरिलिपिते पुष्पप्रकरसंकीर्णेधूमामोदसुगं
धिते सिन्दूररजसादेवि रजोभिः कुंकुमस्यच श्राले
लिख्यप्रमचक्रं समरोत्सवमनोहरं समत्रिकोणशा
लीकं सश्रीकमतिसुन्दरं तंत्रचूडामणौश्रीक्रमेचश्र
कृत्वासुसमारेखानालिख्यसुसमंसुखं योचंयत्रेश्र
सर्वेलक्ष्यसर्वं हरणमरं यत्रयत्रलिपिनिःदेविनत्रनरार्चयेयदि

© Dharmartha Trust J&K. Digitized by eGangotri

तन्मांसरुधिरैर्गवपारणागतस्य जायते पशोर्वा लोक
नं नस्यात्तथा ज्ञरुप्रयत्नतः यदि देवापशोरग्रे लिखनं
विद्यते क्वचित् समांगतति रेवा शक्रियते नात्र संशयः
पशुरदीतितः अथवा हेमरूप्याभ्यां ताम्रेण वज्रयात
भिः पट्टं विरच्य श्रीखण्डरक्तचन्दनसंभवैः पट्टे संस्था
प्य विलिखेद्यन्त्रं स्वर्णाद्धेमया शिवे रोचनार्धकुंकुमाभ्यां
तु कस्तूरीचंदनादिभिः तद्यथा भूबिंबं षोडशारं पवस्
पत्रकमालिखेत् स्वस्तिचक्रं भवेदाद्यं शक्तिं तत्कथ्यते
शिवे मन्वस्रं दशाकोणं च द्वितीयं दशकोणकं स्थिति
चक्रं सृजनं च विभेदेन यजेत्क्रमात् अष्टकोणं त्रिकोणं
चैवैन्यं संहृतिर्भवेत् उक्तं चक्रानाणेव बिन्दुत्रिको
णं वसारं चक्रमेतद्वरानने मध्यचक्रं विजानीहि दशा
रयुगलं तथा शाक्तयोर्मांकितं देवि बाह्यमध्यगतं भवे
त् एतद्बाह्ये महेशानि वृत्तं पूर्णेन्दुसन्निभं तद्बहिः कुरु
सीनादि वसुपत्रं मनोहरं ततः षोडशपत्रं तु विलि
खेत्सुरवंदिते चतुरस्रं चतुर्द्वारसहितं परमेश्वरि षो
डशाद्दलानन्तरं वृत्तत्रयं ततो रेखात्रयमितिकेचित्
तदुक्तं चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि प्र
भिन्नाभिः शंभोर्नवभिरिति मूलप्रकृतिभिः त्रयश्चत्वा
रिंशद्वसुदलकलाष्ट्रत्रिवलयरेखाभिः सार्धं तव भव

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰ तकोणपरिणता इति अथ रुद्रयामले विन्दुत्रिको
णवसुकोणदशारयुग्मं मन्वस्रनागदलसंगतषोड
शारवृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रराजमुदि
तं परदेवतायाः एवं त्रिरेखेति भूपुरत्रयमेवैकवा
कृतावलात् अत्र तत्रैव बहिरुपक्रमेण गणनामिदं तत
रूपक्रमेणेति फलतेन विशेषः चक्रस्य लिखनेवसेसा
धकानां सुखावहं ईशानादग्निपर्यन्तमृजुलेखं समा
लिखेत् इति वामकेनव योनिलिखनविस्तारः तथा
ईर्वेशानवह्निभ्यां कोणाभ्यां सूत्रं वर्द्धितं पूर्वरेखान्त
विस्तार्य तथा पश्चिमवह्नितः वायुरात्तमकोणाभ्यां
रेखां पाश्चिमगां तथा विस्तार्य योजयेद्द्विसंधिभेद
क्रमेणाद् योन्यग्रगा पूर्वदेशो दक्षिणेनरतः क्रमात्
तथा रेखा वह्निसंस्थे पश्चिमस्यां दिशि क्रमात् कोण
मेकं योजयित्वा दशाकोणं तदा भवेत् तथैव देवदेवे॰
शि हितीयं दशकोणकं ईशानवह्निगे रेखे पूर्वयोन्य
ग्रयोः क्रमात् विस्तार्य योजयेत्पश्चात्पश्चिमस्यां दिशि
क्रमात् वायुरात्तमकोणाग्रे रेखे विस्तार्य सुन्दरि पश्चि
माग्रे तथा देवि योजयेदिन्द्रदिग्गते एकत्र सर्वकोणा
ग्रं चुम्भनीतमनोहरं योजयेद्देवदेवेशि यथा पंक्तिसुकं
भवेत् दशकोणस्य देवेशि दशकोणचतुष्टयम्

© Dharmartha Trust J&K. Digitized by eGangotri

दशकोणान्तरे देवि मध्यरेखाः प्रकाशयेत् हे दक्षिणे वि
भागे तु तथा चोत्तरभागके षट्कोणस्य तथा देवि संधिभे
दक्रमेण तु योनिवह्निच संयोगप्रकारं ज्ञापनेन तथा क
ल्पामध्यगतां रेखां चतुष्टूपां प्रकाशयेत् मन्तुरेवं पंचश
क्त्यग्रे भागयं चतुरग्निकमिति अथायमुपदेशक्रमः प्र
थममग्नीशवारुणगतकोणं त्रिकोणं ततो वायव्य
नैऋतैशगतकोणं त्रिकोणान्तरे ततस्तन्मध्यगताधः
कोणस्योर्ध्वं चाग्नीशकोणगतकोणद्वयं तादृशमेव
त्रिकोणान्तरमिदमष्टकोणं ततो दक्षिणोत्तरायत पूर्वा
परदिगवस्थितचरमरेखाद्वयमुभयतो विस्तार्य षट्
कोणान्तरे कृत्वा ईशानाद्याग्नेयवायुनैऋतकोणस्य को
णचतुष्टयेत्यक्तामध्यास्थितपूर्वापररेखाद्वयं संवर्ध्य च
तुर्दशकोणं लिखेत् एवं नवशक्तिपुटयथा नवरेखाः
संभवन्ति तथा लिखेदित्यलं विस्तरेण अस्मिन्यन्त्रे वास
राणि देयानि तथा चोक्तं भूतभैरवे योऽस्मिन्यन्त्रे महे
शानि केसराणि प्रकल्पयेत् योगिनीसहितास्तस्य हि
सां कुर्वन्ति भैरवाः इति वचनात्तत्र केसराणि मुक्ताभा
प्रथमा रेखा माणिक्यसदृशीपरा चन्द्राभषोडशारं च वज्र
पाभं चाष्टमं दलं कोणं चतुर्दशं भद्रे दाडिमीकुसुमप्रभा
दशारं तन्महेशा भं द्वितीयमोफ्रपुष्पकं पद्मरागप्रभं षा

© Dharmartha Trust J&K. Digitized by eGangotri

२०३
203

अ॰ भूगृहत्रयसमप्रभं त्रिकोणं देवदेवेशि मध्ये देवि समा
श्रितः षोडशारं तथा पद्मं सर्वाशापूरकं भवेत् अष्टपत्रं म
हेशानि सर्वसंक्षोभनं भवेत् चतुर्दशारं देवेशि सर्वसौ
भाग्यदं सदा दशारं तन्महेमाभं चक्रं सर्वार्थसाधकं
द्वितीयं पार्श्वसंस्थं सर्वरक्षाकरं भवेत् अष्टकोणं वरारो
हे सर्वसिद्धिकरं भवेत् त्रिकोणं सर्वसंभूतिकारणं
भूतिदं भवेत् बिन्दुचक्रं महेशानि सर्वानन्दमयं शि
वे सदाशिवमयं चक्रं नायकं परमेश्वरि एवमेतन्म
हाचक्रं महाश्रीत्रिपुरामयं क्षोदनं द्रावणं चैव क्षोभनं
मोहनं तथा आकर्षणं महादेवि जृम्भनं स्तम्भनं तथा
व्याधिदारिद्र्यशमनं तथा दुःखविनाशनं शान्तिपु
ष्टिवश्यारोग्यमंत्रसिद्धिकरं परं भोगदं मोक्षदं चैव दे
वतत्वप्रवर्तनं सर्वरक्षाकरं देवि सर्वानन्दकरं तथा
सर्वकर्मकरं चापि सर्वकार्यार्थसाधनं सर्वावेशकरं दे
वि सर्ववेदकरं तथा सर्वतत्वकरं देवि सर्ववेधकरं त॰
था सर्वतत्वकरं देवि सर्वात्मानिलयं तथा सर्वमंत्रम
यं देवि सर्वयोगीश्वरं मतं सर्वपीठमयं सर्वं सर्वज्ञानम
यं परं सर्ववेदमयं देवि सर्वमयं तथा सर्वतन्त्रमयं चै
व सर्वात्मतमयं तथा सर्वदुःखप्रशमनं सर्वशोक
निवारणं सर्वदौर्भाग्यशमनं सर्वविघ्ननिवारणम्

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वसिद्धिकरंचक्रंसर्वोपद्रवविद्रवकं रौद्राभिचारशम
नंपरमंत्रोच्चमर्दनं परसिद्ध्याकर्षणंचपरराज्याकर्षणंत
था परसैन्यस्तम्भनंचपरज्ञानविमोहनं परवक्त्रस्त॰
म्भकंचशस्त्रस्तम्भकरंपरं महाचमत्कारपरंमहाभक्ति
प्रवर्तकं महावशकरंदेविमहासौभाग्यदायकं महा
प्रभावसंयुक्तंमहापातकनाशनं महाज्वरहरंदेविम
हाविषहरंपरं महामृत्युप्रशमनंमहाभयविनाशनं
महाप्रत्यतोभकरंमहासुखशुभप्रदं महालक्ष्मीमयं
देविमहामंगलदायकं एवमेतस्यचक्रस्यप्रभावंवर्णि
तुंमया नशक्यतेमहादेविकल्पकोटिशतैरपि भू
पुरमाद्यायनवभेदत्वे तद्वत्कामेश्वरतन्त्रे चक्र
स्यनवधातत्वंकथयामितवानघे आदिमंभूपुरेण
स्याद्वितीयंषोडशारकमित्यादिविस्तारः सर्वरोगसन
तेनाश्रेपहृभूर्जोदरेभुवि विनायंत्रेणचोत्पूजादेवताव
प्रसीदति अथश्रीचक्रंदर्शनफलं सम्यक्कृतककृत्य
त्वायत्फलंलभतेनरः तत्फलंलभतेभक्त्याकृत्वाश्रीच
क्रदर्शनं कृत्वाषोडशदानानियत्फलंलभतेनरः तत्फ
लंसमवाप्नोतिकृत्वाश्रीचक्रदर्शनं सार्धत्रिकोटिती
र्थेषुस्नात्वायत्फलमश्नुते तत्फलंलभतेभक्त्याकृत्वाश्री
चक्रदर्शनं अथश्रीचक्रपादोदकमाहात्म्यम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्र॰ गंगा पुष्कर नर्मदा च यमुना गोदावरी गोमती गंगा-
द्वारं गया प्रयाग बदरी वाराणसी सिंधु रेवा सेतु सरस्व-
ती प्रभृति पुण्य स्नानं भो देवेश तीर्थ स्नान सहस्र को-
टि फलदं श्रीचक्रपादोदकं उत्तराशामुखो देवि य-
दा चक्रं समुद्वहेत् उत्तराशा नदा देव पूर्वाशो वनसंश्र-
यः ईशानकोणं देवेशि नदा तेन यमुदीरयेत् पश्चिमा-
भिमुखो देवि यदा चक्रं समुद्वहेत् पश्चिमा नदा ज्ञेया
पूर्वाशो वनसंश्रयः वायुकोणं नदा ज्ञेयमीशानेरा-
तं भवेत् इत्यलं विस्तरेण एवं यंत्रवरं कृत्वा प्रति-
ष्ठामाचरेत् सुधीः यथाकामं कल्पोक्त द्रव्येणायं यंत्रं वि-
लिख्य पद्मस्थादि नामवेष्टनेणो मध्ये संस्थाप्य प्र-
थमं पंचगव्येन प्रक्षाल्य यवगोधूम चूर्णेनोद्वर्तनं
कृत्वा उष्णोदकेन प्रक्षाल्य पुनः पंचामृतेन प्रक्षाल्य
पुनर्गोधूम चूर्णेनोद्वर्तनं कृत्वा उष्णोदकेन प्रक्षाल्य
पुनः गंधोदकेन प्रक्षाल्य यंत्रराजाय विद्महे मययंत्रा-
धीमहि तन्नो यंत्रः प्रचोदयात् इति यंत्रगायत्रीं जपन्
यंत्रदेवतापीठत्वेन यंत्रं ध्यायन् नाम्नादिपात्रे संस्था-
प्य तत्र तद्देवतावाहन पुष्पांजलिं दत्वा यंत्रप्राणान्
संस्थाप्य तत्रेष्टदेवतां षोडशोपचारैः संपूज्य यंत्रं कु-
धाराग्रेणाष्टपुष्पाष्टोत्तरसहस्रं शानेवा जपेत् तत
स्नावेदवकृत्वा संपातान् जैवाभिषिंचेत् ॥

२०४
204

© Dharmartha Trust J&K. Digitized by eGangotri

होमाशक्तौ होमसंख्याद्विगुणं चतुर्गुणं वा जपेत् य
थाशक्ति दक्षिणां दद्यात् संस्कारानन्तरं कनकवस्त्रं
कुर्यात् कनकादिवस्त्रनानन्तरमेव प्रतिष्ठादिकमि·
ति केचित् एवमेव प्रतिष्ठापनं परं तु पंचामृतताले·
नानन्तरं जपगोधूमचूर्णोद्वर्तनानन्तरं उष्णोदकेन स्ना
पनमिति शेषः इत्यागमकल्पलतायां षोडशः पटलः
अथ पूजां प्रवक्ष्यामि सुन्दर्याः सर्वकामदां यां कृत्वा
मुनयः सर्वे परां सिद्धिमवाप्नुयुः तद्यथा ब्राह्मे मुहूर्ते
उत्थाय स्वशिरसि गुरुं ध्यायेत् प्रातःशिरसीत्यादि
इति ध्यात्वा मानसोपचारैराराध्य गुरुमन्त्रं दशधा
जपेत् यथा ऐं क्लीं श्रीं हसखफें हसक्षमलवरयूं स
हक्षमलवरयीं स्हौः ह्सौः अमुकानन्दनाथश्रीअमु
कांबाश्रीपादुकां पूजयामि इति दशवारं जप्त्वा नमस्कु
र्यादनेन अज्ञानतिमिरान्धस्येति पठित्वा गुरुभ्यो नम
इति नमस्कुर्यात् ततो हृत्पद्मे देवीं ध्यात्वा मानसोप
चारैराराध्य मूलविद्यां यथाशक्ति जप्त्वा नमस्कृत्वात्मा
नं तद्रूपं विभाव्यावश्यककार्यं बहिर्गच्छेत् इति प्रातः
कृत्यं ततो मध्याह्नकाले नद्यादौ गत्वा मूलविद्यां प
ठन् स्नानं कृत्वा तिलकुशजलान्यादाय श्रीपरदेवता
र्चनयोग्यतासिद्ध्यर्थं स्नानमहं करिष्ये इति संकल्प

© Dharmartha Trust J&K. Digitized by eGangotri

मूलमुच्चरन् चतुर्हस्तप्रमाणं जलं कृत्वा तत्र क्रोधमिदं
कुशमुद्रया गंगे च यमुने चैवेत्यादिना सवितृमंडलात्
तीर्थमावाह्य त्रिर्निमज्ज्य उत्थाय मूलमंत्रं जपन् कु
म्भमुद्रया श्रीमहात्रिपुरसुंदरीमभिषिंचामि नमः
इति त्रिवारं मूर्ध्नि दत्वाचामेत् यथा प्रथमकूटमुच्चा
र्य आत्मतत्वाय स्वाहा द्वितीयकूटमुच्चार्य विद्यात
त्वाय स्वाहा तृतीयकूटमुच्चार्य शिवतत्वाय स्वाहा
इत्याचम्य यथास्थानानि संस्पृश्य पुनर्निमज्ज्योत्था
य गात्रमार्जनं कृत्वा संध्यां कृत्वा तर्पणं च कृत्वा मूल
मंत्रमुच्चरन् श्रीमहात्रिपुरसुन्दरीं तर्पयामि स्वाहा
इति वारत्रयं संतर्प्य जलादुत्थाय धौते वाससी परि-
धायोपविश्याचम्य मूलविद्यां जपन् कुशाग्रेण वा
रत्रयं मूर्ध्नि जलं दत्वा गायत्रीं जपेत् ततो जपसमा-
प्य रक्तचंदनाक्ततजलकुसुमैः स्वाम्रपात्रमापूर्य त
स्मिन् जले श्रीचक्रं ध्यात्वा हस्ताभ्यां पात्रं गृहीत्वा
जानुस्पृष्टमहीतलः ललाटं स्पृशन् क्रां क्रीं सः ॐ
ह्सामार्तण्डभैरवाय प्रकाशशक्तिसहिताय स्वाहा इति
सूर्यायार्घं दत्वा सूर्याय नमः इति नमस्कुर्यात् ततो हस्त
मध्ये श्रीचक्रं ध्यात्वा बिन्दुपीठे देवीं ध्यात्वा मूलविद्याम
ष्टोत्तरशतं जप्त्वा जपं समाप्य पुनः रक्तचन्दनाक्ततकुसु
मजलैः स्वाम्रपात्रमापूर्य ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मिन्नूज्जले श्रीचक्रं ध्यात्वा पें त्रिपुरादेवी विद्महे क्लीं
कामेश्वरि धीमहि सौः तन्नो शक्तिः प्रचोदयात् इति त्रि
पत् ह्रीं श्रीं श्रीमहात्रिपुरसुन्दरि अर्घं कल्पयामि नम
श्रीरुद्रयामले ततः अंजमसिद्धैः कार्यं यंत्रं तु योगिना
सौवर्णे राजते ताम्रे स्फाटिके वैकमेस्तथा चक्रे यथो
क्तविधिना पूजा देवी न रोत्तमे रिति तथा तंत्रराजे रते
हेम निरूप्यैवाताम्रपट्टादिके क्रमात् कृत्वा चक्रस्य
निर्माणं स्थापयेत् पूजयेदपि लक्ष्मीकान्तियशः पुत्र
रत्नारोग्यादिसिद्धये इत्यादि गणेकी शालायां गंडकी
भवपाषाणे स्वर्णे राजत ताम्रयोरिति दत्तात्रेय मूर्तिसं
हितावचनात् अथ यान्तु विशेषे पूज्यकालसंख्या
विशेषमाह रत्नसागरे यावज्जीवं सुवर्णे स्याद्रूप्ये द्वा
विंशतिः प्रिये ताम्रे द्वादशकं वर्षं तदर्धं भूर्जपत्रके र
ति सारसंग्रहे ताम्रे द्वादशकं वर्षं स्फाटिकादौ तु सर्व
दा तेषां मध्ये स्फाटिके तु सर्वसिद्धिप्रदं भवेत् श्री
चक्रमिति येषाधिकारेण विशेषफलविशेषमाह
रत्नसागरे स्वर्णे रचितं यंत्रं सर्वराजवशंकरं रज
तेन कृतं यंत्रमायुरारोग्यकामदं ताम्रेण रचितं यंत्रं
सर्वैश्वर्यप्रदं मतं यंत्रं हि स्फाटिकं देवि मनोभिलषि
तप्रदं माणिक्यालिखितं यंत्रं रातिदं भुक्तिमुक्तिदम्

© Dharmartha Trust J&K. Digitized by eGangotri

गोमेदरचितंयंत्रं सर्वैश्वर्यप्रदं मतं स्ववामे त्रिकोणमं
डलं कृत्वाधारं तत्र परिस्थाप्य ॐ वह्निमंडलाय दश
कलात्मने नमः इत्याधारं संपूज्य फट् इत्यर्घ्यपात्रं प्रक्षा
ल्य तत्र परिस्थाप्यार्घ्यं ॐ अर्कमंडलाय द्वादशद्वादश
कलात्मने नमः इति पात्रं संपूज्य नमः इति शुद्धजलेनापू
र्यार्घ्यं सोममंडलाय षोडशकलात्मने नमः इति जलं
पूजयन् अस्मिन् जले गंगे च यमुने चैव इत्यादिना अंकुशमुद्रया
तीर्थमावाह्य तत्र प्रणवेन गंधाक्षतानि निक्षिप्य मूलमं
त्रमष्टधा जप्त्वा धेनुमुद्रां च मिलित्वा प्रदर्शयेत् इति सा
मान्य शुद्धार्घ्यपात्रविधिः देव्यै वारत्रयमर्घ्यं दद्यात् त
तो नमस्कृत्य मौनी प्रयोगसंभाषणपराङ्मुखो वाघं
गच्छेत् वा संगत्वा हस्तपादादि प्रक्षाल्य सामान्यार्घ्यं
संस्थाप्यार्घ्यजलेन द्वारं प्रोक्ष्य द्वारदक्षिणे धात्रे नमः वि
धात्रे नमः दक्षिणे गंगायै नमः वामे यमुनायै नमः
द्वारस्योर्ध्वे द्वारश्रियै नमः अधः देहल्यै नमः ततोंगम
कोच्च दक्षिणपादपुरस्सरं गृहं प्रविश्यार्घ्यजलेन प्रो
क्ष्य ॐ वास्तुपुरुषाय नमः ह्रीं श्रीं रक्तद्वादशशक्ति
युक्ताय दीपनाथाय नमः इति संपूज्य इत्यासने रक्त
कंबलाद्यासनमास्तीर्यार्घ्यजलेना
पूज्य ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तद्रूपरिस्वस्तिकादिक्रमेणप्रविशेत् ततः सिद्धा
र्घोत्तममानीयअपसर्पन्तुतेभूता इत्यादिनापठित्वा
अस्त्रायफट् इत्यनेनाक्षतान्विकीर्यपार्ष्णिघातेन
भौमान्विघ्नान् अङ्गुष्ठतर्जनीभ्यामास्फोटेनान्तरिक्ष
गान् वालयासमुद्दंचितवक्त्रं मूर्धदृष्ट्यादिगान् इति
त्रिविधविघ्नानुत्सार्य तदुपरिप्राङ्मुखउदङ्मुखोवा
उपविश्यभावयेत् यथा अमृतोदधिमध्येनवरत्ना
नि मुक्तामानि यत्रयत्राहितानिवै मणिद्वीपकल्प
तरूद्यानेमुक्तामालाघलेकृतंरत्नप्रदीपवलययुक्तं
महामणिमयं चिंतामणिगृहराजंविचिन्त्यतन्मध्ये
महासनेविचिंत्यसिंहासनमध्ये श्रीचक्रराजंभाव
येत् ततः शुद्धभूमितलेसुगन्धिदशादिक प्रोक्षल
पमान्वितेगन्धामोदसुधूपपटीपवहलेसुहासतः
संभृते पट्टेहेममयेवापिरजतेनाम्रेथवादर्प
णेकस्तूरीघुसृणेंदुचन्दनरसैः श्रीचक्रराजंलिखेत् प
वंचक्रमुद्धृत्य यथोक्तपीठेसंस्थाप्यपीठानर्चयेत् ह्रीं
श्रीं अमृताम्बोनिधयेनमः ह्रींश्रींरत्नद्वीपायनमः
ह्रींश्रींनानावृक्षोद्यानायनमः ह्रींश्रींकल्पवाटिका
यैनमः ह्रींश्रींसंतानवाटिकायैनमः ह्रींश्रींहरिच
न्दनवाटिकायैनमः ह्रींश्रींमन्दारवाटिकायैनमः

© Dharmartha Trust J&K. Digitized by eGangotri

प्र ऐंक्लींपारिजातवाटिकायैनमः क्लींश्रींकदंबवाटिकायैनमः क्लींश्रींपुष्परागरत्नप्राकारायनमः क्लींश्रीं
२७
पद्मरागरत्नप्राकारायनमः क्लींश्रींगोमेदरत्नप्राकारायनमः क्लींश्रींवज्ररत्नप्राकारायनमः क्लींश्रींवैडूर्यरत्नप्राकारायनमः क्लींश्रींइन्द्रनीलप्राकारायनमः
२०७
क्लींश्रींमुक्तारत्नप्राकारायनमः क्लींश्रींमरकतरत्नप्राकारायनमः क्लींश्रींविद्रुमरत्नप्राकारायनमः
क्लींश्रींमाणिक्यमंडपायनमः क्लींश्रींसहस्रस्तंभमंडपायनमः क्लींश्रींअमृतवापिकायैनमः क्लींश्रींआनंदवापिकायैनमः क्लींश्रींविमर्शवापिकायैनमः क्लींश्रींबालातपोद्गारायनमः क्लींश्रींचन्द्रिकोद्गाराय॰
क्लींश्रींमहाशृंगारायपरिखायैनमः क्लींश्रींमहापद्माटव्यैनमः क्लींश्रींचिन्तामणिगृहराजायनमः
क्लींश्रींपूर्वाम्नायमयपूर्वद्वारायनमः क्लींश्रींदक्षिणाम्नाय मयदक्षिणद्वारायनमः क्लींश्रींपश्चिमाम्नाय मयपश्चिमद्वारायनमः ॥
क्लीं श्रीं उत्तराम्नायमयोत्तरायनमः ॥ क्लीं श्रीं रत्नप्रदीपवलयायनमः क्लीं श्रीं महासिंहासनाय नमः ॥ सिंहासनस्यपादचतुष्टये ॥ अग्निकोणे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रींश्रींब्रह्ममयैकमंचपादायनमः नैरृते ह्रींश्रींवि
ष्णुमयैकपंचपादायनमः वायौ ह्रींश्रींरुद्रमयैकपं
चपादायनमः वायौ ह्रींश्रीं रुद्रमयैकपंचपादाय
नमः ईशाने ह्रींश्रींईश्वरमयैकपंचपादायनमः म
ध्ये ह्रींश्रींसदाशिवमयंपंचहूलकायनमः ह्रींश्रींहं
सतल्पतूलतलिलायनमः ह्रींश्रींकौसुम्भास्तरणा
यनमः ह्रींश्रींमहावितानिकायैनमः ह्रींश्रींमहाज
यमवनिकायैनमः स्यौः ब्रह्मविष्णुरुद्रेश्वरसदाशिव
महाप्रेतासनायनमः संगोपांगायनमः इतिचतु
श्चत्वारिंशोपशतीदमंत्रैः तदखिलं विभाव्याचर्यित्वा
मूलविद्यामुच्चरन् श्रीचक्रराजायनमः इतिसंपू
ज्यमूलविद्याकूटैः वाग्भवकामराजशक्तिकूटत्रयेदेव्य
ग्रदक्षिणवामकोणेषु पूजयेत् यथा अग्निकोणे
प्रथमकूटमुच्चार्यवाग्भवायनम इति पूजयेत् दक्षि
णकोणे द्वितीयकूटमुच्चार्यकामराजायनमः वाम
कोणेतृतीयकूटमुच्चार्यशक्तयेनमः इतिपूजयेत्
ततोद्रुतमुद्रिं कुर्यात् स्वांके ज्ञानोदस्तोकृत्वासोहं
मितिमन्त्रेण प्रदीपकलिकाकारं हृदयस्थंजीवात्मानं
मूलाधारस्थकुंडलिन्या सहसहस्रदलकमलकर्णि
कान्तर्गतेनपरमात्मनिलीनंविचिन्त्य पादतोजानु

आ

पर्यन्तं चतुरश्रमवक्रकं लंयुतं पीतवर्णं च भुवः
स्थानं विचिन्तयेत् जानोरानाभि चन्द्रार्धनिभं पद्मेन
लाञ्छितं शुक्लवर्णं स्वबीजेनाञ्जितं ध्यायेदपां स्थले
नाभितः कण्ठपर्यन्तं मं त्रिकोणं सरक्तकं सस्वस्ति
कं स्वबीजेन युतं वह्नेस्तु मंडलं कण्ठभ्रूमध्यपर्यन्त
कृष्णं वायोस्तु मंडलं षट्कोणं बिन्दुभिः षड्भिर्यु
तं बीजेन चिन्तयेत् भ्रूमध्याद्ब्रह्मरन्ध्रान्तं वर्तुलं ध्वज
लाञ्छितं धूम्रवर्णं स्वबीजेन युक्तं ध्यायेन्नभस्स्थलं
पृथिव्या लं बीजं जलस्य वं बीजं अग्नेः रं बीजं वायो
यं बीजं आकाशस्य हं बीजं एवं ध्यात्वा ततस्तानि
भूतानि प्रविलापयेत् पृथ्वीमप्सु च ता वह्नौ वह्निं वा
यौ समीरणं प्रविलाप्य तदाकाशे आकाशं प्रकृतौ
ततः अपरं ब्रह्मरूपायां मायायां शक्तिं परात्मनि इति
समस्तदेहादिप्रपंचं परमात्मनि प्रविलाप्य पुरु
षाकारभाक् अनादिभवसंचितब्रह्महत्याशिरस्कं
चेत्यादि पापपुरुषं वामकुक्षौ विचिन्त्य तत — डा
वक्त्रे वामेन लि धूम्रवर्णं यमिति वायुबीजम्
षोडशवारं जपन् वामनासापुटेन वायुं देह
मापूर्य पुनर्यमिति चतुःषष्टिवारं
जपन् कुम्भकं कुर्वन् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

देहं संशोध्य पुनर्येमिति द्वात्रिंशद्वारं जपन् दक्षिणना
सापुटेन वायुं रेचयेत् ततो रूपेण वायुनाम स्वेदेन रश्मि
तिवह्निबीजेन षोडशवारं जपेन दक्षनासापुटेन देहमा
पूर्य च तच्चतुःषष्टिवारं जपेन कुम्भकं कुर्वन् तद्भस्मीभूतमि
ति विचिन्त्य रमिति द्वात्रिंशद्वारं जपन् वामनासया भ
स्म नासह वायुं रेचयेत् ततः ठं इति चन्द्रबीजं षोडशप्र
ध्यात्मकं वामनासापुटेन पूरकात्मकं ललाटचन्द्रं षो
डशवारं जपन्नयेत् ततो वमिति चतुःषष्टिं निपात्य
वारं जपन् ललाटचंद्राद्गलितामृतरसमयीं दृष्टिं नि
पात्य तया देवोपासनयोग्यं सकलं वपुः कुर्वन् लमिति
द्वात्रिंशद्वारं जपन् दक्षिणनासापुटेन वायुं रेचयेत्
पुनरुत्पन्ने देहे पवित्रे परमात्मनः परब्रह्मात्मिका
मायामातृका प्रकृतिः परा अजायत जगन्मातरा का
शं नभसोऽनिलः समीरणाद्दहनो वह्नेः आपस्ततो
मही सोऽयमेभ्यो पिण्डरूपेभ्यस्तेजोरूपकलेवरं देवतारा
धनेयोग्यमुत्पन्नमिति भावयेत् तस्मिन्देहे परात्मा
यं सर्वज्ञः सर्वशक्तिमान् समस्तदेवतारूपः सर्वमंत्र
मयः प्रभुः आत्मरूपेण देहे स्वे जीवभावेन तिष्ठति
इत्येव भावना मुख्याभूतशुद्धिरिहोदिता नासापुटो-
च्छ्वासः वायुमवधूय ॥ हंसः सोऽहमवतरवतरशिवप

दाज्जीवशिवं सुषुम्णापथेन प्रविश्य मूलशृङ्गाटमुल्ल
स उल्लस ज्वल २ प्रज्वल २ हंसः सोहं स्वाहा ततः पृथि
व्यादीनि तत्वानि यथास्थाने स्थापयित्वा हृत्पद्मे दे
वीं समानीय स्वहृदि हस्तं दत्वा आं ह्रीं क्रों यं रं लं वं शं षं
सं हं लं क्षं हं हंसः मम प्राणा इह प्राणाः एवं पुनः जी
वाति १९ मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रघ्रा
णप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा अथ
वा आं ह्रीं क्रों हंसः इति मंत्रेण वा रणीवं न्यसेत् प
तत्करणाशक्तानामेतत्पाठेनैव भूतशुद्धिः स्यादिति
इति भूतशुद्धिः अथ ऋष्यादिन्यासः अस्य मन्त्रस्य द
क्षिणामूर्तिऋषिः अनुष्टुप्छन्दः श्रीमहात्रिपुर
सुन्दरी देवता चतुर्वर्गफलसिद्ध्यर्थे विनियोगः
शिरसि दक्षिणामूर्तये ऋषये नमः मुखे पंक्ति
छन्दसे नमः हृदि परदेवतायै नमः ॥
ततः कृताञ्जलिः ॥ मम चतुर्वर्गफलसिद्ध्य
र्थे विनियोगः शरीराकारभूतानां भूतानां यद्वि
शोधनं अव्ययब्रह्मसंयोगाद्भूतशुद्धिरियं मता ॥
ततः प्राणायामं कुर्यात् प्राणायामं तु मूलेन कुर्यात् त्रि
र्विचक्षणः अथवा वक्तया कुर्याच्छ्रीविद्याप्राणसं
यमम् इति तथा मूलमन्त्रं षोडशवारं जपन् ॥

209

© Dharmartha Trust J&K. Digitized by eGangotri

वामनासापुटेनवायुनादेहमापूर्य पुनस्तदेवचतुःष
ष्टिवारंजपन् कुम्भकंकुर्वन् पुनस्तदेवद्वात्रिंशद्वारंजप
न् दक्षनासापुटेनवायुंरेचयेत् इत्येकःप्राणायामः
एवंयथाशक्तिप्राणायामंकुर्यात् तदुक्तंवसिष्ठसंहि
तायां प्राणायामैःकृतैस्तस्मान्नित्यंषोडशभिःसुधीः
दैनन्दिनंचयत्पापंतत्सर्वंनश्यतिध्रुवं परोपतापनं
पापंपरद्रव्यापहारजं परस्त्रीमैथुनोत्पन्नंप्राणायाम
शतेनदहेत् महापातकजातानिब्रह्महत्याशतानिच
सर्वाण्यपिप्रणश्यन्तिप्राणायामैस्ततःशतैः प्रादाव
नेवयत्नेनप्राणायामान्समाचरेत् कर्मस्वपिसमस्ते
षुशुभेषुवाशुभेषुच प्राणायामैर्विनायत्कृतंतत्क
र्मनिरर्थकं ततोयत्नेनकर्तव्याः प्राणायामाःशुभा
र्थिभिः अथमातृकान्यासः वाग्भवः पंक्तितारा पंक्ती
श्रींश्रीस्वरूपं ।। श्रीविद्याक्रमपूजायांपिशेषाह्वीरवदि
ते वाग्भवायावाक्प्रदामातृकायाबालकामदा श्रीवी
जायामहैश्वर्यदायिनीमातृकास्मृता श्रींअंनमोल
लाटे श्रींआंनमोमुखवृत्ते श्रींइंनमोदक्षचक्षुषिश्रीं
ईंनमोवामचक्षुषि श्रींउंनमोदक्षकर्णे श्रींऊंनमो
वामकर्णे श्रींऋंनमोदक्षनासायां श्रींॠंनमोवाम
नासायां श्रींऌंनमोदक्षगण्डे श्रींॡंनमोवामगण्डे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

२१०

210

श्रीं ओं नमो ओष्ठे श्रीं औं नमः अधरे श्रीं अं नमः ऊर्ध्व
दन्ते श्रीं अः नमः अधोदन्ते श्रीं अं नमो मूर्ध्नि श्रीं अः न
मो मुखे श्रीं कं नमो दक्षिबाहुमूले श्रीं खं नमो कूर्परे
श्रीं गं नमो मणिबन्धे श्रीं घं नमो ऽङ्गुलिमूले श्रीं ङं न
मो ऽङ्गुल्यग्रे श्रीं चं नमो वामबाहुमूले श्रीं छं नमो
कूर्परे श्रीं जं नमो मणिबंधे श्रीं झं नमो ऽङ्गुलिमूले
श्रीं ञं नमो वामाङ्गुल्यग्रे श्रीं टं नमो दक्षोरुमूले श्रीं ठं
नमो जानुनि श्रीं डं नमो गुल्फे श्रीं ढं नमो दक्षिपादा
ङ्गुलिमूले श्रीं णं नमो दक्षपादाङ्गुल्यग्रे श्रीं तं नमो वामो
रुमूले श्रीं थं नमो वामजानुनि श्रीं दं नमो वामगुल्फे
श्रीं धं नमो वामाङ्गुलिमूले श्रीं नं नमो वामाङ्गुल्यग्रे श्री
पं नमो दक्षपार्श्वे श्रीं फं नमो पार्श्वे श्रीं बं नमः पृष्ठे श्री
भं नमो नाभौ श्रीं मं नमः उदरे श्रीं यं नमः त्वगात्मनि
हृदये श्रीं रं नमः असृगात्मनि दक्षबाहुमूले श्रीं लं नमो
मांसात्मनि ककुदि श्रीं वं नमो मेदआत्मनि वामबाहु
मूले श्रीं शं नमो ऽस्थ्यात्मनि हृदयादिदक्षिणकरे
श्रीं षं नमो मज्जात्मनि हृदयादिवामकरे श्रीं सं नमः
शुक्रात्मनि हृदयादिदक्षिणपादे श्रीं हं नमः प्राणा
त्मनि हृदयादिवामपादे श्रीं ळं नमो जीवात्मनि हृद
यादे श्रीं क्षं नमः परमात्मनि हृदयादिमुखे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रामायै नमः वामपादे कामायै नमः दक्षिणे चार्वङ्ग्यै
नमः जानुनि टंकधारिण्यै दक्षजानुनि तारायै हृदये
पार्वत्यै वामबाहौ यक्षिण्यै दक्षिणबाहौ शारिका
यै नमः कण्ठे इति वैदिकसम्प्रदायेनापि न्यासः ॥
मनसा वा न्यसेन्न्यासान्कुर्यात्तैर्वाथ वा न्यसेत् अंगुष्ठाना
मिकायोगान्न्यसेद्धा सर्वकर्मसु धर्मविद्दक्षिणं हस्तं
मध्योनाभेः नियोजयेत् इति अक्षतमादाय अपसर्प
न्त्विति अक्षतानि क्षिप्य पार्ष्णिघातेनाभौमानं गुष्ठत
र्जनीभ्यामास्फोटेनान्तरिक्षगान् वालयासमुदञ्चितव
क्त्रमनूद्रष्यादिव्यानि निरीक्षयिथविघ्नान्निरस्य ऊर्ध्वोर्ध्व
तालत्रयेदत्वा छोटिकाभिर्दशदिग्बन्धनं कुर्यात् यत इदे
तिमन्त्रेणतालेविघ्नान्भ्यामं नयेत् नाराचमुद्रां सन्दर्श
पंचारइतिमंत्रितां पंचारचक्रेपरिवर्तमानेनास्मिनात्मस्
दित्यादिकृत्वा अथ करन्यासः अंमध्यमाभ्यांनमः ऐं
अनामिकाभ्यांनमः सौ कनिष्ठिकाभ्यांनमः अंअंगुष्ठा
भ्यांनमः सौं करतलपृष्ठाभ्यांनमः अंआंसौः त्रिपुरसुं
दरि विभ्रमस्ताधुजासनाय नमः इतिपादयोः ऐंक्लींसौः
त्रिपुरसुन्दरि पोतासुजासनाय नमः इतिजान्वोः ऐं
क्लींसौः त्रिपुरसुन्दरि देव्यात्मासनाय नमः इत्यूर्वोः ह्रैं ह्रं
क्लीं ह्सौः त्रिपुरसुन्दरि श्रीचक्रासनाय नमः स्फिचि

© Dharmartha Trust J&K. Digitized by eGangotri

श्री० ऐं ह्सैं ह्सक्लीं ह्सौः त्रिपुरसुन्दरि सर्वमन्त्रासनाय नमो
गुह्ये ह्रीं क्लीं ब्लें सिद्धेश्वरि साध्यसिद्धासनाय नमः मू
लाधारे अथ षडंगन्यासः ऐं सर्वज्ञाय हृदयाय नम
इति तर्जनीमध्यमानामिकाभिः हृदये क्लीं नित्यतृप्त
ये शिरसे स्वाहा इति तर्जनीमध्यमाभ्यां शिरसि सौः
अनादिबोधाय शिखायै वषट् इति अधोंगुष्ठमुष्टया
शिखायां ऐं स्वतन्त्राय कवचाय हुं इति व्यत्ययस्ता०
भ्यां स्कन्दाद्यूरुपर्यन्तं क्लीं अलुप्तशक्तये नेत्रत्रयाय वौ
षट् इति तर्जनीमध्यमानामिकाभिः नेत्रत्रये सौः
अलुप्तशक्तये अस्त्राय फट् इति तालत्रयं दत्वा दिग्ब
न्धनं कुर्यात् ततो मूलमन्त्रन्यासं कुर्यात् अथ मंप
चदशीमन्त्रन्यासः मूर्ध्नि मूले हृदि दक्षिणचक्षुषि वाम
चक्षुषि ललाटचक्षुषि दक्षकर्णे वामकर्णे मुखे द
क्षभुजे वामभुजे पृष्ठे दक्षजानुनि वामजानुनि नाभौ
पञ्चदशाक्षरस्थाने क्रमात् न्यसेत् चतुःशत्या
समग्राणां चिन्तयेद् हृदि धा ब्रह्मरन्ध्रे रुणप्रभां द्रवत्
सुधा षोडशार्णा महासौभाग्यदां स्मरेत् उवाच तं त्रा
न्ते ललाटगलहृन्नाभिमूलाधारेषु च क्रमात्
ब्रह्मरन्ध्रे मुखे मुद्रे बीजत्रयमपि
न्यसेत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

आधारे हृदये ब्रह्मरन्ध्रे बीजत्रयं न्यसेत् करपादेषु हृद
ये पंच बीजानि च न्यसेत् ऋष्यादिन्यासं ततः कुर्यात्सर्वसिद्धि
प्रदायकं ब्रह्मरन्ध्रालिके नेत्रश्रुतिघ्राणेषु गण्डयोः
दन्तान्तरोर्ध्वके देवि जिह्वायां चैव वक्त्रपृष्ठे सर्वाङ्गे हृद
यस्तनकुक्षिषु लिंगके श्रीविद्यायोगः न्यसेद्देवि मन्त्रे
सर्वसमृद्धये सर्वांगे विन्यसेत्सम्यग्व्यापकत्वेन सुन्दरी
अलिके ललाटदेशे नेत्रादावेकैकवर्णन्यासः दन्तेति
अधनपरिदन्तपंक्त्योरिय वर्णन्यासः श्रीविद्यायाः षो
ढान्यासो न्यासा हि स्वशरीरं भवेत् अथ वशिनीन्यासः
वशिन्याद्यष्टकन्यासं कथयामि सुविस्मिते यत्प्रसादा
द्देहं वश्यो भवेयं साधकस्य च शिरसि ऐं ह्रीं श्रीं अं आं इं
ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः रब्लूं वशिनीवाग्दे
वतायै नमः ललाटे ऐं ह्रीं श्रीं कं खं गं घं ङं क्लीं कामेश्वरी
वाग्देवतायै नमः भ्रूमध्ये ऐं ह्रीं श्रीं चं ५ न्व्लीं मोदिनी वा
ग्देवतायै नमः कण्ठे ऐं ह्रीं श्रीं टं ५ ब्लूं विमला वाग्देवता
यै नमः हृदये ऐं ह्रीं श्रीं तं ५ ज्म्रीं अरुणा वाग्देवतायै नम
नाभौ ऐं ह्रीं श्रीं पं ५ ह्सल्व्यूं जयिनी वाग्देवतायै नमः
मूलाधारे ऐं ह्रीं श्रीं यं ५ झ्मर्यं सर्वेश्वरी वाग्देवतायै न०
मूलादिपादान्तं ऐं ह्रीं श्रीं शं ५ क्ष्म्रीं कौलिनी वाग्दे
वतायै नमः पीठन्यासं ततः कुर्याद्यथाबीजं यथाविधि

श्रा॰ यत्कृत्वा साधकः श्रेष्ठो देवीपुत्रो भवेद्भुवि मूलाधारे वाग्भ
वमुच्चार्य अग्निचक्रे कामगरुडालयसिद्धौघनाथात्मि
केरुद्रात्मशक्तिः कामेश्वरी श्रीपादुकां पूजयामि हृ
दये कामराजमुच्चार्य सूर्यचक्रे जालन्धरपीठे ष॰
ष्ठौघनाथात्मिके विष्णवात्मशक्तिः श्रीपादुकां पूज
यामि भ्रूमध्ये शक्तिकूटमुच्चार्य सोमचक्रे पूर्णगिरि
गह्वरे नट्टौघनाथात्मिके भगमालिनी देवी ब्रह्मात्म
शक्तिः श्रीपादुकां पूजयामि ब्रह्मरन्ध्रे तुरीयबीज
मुच्चार्य परब्रह्मचक्रे लड्डीयानपीठे चार्यनाथात्मिके
परब्रह्मात्मशक्तिः श्रीमहात्रिपुरसुन्दरी श्रीपादुकां
पूजयामि तत्वन्यासं प्रवक्ष्यामि सर्वांगशुद्धिकारकं
यत्कृत्वा सर्वपापेभ्यो मुच्यते साधकः सुधीः मूलाधा
रादिपादपर्यन्तं वाग्भवमुच्चार्य आत्मतत्वव्यापिकायै श्री
महात्रिपुरसुन्दर्यै नमः हृदयादि हृदयान्तं शक्तिकू
टमुच्चार्य शिवतत्वव्यापिकायै श्रीमहात्रिपुरसुन्दर्यै
नमः समस्तविद्यामुच्चार्य सर्वतत्वव्यापिकायै श्री
महात्रिपुरसुन्दर्यै नमः इति मूर्धादिपादान्तं पुनर॰
पि समस्तविद्यामुच्चार्य सर्वतत्वव्यापि
कायै श्रीमहात्रिपुरसुन्दर्यै
नमः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

इतिपादादिमूर्धान्तं पुनपितरीयबीजमुच्चार्य सर्व
तत्त्वव्यापिकायै श्रीमहात्रिपुरसुन्दर्यै नमः इति हृदया
दि भ्रूमध्यान्तं न्यसेत् इति तत्त्वन्यासः पूजायां षोढा
न्यासादीनां प्रनावेशपकत्वाद्गौरवादिह न लिखितं ॥
तदुक्तं वामकेश्वरतन्त्रे षोढान्यासं समारभ्य मूलदेव्या
दिकं तथा करशुद्ध्यादिकं चैव साधकेन स्वसिद्धये प्रा
तःकालेऽथवा रात्रौ पूजायां होमकर्मणि जपकालेऽथ
वा तेषां विनियोगः पृथक्पृथक् पूजाकाले समस्तं
वा कृत्वा साधकसत्तमः षट्त्रिंशत्तत्त्वपर्यन्तं प्रासनं
परिकल्पयेत् ततः कुलन्यासः मूलाधारात्कुण्डलि
नीं परमानन्दस्वरूपां आत्मना सह [illegible] विभाव्य मूला
धारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञानादन्ता
दान्तशक्तिव्यापिकामनमनोन्मनाभेदक्रमेण विन्दु
स्थानं प्रापयित्वा तां निर्गतामस्तधारया मन्त्रार्णं पुनः
तेनैव वर्त्मना हृत्पद्मे समानीय ध्यायेत् यथा बालार्क
मण्डलाभासं चतुर्बाहुं त्रिलोचनां पाशांकुशशरा
श्चापं धारयन्तीं शिवां श्रये इति ध्यात्वा मानसोपचारै
राराध्य श्रीमहात्रिपुरसुन्दर्यै नमः इति नमस्कृत्य बा
ह्यपूजार्थं अर्घ्यपात्रं स्थापयेत् तत्रादौ कलशस्था
पनं वामभागे हृत्त चतुरस्रमण्डलं कृत्वा तन्मध्ये ऽलम्

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰

२१३

213

लपुष्परत्नं चतुरस्रमंडलायनम इति पुष्पैरभ्यर्च्य त
परिश्राधारं संस्थाप्य अंसूर्यमंडलायनपिन्मादिद्वाद
शकलात्मनेनम इति ॐ भसे पूज्य मूलमन्त्रं पठन् जले
नार्घ्यं ॐ सोमंडलाय षोडशकलात्मनेनम तस्मिंजले
हसतमलवर्यूं आनन्दभैरवाय वषट् नमः सहतम
लवरयीं आनन्दभैरव्यै वौषट् नम इति सम्पूज्य सामा
मार्घं स्थापयेत् यथा स्ववामे त्रिकोणचतुरस्रमंडलं कृ
त्वा तन्मण्डले मूलमन्त्रेण त्रिकोणचतुरस्रमंडलाय
नमइति पुष्पैरभ्यर्च्य तत्र परिश्राधारं संस्थाप्याधारे
संवह्निमण्डलायनमइति सम्पूज्य तत्रशंखादिपा
त्रं संस्थाप्य अंसूर्यमंडलायद्वादशकलात्मनेनमइ
ति सम्पूज्य मूलं जपन् शुद्धजलं दत्वार्घ्यं सोममंडला
यषोडशकलात्मनेनमइति जलं सम्पूज्य तज्जलं षड
ङ्गेनाभ्यर्च्य मूलविद्यां जप्त्वा गन्धपुष्पाक्षतान्निक्षिपेत्
इति सामान्यार्घं संस्थाप्य विशेषार्घं स्थापयेत् तद्यथा
आत्मश्रीचक्रयोर्मध्ये त्रिकोणवृत्तषट्कोणचतुर
स्रमंडलं कृत्वा मूलमन्त्रेण त्रिकोणवृत्तषट्कोणच
तुरस्रमंडलायनम इति पुष्पैरभ्यर्च्य विद्यावीजत्रये॰
ण यद्दलवामकोणे पूजयेत् अग्रकोणे अग्रमक्ष
हसुआर्यं वाग्भवायनमः इति णकोणे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द्वितीयकूटसर्वार्थकामप्रदायनमः वामकोणेतृतीय
कूटसर्वार्थशक्तयेनमः इतिसंपूज्य पुनःषडंगेनष
ट्कोणंपूजयेत् अग्रकोणादारभ्यदेव्यादक्षिणक्रमे
णपूजयेत् यथा अग्रेकोणे ऐंहृदयायनमः अग्नि
कोणेक्लींशिरसेस्वाहा नैरृतकोणेसौःशिखायैवष
ट् पश्चिमकोणे ऐंकवचायहुं वायुकोणेक्लींनेत्र
त्रयायवौषट् ईशानकोणेसौःअस्त्रायफट् इतिषट्
कोणंसंपूज्य तदुपरिआधारंसंस्थाप्य ऐंवह्निमंडला
यदशकलात्मनेश्रीपात्राधारायनमइत्यर्घपात्रंसंपूज्य
तत्रसंस्थाप्यक्लींसूर्यमंडलायद्वादशकलात्मने श्री
पात्रायनम इतिपुष्पैः पात्रंसम्पूज्य तत्पात्रेत्रिको
णवृत्तषट्कोणचतुरस्रमण्डलंकृत्वा तन्मध्ये मूलमु
च्चरन् त्रिकोणवृत्तषट्कोणचतुरस्रमण्डलायनम
इतिपुष्पैःसंपूज्य पूर्ववद्द्विधा बीजत्रयेणत्रिकोणंसं
पूज्य पुनःपूर्ववत्षडंगे-नषट्कोणंसंपूज्य तत्पात्रेमूल
विद्यांजपन् शुद्धजलेनापूर्यतज्जलेसौः सोममंडला
यषोडशकलात्मने श्रीअर्घामृतायनमइतिपुष्पैःसं
पूज्य तस्मिंजले अआइई उऊऋॠ लृॡएऐ ओऔ
अंअः इत्येकांगेयां कखगघङ चछजझञ टठडढ
ण इत्येकांरेखां तथदधन पफबभम यरलव ।

श्रा॰ शाषमद्दतः इत्येकां रेखां त्रिकोणाकारेण संलिख्य
तत्त्रिकोणं हंसनमइति पुष्पैः संपूज्य तद्बहिर्वृत्तषट्
कोणचतुरस्रं विलिख्य तन्मण्डलं मूलविद्यया त्रिको
णवृत्तषट्कोणचतुरस्रमण्डलायनमइति पुष्पैः संपू
ज्य पूर्ववद्विधा बीजत्रयेण त्रिकोणं संपूज्य पुनः पूर्वव
त्स्उंऐं॰न षट्कोणं संपूज्य पंचभिरवयवराशैरामंत्रये
तद्यथा श्रां ऐंहें एकरमानन्दरूपपरमात्मनि स्वच्छंद
स्फुरणामत्र निधेहि अकुलनायके अकुलस्थामृताका
रे शुद्धज्ञानकरे परे अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्न
रूपिणि तद्रूपिणीकरस्यानंदकृत्वा स्वोन्नतत्वरूपिणि
भूत्वा परामृताकारमयि चित्स्फुरणं कुरु ऐं ब्लूं झ्रौं जुंसः
अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं
स्त्रावय २ स्वाहा ऐं वद वाग्वादिनि वाग्भवः क्लिन्ने॰
क्लेदिनि क्लेदय २ महामोहं कुरु २ क्लीं सौः मोहं कुरु
ह्सौः स्हौः इत्यामन्त्र्य मूलविद्यया तत्र समस्तमादाय गन्धपु
ष्पादिनाभ्यर्च्य तद्देवतास्वरूपं विभाव्य तद्बिन्दु
भिरात्मानमभ्युक्ष्य लेपनेन आर्द्रं ज्वलति ज्योतिरहमस्मि ज्यो
तिः ज्वलति ब्रह्माहमस्मि योऽहमस्मि ब्रह्माहमस्मि
अहमस्मि ब्रह्माहमस्मि ॥
अहमेवाहं मां जुहोमि स्वाहा ॥

३२४
214

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यात्मानमभ्युक्ष्य पुनस्तज्जलं गृहीत्वा पूजोपकरणं
चाभ्युक्ष्य सर्वं विघ्नमयं कुर्यात् पुनस्तद्दक्षिणे त्रिको
णं च वृत्तं चतुरस्रं मण्डलं कृत्वा तदाधारं संस्थाप्य तत्र व
ह्निमण्डलाय दशकलात्मने नम इत्याधारं संपूज्य
तदुपरि पात्रं संस्थाप्य अं सूर्यमण्डलाय द्वादशकला
त्मने नम इति पात्रं संपूज्य तत्र शुद्धजलं मापूर्य सोम
मण्डलाय षोडशकलात्मने नम इति जलं संपूज्य पुनः
षडंगेनाभ्यर्च्य तत्र गंधपुष्पाक्षतान्निक्षिपेत् एवं प्र
कारेणान्यान्यपि पात्राणि स्थापयेत् सामान्यं श्रीपुत
पात्रं च भोगदं कटुकं योगिनीपात्रं क्षेत्रपालं गणेश
रं वीरपात्रं नैवेतानि योजानाति स पूजकः तथा च
तन्त्रान्तरे गुरुपात्रं भोगपात्रं शक्तिपात्रं तथैव च पूजा
पात्रं तदन्ते च योगिनीनां भवेत्प्रिये वीरपात्रं बलिपा
त्रं पाद्यमाचमनीयकं एतानि नव पात्राणि क्रमशः
स्थापयेत्सुधीः यथा गुरोः पात्रं चट स्थाने तदन्ते भोगपा
त्रकं तदन्ते शक्तिपात्रं च योगिनीनां तदन्तिके तदन्ते
वीरपात्रं च बलेः पात्रं तदन्तिके पाद्यमाचमनीयं च पा
त्राणि स्थापयेद्बुधः उक्तं नव पात्राणि सप्त पात्राणि म
ध्यमध्यमं केचिद्वदन्ति मन्त्रज्ञः पंच पात्राणि मध्यमे
कनिष्ठं त्रीणि पात्राणि एकपात्रं तु वर्णयेत् देवीपा

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ त्रे गुरोः पात्रं भोगपात्रे त्रयं मतं शुद्धपात्रं बलेः पात्रं पंच

पात्रेस्त्वयं विधिः पंचपात्रेषु विज्ञेयं योगिनीनां च तर्पणे

पाद्यमाचमनीयं च वटोः पात्रात्सदार्चने इत्यर्घ्यपात्रं

संस्थाप्य हृत्पद्ममध्ये परमानन्दमयीं परमात्मस्वरूपां ते

जोमयीं विभाव्य वहनासापुटेन शुभ्रेण विरेचन मुद्रया

गृहीत दिनकरकिरणारुणकुसुमाञ्जलावारोप्य

तत्र मूर्तिं विभाव्य ऐं ह्रीं श्रीं सौः महात्रिपुरसुन्दरी अम्र

तचैतन्यमूर्तिं कल्पयामि नमः इति पुष्पाञ्जलिना

सह मूर्तिं यथोक्तपीठस्थापयेत् अथवा मूर्तिकल्प

ने आसनदानं च मूलेनैव दद्यात् तदुक्तं वाराहतन्त्रे

दत्वासनं च मूलेन मूर्तिं मूलेन कल्पयेत् पद्मे हि देव

देवेशि त्रिपुरे देवपूजिते परामृतप्रिये शीघ्रं सान्निध्यं

कुरु सिद्धिदे देवेशि भक्तिसुलभे सर्वावरणसंयुते या

वत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव इत्यावाहनमुद्रा

प्रदर्श्य ऋतिसंप्रदायेन तु अमृतवामस्य समर्पणं नि

इमं रर्ध्यं मध्ये इति क्रमेण पः क्रियेण आसनं ऐं ऐं श्री

सं ह्स्क्लीं सौः नमो महात्रिपुरसुन्दरि ह्सैं ह्स्क्लीं ह्सौः

महापद्मवनान्तस्थे कारणानन्दविग्रहे सर्वभूतहिते

मातरेह्येहि परमेश्वरि इत्यावाह्य यन्त्रोपरि किंचिज्जलं

दत्वा प्राणप्रतिष्ठां कुर्यात् यन्त्रपूता श्रीं क्लीं ह्लीं

© Dharmartha Trust J&K. Digitized by eGangotri

ऐं हैं हुल क्लीं सौं सकल ह्रीं ह्लीं ह्रौं क्लौं ग्लौं श्रीं श्रीमहात्रिपुरसुं
दर्याः प्राणा इह प्राणाः एवं श्री इत्यादि बीजानि ७ श्रीम
हात्रिपुरसुन्दर्या जीव इह स्थितः एवं श्री इत्यादि ७ श्रीम
हात्रिपुरसुन्दर्याः सर्वेन्द्रियाणि वाङ्मनः चक्षुःश्रोत्रघ्रा
णप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्र
तिष्ठां कृत्वा वाहयेत् बद्धाञ्जलिः भगवति श्री महात्रिपु
रसुन्दरि श्रीमहापीठे इहागच्छ इह तिष्ठ ४ इह सन्निधे
हि सन्निरुद्धा भव ममाधिष्ठानं कुरु मम पूजां गृहाण स्वा·
वाहनस्थापनसन्निधापनसन्निरोधनामृतीकरणसक
लीकरणावगुण्ठनमुद्राभिः बिन्दुचक्रे देवीमावा
ह्यात्मदेव्यङ्गे षडङ्गानि विन्यस्य पुष्पं गृहीत्वा देवीं ध्या
येत् ततः पद्मनिभां देवीं बालार्ककिरणारुणाम्
जपाकुसुमसंकाशां दाडिमी कुसुमप्रभां पद्मरागप्र
तीकाशां कुङ्कुमोदकसन्निभां स्फुरन्मुकुटमाणिक्यकिं
किणीजालमण्डितां कालालिकुलसंकाशकुटिलाल
कसन्निभां प्रत्यग्रारुणसंकाशवदाम्भोजमण्डलम्
किंचिदर्धेन्दुकुटिलललाटमृदुपट्टिकां पिनाकधनु
राकारसुभ्रूवां परमेश्वरीं आनन्दमुदितोल्लोलली·
लामौलितलोचनां स्फुरन्मयूखसंघातविलसद्धेम
कुण्डलां सुगण्डमण्डलाभोगजितेन्दुमृतमण्डलाम्
विश्वकर्मादिनिर्माणसूत्रसुस्पष्टनासिकां ताम्रवि

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा

२१६

216

भ्रमविभ्राम रक्तौष्ठीमस्तोपमां दाडिमीबीजवज्रा
भदन्तपंक्तिविराजितां रत्नदीपसमुद्भासिनासिकाममल
भाषिणीं स्मितमाधुर्यविजितामाधुर्यरससागराम्
अनौपम्यगुणोपेतचिबुकोद्देशशोभितां कम्बुग्रीवां
महादेवीमृणाललालितैर्भुजैः रक्तोत्पलदलाकार
सुकुमारकराम्बुजाम् कराम्भोजनखज्योतिर्विघोदित
नभस्थलां मुक्ताहारलतोपेतसमुन्नतपयोधराम्
त्रिवलीवलयायुक्तमध्यदेशसुशोभनां लावण्यस
रिदावर्ताकारनाभीविराजितां अनर्घरत्नघटितकां
चीगुणनितम्बिनीं नितम्बबिम्बद्विरदरोमराजीवरां
कुशां कदलीललितस्तम्भसुकुमारोरुमीश्वरीं लाव
ण्यकदलीतुल्यजंघायुगलमंडितां गूढगुल्फपदद्व
द्वाप्रपदाजितकच्छपां नवदीर्घांगुलीभास्वन्नखचन्द्र
विराजिताम् ब्रह्मविष्णुशिवेशरत्ननिघृष्टचरणाम्बुजां
शीतांशुशतसंकाशकान्तिसन्तानहासिनीं लौहित्यजि
तसिन्दूरजपादाडिमरागिणीं रक्तवस्त्रपरीधानांपा
शांकुशकरोद्यतां रक्तपुष्पोपविष्टानरत्नाभरणभू
षितां चतुर्भुजां त्रिनेत्रां च पंचबाणधनुर्धराम् कर्पूरशा
कलोन्मिश्रताम्बूलापूरिताननां महामृगमदोद्दामकुं
कुमारुणविग्रहां सर्वशृंगारवेशाढ्यां सर्वालंकारभू
षितां ॥ जगदाह्लादजननीं

जगदाह्लादनकारिणी जगदाकर्षणकारिणी सर्वसौभा
ग्यसुन्दरी सर्वलक्ष्मीमयी नित्या परमानन्दरूपिणी
सर्वदेवमयी देवी कदम्बवनमध्यगा चक्रमध्ये तु सं
चिन्त्य ध्यानपूजनमारभेत् इति ध्यानानन्तरं पीठपू
जां दत्वा षोडशोपचारैः पूजयेत् तद्यथा तदुक्तं मान
सोल्लासे समुद्धाम्नवदेन्मन्त्री उपचारान्सदेवद्दि स
मुद्धा सम्बोधनपदेन उपचारानाह यथा पाद्यः
र्घाचमनस्नानवस्त्राभरणानि च गंधपुष्पधूप
दीपनैवेद्याचमनं ततः ताम्बूलमर्चनास्तोत्रं तर्पणं
च नमस्क्रिया प्रयोजयेदर्चनायामुपचारस्तु षोड
श तेषामन्तरे आसनं स्वागतं चार्घ्यं पाद्यमाचमनी
यकं मधुपर्काचमनस्नानवस्त्राभरणानि च सुग
न्धपुष्पदीपनैवेद्यं वन्दनं तथा एवं वा योजयेत्प्राज्ञ
उपचारास्तु षोडश अथवा दशोपचारैः पूजयेत् त
द्यथा अर्घ्यादि चिन्तयेच्चैव मधुपर्काचमनान्यपि ग
न्धादयो निवेद्यान्ता उपचारा दशक्रमात् अथवा पं
चोपचारैः गन्धाद्यैः पूजयेत्परमेश्वरीं यथोक्तव
स्त्वसम्पत्तौ धिया संकल्प्य पूजयेत् सर्वाभावमर्चयेद्दे
वानेकं वा देवमर्चयेत् देवार्चाप्युद्धृत्याकृत्वा भक्षयेत्तल्लो
कमाप्नुयात् अलाभेन तु पुष्पाणां पत्राण्यपि नि

श्री:

वेदयेत् पत्राणामप्यलाभेन फलान्यपि निवेदयेत्
फलानामप्यलाभेन तृणगुल्मौषधीरपि औषधी-
नामलाभे तु भक्त्या चैव निवेदयेत् इति भविष्ये ॥
तथा च कालिकायां अंगरागेषु सिन्दूरं पानार्थं मधु
रं मम निवेदितव्यं यत्नेन यदि मां हृष्टुमिच्छसि त
त्रायं क्रमः ऐं ह्रीं श्रीं महात्रिपुरसुन्दरि पाद्यं क
ल्पयामि नमः इति पादयोः मूलमुच्चार्य ऐं ह्रीं
श्रीं महात्रिपुरसुन्दरि अर्घ्यं कल्पयामि नमः इति मू
र्ध्नि दद्यात् आचमनीयं मुखे स्नानीयं सर्वांगे अरु-
णवस्त्रयुगं आभरणानि चन्दनागुरुकस्तूरीकुङ्कु
ममयं गन्धं अथवा चन्दनागुरुकर्पूरचोरकुङ्कुम
रोचना जटामांसीकपिसुगन्धाख्यैः गन्धाष्टकं वि
दुः चोरः कचूर इति प्रसिद्धिः कपिः कस्तूरी नाना
जातीयपुष्पं तदभावे ज्ञानमालायां पुष्पं वा यदि
वा पत्रं फलं नैवमधोमुखं पुष्पांजलिविधिं हित्वा यथो
त्पन्नं ज्येष्ठमर्घ्यार्पणं तथा चोक्तं कालिकापुराणे नैवे
द्यं दक्षिणे वामे पुरतोऽपि न पृष्ठतः दीपं दक्षिणतो दद्या
त्पुरतो वा न पृष्ठतः वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे
निवेदयेत्पुरतो भागे गन्धं पुष्पं च भूषणं प्रतिमादिष्वयथो
गंधमानेदंतं चलनं तो दद्याद्द्योग्यं पुरतो नैवेद्यं भोजनादिकं
वामे धूपं दद्यादिति विष्णुविशाखे शक्तिविशयेत ॥

२४

217

© Dharmartha Trust J&K. Digitized by eGangotri

दक्षांगुष्ठतर्जनीभ्यां पुष्पाणि तेपनं चरेत् नार्चयेदे
कहस्तेन यदीच्छेत्सिद्धिमात्मनः केवलं दक्षहस्तेन
अभिचाराय कल्पते वामेन केवलं भोगः संयोगा
द्योगमोक्षदं पक्षद्वयोचितमतिपदादितिथिक्रमेण
यस्यां या नित्या तामादौ शिवारमभ्यर्च्य ततो यां पूज
येत् शुक्लपक्षे कामेश्वर्यादिविज्ञान्यां कृष्णपक्षे वि
ज्ञादिकामेश्वर्यन्तं तिथिमंडलस्था अः स्वरेणायजेत्
तद्यथा अं ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः का
मेश्वरी नित्या श्रीपादुकं पूजयामि आं ऐं भगभुगे भ
गिनि भगोदरि भगमाले भगवहे भगगुह्ये भगयोनि
भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लि
न्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते
सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भग
विच्चे क्षुभ क्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जें ब्लूं
भें ब्लूं मों ब्लूं हें ब्लूं हे क्लिन्ने सर्वाणि भगानि मे वश
मानय स्त्रीं हर ब्लें ह्रीं भगमालिनी नित्या श्रीपादुकां
पूजयामि २ इं ऐं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा नि
त्यक्लिन्ना नित्या श्रीपादुकां पूजयामि ३ ईं ओं क्रों भ्रौं
म्रैं क्रौं छ्रौं ज्रौं स्वाहा भेरुण्डा नित्या श्रीपादुकां पूज
यामि ४ उं ओं ह्रीं वह्निवासिन्यै नमः वह्निवासिनी नि

© Dharmartha Trust J&K. Digitized by eGangotri

श्री०

२१८

218

त्याश्री पादुकां पूजयामि ५ ॐ ह्रीं क्लिन्ने ऐं क्रों नि-
त्यमदद्रवे ह्रीं महावज्रेश्वरी नित्याश्री पादुकां पूज
यामि ६ ॐ ह्रीं शिवदूत्यै नमः शिवदूती नित्याश्री
पादुकां पूजयामि नमः ७ ॐ ह्रीं ॐ ह्रीं हुं खे च छे क्षः स्त्रीं
हुं क्षें ह्रीं फट् त्वरिता नित्याश्री पादुकां पूजयामि ८
ऐं क्लीं सौः कुलसुन्दरी नित्याश्री पादुकां पूजयामि
हसकलरडैं हसकलरडीं हसकलरडौः नित्या-
श्री पादुकां पूजयामि १० ऐं क्लीं श्रं स्त्रं क्रों आं ह्रीं ऐं ब्लूं
नित्यमदद्रवे हूं फ्रें ह्रीं नीलपताका नित्याश्री पादुकां
पूजयामि ११ ऐं भमरयूं विजया नित्याश्री पादुकां पू
जयामि १२ ॐ स्वौं सर्वमङ्गला नित्याश्री पादुकां पूज
यामि १३ ॐ नमो भगवति ज्वालामालिनि देवि देवि
सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्व
ल प्रज्वल २ ह्रां ह्रीं हूं र र र र र ज्वालामालिनि हूं
फट् स्वाहा १४ श्रीं क्षौं चित्रा नित्याश्री पादुकां पूजया ९५
मि १५ मूलविद्यान्ते श्री महात्रिपुरसुन्दरी नित्याश्री
पादुकां पूजयामि १६ तदुक्तं वामकेश्वर तन्त्रे ॥
मध्यप्राक्कि स्वमध्येन तु रूपमङ्किं त्रिधा यजेत् ।
त्रिकोणे देवया बहिः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रिभंगागुरवः पूज्यास्तिथिनित्यार्चनादहर्द्दिरिति यथा
ह्रीं श्रीं श्री परमेश्वरानन्दनाथ श्री पादुकां पूजयामि १
ह्रीं श्रीं श्री परमेश्वरमेश्वरी स्वा श्री पादुकां पूजयामि २
ह्रीं श्रीं श्री मित्रेशानन्दनाथ श्री पादुकां पूजयामि ३
ह्रीं श्रीं श्री षष्ठीशानन्दनाथ श्री पादुकां पूजयामि ४
ह्रीं श्रीं श्री उड्डीशानन्दना· श्री पादुकां पूजयामि ५ ॥
ह्रीं श्रीं श्री चर्यानन्दनाथ श्री पादुकां पूजयामि ६ ॥
ह्रीं श्रीं श्री लोपामुद्रा स्वा श्री पादुकां पूजयामि ७
इति परौघाः समः ह्रीं श्रीं श्री अगस्त्यानन्दनाथ श्री
पादुकां पूजयामि १ ह्रीं श्रीं श्री विष्णुदेवानन्दनाथ
श्री पादुकां पूजयामि २ ह्रीं श्रीं श्री तेजोदेवानन्दनाथ
श्री पादुकां पूजयामि ३ ह्रीं श्रीं श्री मनोजदेवानन्द श्री
पादुकां पूजयामि ४ ह्रीं श्रीं श्री कल्याणदेवानन्दनाथ
श्री पादुकां पूजयामि ५ ह्रीं श्रीं श्री रत्नदेवानन्दनाथ
श्री पादुकां पूजयामि ६ ह्रीं श्रीं श्री वासुदेवानन्दनाथ
श्री पादुकां पूजयामि ७ ह्रीं श्रीं श्री रामानन्दनाथ श्री
पादुकां पूजयामि ८ मानवौघाः उष्टसंख्याः ॥
अथवा ह्रीं श्रीं श्री परमगुरुभ्यः श्री पादुकां पूजयामि
ह्रीं श्रीं श्री परापरगुरुभ्यः श्री पादुकां पूजयामि ह्रीं श्रीं
परमेष्ठिगुरुभ्यः श्री पादुकां पूजयामि मध्यबिन्दौ

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रा २१९ 219

स्वगुरुं पूजयेत् यथा ऐं क्लीं श्रीं ह्स्ख्फ्रें ह्सक्षम
लवरयूं स्हक्षमलवरयीं ह्सौः श्री लक्ष्मणस्वामिना
थ श्रीपादुकां पूजयामि ॥
पुनः षडङ्गेन पूजयेत् इति षडङ्गा—वलीपूजा कार्या तत्र म
ध्यत्रिकोणे हृदि आग्नेये ४ ऐं सर्वज्ञताहृदयशक्ति श्रीपादुकां पू
जयामि नमः ईशाने ४ क्लीं नित्यतृप्ता शिरः शक्ति श्रीपा
दुकां पूजयामि नमः नैरृते सौः अनादिबोधा शिखाश
क्ति श्रीपादुकां पूजयामि न० वायवे ४ ऐं स्वतन्त्रायकवचा
यशक्तिश्री देव्यग्रे त्रिकोणे हृदि क्लीं नित्यमलुप्ता नेत्र
शक्तिश्री सर्वादिकचतुर्दिक्षु पादतिरपेन सौः अनन्ता
वस्त्रशक्तिश्री० इति षडङ्गावलीपूजा ॥ तत्र ४ ह्सूं समस्त
प्रकटगुप्तगुप्ततरसम्प्रदाय कुलकौलनिगर्भरहस्य
परापरातिरहस्ययोगिनी श्रीपादुकां पूजयामि
ति श्रीचक्र पुष्पाञ्जलिं दत्वा चतुरस्रत्रयं ध्यात्वा ४
ह्रेंश्रां सौः त्रैलोक्यमोहनचक्राय नमः इति चतुर
स्रत्रयं समुदायेन पुष्पाञ्जलिना सम्पूज्य तत्र देव्या०
ग्रादिद्वारचतुष्टये दक्षिणाद्यादिकोणचतुष्टयेर
न्द्रेशानयोर्मध्ये निरृतिवरुणयोर्मध्ये ऽणिमादि
दशसिद्धीः पूजयेत् ॥
तत्र पश्चिमादिद्वारचतुष्टयस्य दक्षिणभागे

© Dharmartha Trust J&K. Digitized by eGangotri

अणिमासिद्धिश्रीपादुकांपूजयामिनमः अ
र्घोदकेनसामान्यार्घोदकेनेत्यर्थः इमः इतिच॰
केषयोवामहस्तेतज्जलदानेन पूजांसमर्प्यमूल
विद्ययामूलदेवींसंपूज्यसन्तर्प्य पुष्पांजलिमा
दाय मूलमुच्चार्यदेवींसम्बोध्य अभीष्टसिद्धिंमेदे
हिशरणागतवत्सले भक्त्यासमर्पयेतुभ्यंप्रथ
मावरणार्चनमिति देव्याश्चरणयोः पुष्पांज
लिंदत्वाप्रकटयोगिनीमयूखायैश्रीमहात्रिपुर
सुन्दर्यैनमः ॥

इतियोनिमुद्रयाप्रणमेत् इतिप्रथमावरण॰
पूजा ॥ पुनःषडङ्गेनपूजयेत् ॥

श्री बाह्यचतुरस्रप्रथमभूबिम्बे पश्चिमादावारभ्य पूजये
त् तद्यथा आत्मनः पुरतो भद्रे देवता पुरतास्तथा पूर्वा
२२०
शाकल्पितासैषा सर्वदेवार्चनेरता पुरन्दरमुखो मंत्री
220
पूजयेत्सुन्दरी यदा देवी पश्चान्नदा प्राची प्रतीची त्रिपु
रापुरः श्रीचक्रबाह्यभूबिम्बे पश्चिमादिक्रमेणतु प्रा
दक्षिण्येन सम्पूज्याः सिद्धयो ह्यणिमादिकाः देवी पुर
मेश्विमंस्यासर्वचक्रो ध्वयेविधिरिति पश्चिमे ह्रींश्रीं
अणिमा श्री पादुकां पूजयामि उत्तरे ह्रींश्रीं लघिमा
सिद्धि श्री पादुकां पूजयामि पूर्वे ह्रींश्रीं महिमा सिद्धि
श्री दक्षिणे ह्रींश्रीं ईशत्व सिद्धि श्री पादुकां पूजयामि
वायुकोणे ह्रींश्रीं वशित्व सिद्धि श्री पादुकां पूजयामि
ईशाने प्राकाम्य सिद्धि श्री आग्नेये भुक्ति सिद्धि श्री
नैरृते ह्रींश्रीं इच्छा सिद्धि श्री अधः ह्रींश्रीं प्राप्ति सिद्धि
श्री ऊर्ध्वे ह्रींश्रीं सर्वकामा सिद्धि श्री द्वितीयचतुरस्र
रेखायां पश्चिमे ह्रींश्रीं आं ब्राह्मी श्री पादुकां पूज
यामि उत्तरे ईं माहेश्वरी श्री पूर्वे ह्रींश्रीं ऊं कौमा
री श्री पादुकां पूजयामि दक्षिणे ह्रींश्रीं ऋं वैष्णवे
श्री वायौ ह्रींश्रीं लृं वाराही श्री ऐशान्यां ह्रींश्रीं
ऐं इन्द्राणी श्री पादुकां पूजयामि आग्नेये ह्रींश्रीं
औं चामुण्डा श्री पादुकां पूजयामि नैरृते ह्रींश्रीं अः

© Dharmartha Trust J&K. Digitized by eGangotri

महालक्ष्मीश्री तृतीयचतुरस्ररेखायां पश्चिमे ह्रीं
श्रीं द्रां सर्वसंक्षोभणीमुद्राश्री पादुकां पूजयामि ॥
उत्तरे ह्रीं श्रीं द्रीं सर्वविद्रावणीमुद्राश्री पूर्वे
ह्रीं श्रीं क्लीं सर्वाकर्षणीमुद्राश्री पूर्वे दक्षिणे ॥
ह्रीं श्रीं ब्लूं सर्ववशंकरीमुद्राश्री पूर्वे वायो ह्रीं श्रीं
सः सर्वोन्मादनीमुद्राश्री ऐशान्यां ह्रीं श्रीं क्रों
सर्वमहांकुशामुद्राश्री आग्नेयां ह्रीं श्रीं ह्सखफ्रें
सर्वखेचरीमुद्राश्री नैरृत्यां ह्रीं श्रीं ह्सौः सर्व
बीजमुद्राश्री अधः ह्रीं श्रीं ऐं सर्वयोनिमुद्राश्री
ऊर्ध्वं ह्रीं श्रीं ऐं सर्वत्रिखण्डा मुद्राश्री बाह्यचतुरस्र
प्रथमभूबिम्बे अणिमापूजस्थाने अं आं सौः
त्रिपुरानित्याश्री अर्घोदकेनचैताः प्रकटयोगिन्यः
त्रैलोक्यमोहनीचक्रे समुद्राः ससिद्धयः सायुधाः
सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः संतु
महादेव्यै पूजां समर्पयेत् द्रां सर्वसंक्षोभणीमुद्रांप्र
दर्शयामिति प्रदर्शयेत् १ षोडशदलपूजामाह
भूपद्मादिसरोरु-न्नाः पश्चिमाशादलादितः वि-
लोमेनयजेदेकामानित्याः कलाः पुनः विलोमेनदे
व्यावामक्रमेण तद्दलं चतुःशत्या २ षोडशारेम
हादेवितामभावेनपूजयेदिति ॥

श्री

२२१

221

ततः षोडषदलं पूर्णचन्द्रनिभं स्रवत्पीयूषं
ध्यात्वा ॥ ऐं क्लीं सौः सर्वाशापरिपूरकचक्रा
यनमः इति त्रिः पुष्पं देव्या अग्रदलमारभ्य वामा
वर्तेन षोडषनित्याकलाः पूजयेत् । इत्याद्य
भूपत्रादीनि सामान्यार्घोदकं गृहीत्वा ॥
पनाशुभयोगिन्यः सर्वाशापरिपूरके चक्रे स
मुद्राः ससिद्धयः इत्यादि पठित्वा सर्वोपचारैः पू
जिताः स्तर्पिताः सन्तु नमः इति चक्रेश्वर्या वामहस्ते
न त्रैलोक्यदानेन पूजां समर्प्य विशेषार्घोदकेन संत
र्प्य पुष्पांजलिमादाय मूलमुच्चार्य देवीं सम्बोध्य
अभीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या स
मर्पये तुभ्यं द्वितीयावरणार्चनमिति देव्याश्चरणयोः
पुष्पांजलिं दद्यात् ॥

षोडशदलं संपूज्य अष्टदलकमलं पार्श्वसमप्रभं ध्यात्वा ॥
ह्रीं क्लीं सौः सर्वसंक्षोभनचक्राय नमः इत्यष्टदलेषु पुष्पां
जलिं क्षिप्त्वा देव्याः पृष्ठभागस्थपूर्णावदलमत आरभ्य दिग्दलचतु
ष्टये प्रादक्षिण्येन पूजयेत् ततो दाडिमकुसुमप्रभं चतुर्दशा
रचक्रं ध्यात्वा ह्सैं ह्स्क्लीं ह्सौः सर्वसौभाग्यदायकचक्राय नमः
इति चतुर्दशारचक्रे पुष्पांजलिं दत्त्वा देव्याग्रकोणा
मारभ्य वामावर्तेन ॥ कं सर्वसंक्षोभिणी शक्तिश्रीपादुकां पूज
यामि तर्पयामि नमः ॥ खं सर्वविद्राविणी शक्तिश्री पादुकां पूज
कर्षिणी ॥ गं सर्वाह्लादिनी इत्यादि आरभ्य सर्वद्वन्द्वक्षयंक
री शक्तिपर्यन्तं संपूज्य श्रीपात्रबिन्दुभिः सन्तर्प्य ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रीं श्रीं अं कामाकर्षिणी नित्याकला श्री पादुकां पूजय-
यामि ह्रीं श्रीं आं बुद्ध्याकर्षिणी नित्याकला श्री पादुकां
पूजयामि ह्रीं श्रीं इं अहंकाराकर्षिणीनि ह्रीं श्रीं ईं श
ब्दाकर्षिणीनि ह्रीं श्रीं उं स्पर्शाक ह्रीं श्रीं ऊं रूपाक
ह्रीं श्रीं ऋं रसाक श्री पादुकां पूजयामि ह्रीं श्रीं ॠं गंध
क ह्रीं श्रीं लृं चित्ताक श्री पादुकां पूजयामि ह्रीं श्रीं
ॡं धैर्याक ह्रीं श्रीं एं स्मृत्याक श्री पादुकां पूजयामि
ह्रीं श्रीं ऐं नामाक ह्रीं श्रीं ओं वीजाक ह्रीं श्रीं औं आ
त्माक श्री पादुकां पूजयामि ह्रीं श्रीं अं अमृताक श्री
ह्रीं श्रीं अः शरीराकर्षिणी नित्याकला श्री पादुकां
पूजयामि ऐं क्लीं सौः त्रिपुरेश्वरी श्री चक्रेश्वरी श्री
पादुकां पूजयामीति पूजयेत् अर्घोदकेनेता गुप्त·
योगिन्यः सर्वाशापूरके चक्रे समुद्राः ससिद्धयाः सा
युधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः
सन्तु माहादेवीपूजासमाप्यये ह्रीं सर्वविद्राविणी
मुद्रां प्रदर्शयेत् अष्टदले पूर्वे ह्रीं श्रीं कं खं गं घं ङं अ
नङ्गकुसुमादेवी श्री पादुकां पूजयामि दक्षिणे चं
अनंगमेखलादेवी श्री पश्चिमे ह्रीं श्रीं टं ५ अनंग
मदनादेवी श्री उत्तरे ह्रीं श्रीं तं ५ अनङ्गमदनातु·
रादेवी श्री आग्नेय्यां ह्रीं श्रीं पं ५ अनंगरेखादेवी

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ श्री नैरृत्यां ऐंक्लींश्रींयंरंलंवं वेगिनी देवी श्री वायव्ये
ऐंक्लींश्रींशंषंसंहं अनंकुशा देवी श्री ऐशान्यां ऐंक्लींश्रीं
लंक्षः अनंगमालिनी देवी श्री ऐंक्लींश्रींसौः त्रिपुरसुंद

२२२

222

री श्री अष्टोदकेन पत्राग्रमनत्रयोगिन्याः सर्वसंतोभ
कारके चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः
सपरिवाराः सर्वोपचारैः पूजिताः सन्तु महादेव्यै पु
ष्पं समर्पयेत् ह्रीं सर्वाकर्षणी मुद्रां प्रदर्शयेत् भूप
रे चतुर्दशारचक्रे सन्त्वेतेषु स्थितापन्नाः शक्तयः
सर्वसिद्धिदाः पश्चिमादिक्रमेणैव देव्या वामादि प्र
र्चयेत् ऐंक्लींश्रींपं सर्वसंतोभणी शक्तिः श्री ऐंक्लींश्रींफं
सर्वविद्राविणी शक्तिः श्री ऐंक्लींश्रींवं सर्वाकर्षणी
शक्तिः श्री ऐंक्लींश्रींभं सर्वाह्लादिनी शक्तिः श्री ऐंक्लीं
श्रींमं सर्वसंमोहनी शक्तिः श्री ऐंक्लींश्रींयं सर्वस्तम्भनी
शक्तिः श्री ऐंक्लींश्रींरं सर्वजृम्भनी शक्तिः श्री ऐंक्लींश्रीं
लं सर्ववशंकारिणी शक्तिः श्री ऐंक्लींश्रीं वं सर्वरंज
नी शक्तिः श्री ऐंक्लींश्रीं शं सर्वोन्मादनस्वरूपिणी
शक्तिः श्री ऐंक्लींश्रींषं सर्वार्थसाधनी शक्तिः श्री ।
ऐंक्लींश्रींसं सर्वाशापूरणी शक्तिः श्री ॥
ऐंक्लींश्रीं हं सर्वमन्त्रमयी शक्तिः श्री ।
॥

© Dharmartha Trust J&K. Digitized by eGangotri

इत्येण धूपं दद्यादित्यर्थः चन्दनागुरुकर्पूरशैले
यमधुर्गुग्गुलैः धूपवर्त्तिं निर्माय ह्रीं श्रीं श्रीं महात्रि
पुरसुन्दरि धूपं कल्पयामि नमः कर्पूरगर्भिणावर्त्ति
घृतप्रदीपं प्रज्वाल्य ह्रीं श्रीं श्रीं महात्रिपुरसुन्दरि
इमं घृतप्रदीपं कल्पयामि नमः तदुक्तं कालिकापुरा
णे सर्वं महावस्तुमती सहितेन त्विदं द्वयं प्रकार्यपा
दद्यात्तं च दीपतापं तथैव चेति वचनादाधारोपरि दी
पोदेयः नानाविधनैवेद्यं पुरतः समानीयाधोरकेना
मृत्पात्रेण संरक्षकवचेनावगुण्ठयेदिति धेनुमु
द्रयामृतीकृत्य मूलविद्ययाभिमंत्र्य ह्रीं श्रीं श्रीं म
हात्रिपुरसुन्दरि नैवेद्यं कल्पयामि नमः इत्युक्त्वा
जलगण्डूषं दत्त्वा अमृतोपस्तरणमसि स्वाहा
इति जलगण्डूषं दत्त्वा प्राणाय स्वाहा अपानाय स्वाहा स
मानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहा इति पं
च प्राणाहुतीर्दत्त्वा तस्याः स्वीकारं गाढदृष्टिं विभाव्य
पुनरपि जलगण्डूषं दत्त्वा अमृतापिधानमसि स्वा
हा पुनरपोशानं दत्त्वा ह्रीं श्रीं श्रीं महात्रिपुरसुन्द
रि आचमनीयं कल्पयामि नमः इत्याचमनीयं दत्त्वा
ह्रीं श्रीं श्रीं महात्रिपुरसुन्दरि ताम्बूलं कल्पयामि न
मः इति ताम्बूलं निवेदयेत् ततः ह्रीं श्रीं श्रीं महात्रि

© Dharmartha Trust J&K. Digitized by eGangotri

पुरसुन्दर्यै नमः इति पुष्पाञ्जलित्रयेणाभ्यर्च्य नव मु-
द्राः प्रदर्शयेत् यथा संक्षोभद्रावणाकर्षवशोन्माद
महाङ्कुशाः खेचरीबीजयोन्याख्या नव मुद्राः प्रका-
शिता इति ततो मूलविद्यया ऐं ह्रीं श्रीं महात्रिपुर-
सुन्दरीं तर्पयामि स्वाहा इत्यंगुष्ठानामिकाभ्यां देव्या
मुखे वारत्रयं तर्पयेत् तदुक्तं यामले अंगुष्ठानामि-
काभ्यां शिवशक्त्यात्मकं परे अंगुष्ठश्शिवरुक्तो
नामिका शक्तिरुच्यते तयोः संयोगमात्रेण द्रव्यं
स्यादमृतोपमं शिवशक्त्यात्मकं बिन्दुद्वयं स्यादङ्गु-
लीयकं तेन तर्पितं तद्द्रव्यं परमामृतमिष्यते ततः
षडङ्गेन पूजयेत् अग्नीशासुरवायुमध्ये चतुर्दिक्षु
पूजयेत् ऐं हृदयाय नमः ईं क्लीं शिरसे स्वा-
हा नैरृते सौः शिखायै वषट् वायौ ऐं कवचाय हुम्
मध्ये क्लीं नेत्रत्रयाय वौषट् पूर्वदक्षिणपश्चिमोत्त-
रेषु चतुर्दिक्षु सौः अस्त्राय फट् इति पूजयेत् ॥

अथ षोडशनित्यार्चनक्रममाह ॥

ततो मध्यमत्रिकोणरेखासु दक्षिणपूर्वोत्त-
रासु वामावर्तेन शुक्लपक्षे कामेश्वर्यादिचित्रा-
न्तं कृष्णपक्षे चित्रादिकामेश्वर्यन्तं तिथिमण्ड-
लमर्चयेत् ॥ तदुक्तं त्रिपुरेश्वरतन्त्रे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रींश्रींलंः सर्वद्वन्द्वक्षयंकरीशक्तिः श्री १४ चक्राये हैं
ह्क्लींह्सौः त्रिपुरवासिनी चक्रेश्रीपादुकांपूजयामि
अर्घ्योदकेन एतासंप्रदाययोगिन्याः सर्वसौभाग्यकार
केचक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवा
राः सर्वोपचारैः पूजिताः सन्तु महादेव्यै पूजांसमर्पये
त् ब्लूंसर्ववश्यमुद्रांप्रदर्शयेत् बाह्यदशारचक्रे पश्चा
मे प्रसिता एता देव्यः सर्वार्थसाधकाः वारुणींदिशा
मारभ्य यजेदेता विलोमतः पश्चिमादिक्रमेण देव्या
वामक्रमेण ह्रींश्रींटंसर्वसिद्धिप्रदादेविश्री ह्रींश्रीं
ठंसर्वसम्पत्प्रदादेवीश्री ह्रींश्रींडंसर्वप्रियंकरीदेवीश्री
ह्रींश्रींढंसर्वमंगलकारिणीदेवीश्री ह्रींश्रींणंसर्वका
मप्रदादेवी ह्रींश्रींतंसर्वदुःखविमोचिनीदेवीश्री
ह्रींश्रींथंसर्वमृत्युप्रशमनीदेवीश्री ह्रींश्रींदंसर्वविघ्न
विनाशिनीदेवीश्री ह्रींश्रींधंसर्वाङ्गसुंदरीदेवीश्री
ह्रींश्रींनंसर्वसौभाग्यदायिनीदेवीश्री १० हैंह्क्लींह्सौः
त्रिपुरानित्याश्रीचक्रेश्वरीश्री अर्घ्योदकेन एताः
कुलकौलिनीयोगिन्यः सर्वार्थसाधकेचक्रे समुद्राः
ससिद्धयाः सायुधाः सवाहनाः सपरिवाराः सर्वो
पचारैः पूजिताः सन्तु महादेव्यै पूजांसमर्पयेत् सः
सर्वोन्मादिनीमुद्रांप्रदर्शयेत् अन्तर्दशारचक्रे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ मुक्ता फलप्रदा देव्यो दशारकोणमाश्रिताः पश्चि॰
२२४ माद्यास्तव इष्टभ्यपूर्वं तत्पूजयेदिमाः पूर्ववद्देव्या वामक्र
मेण पूजयेदित्यर्थः पश्चिमादिक्रमेण क्लीं श्रीं कें सर्व
ज्ञा देवी श्री क्लीं श्रीं खं सर्वशक्ति देवी श्री क्लीं श्रीं गं स
र्वैश्वर्यप्रदा देवी श्री क्लीं श्रीं घं सर्वज्ञानमयी देवी श्री
क्लीं श्रीं ङं सर्वव्याधिविनाशिनी देवी श्री क्लीं श्रीं चं स
र्वाधारस्वरूपिणी श्री क्लीं श्रीं छं सर्वपापहरा देवी श्री
क्लीं श्रीं जं सर्वानन्दमयी देवी श्री क्लीं श्रीं झं सर्वरक्षास्व
रूपिणी देवी श्री क्लीं श्रीं ञं सर्वेप्सितफलप्रदा देवी श्री
चक्राग्रे क्लीं श्रीं ह्रैं त्रिपुरमालिनी देवी श्री अन्तर्दशारके
न पत्तानि गर्वयोगिन्यः सर्वरक्षाकरे चक्रे समुद्राः स
सिद्धयः सायुधः सवाहनाः सपरिवाराः सर्वोपचारैः
पूजितास्सन्तु महादेव्यै पूजां समर्पयेत् क्रों अंकुश
मुद्रां प्रदर्शयेत् अष्टारचक्रे न्यासेपि योजयेद्देवि पाद
कां पूजयामि च पश्चिमादि विलोमेन वाशिन्याद्यष्टकं
यजेत् विलोमेन देव्या वामक्रमेण पूजयेदित्यर्थः
पश्चिमादिक्रमेण क्लीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं
ॡं एं ऐं ओं औं अं अः रवलूवर्षिनी वाग्देवता श्री
क्लीं श्रीं कं खं गं घं ङं कल्ह्रीं कामेश्वरी
वाग्देवता श्री

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रीं श्रीं चं ५ नवम्लीं मोदिनीवाग्देवताश्री ह्रीं श्रीं टं ५
यम्लूं विमलावाग्देवताश्री ह्रीं श्रीं तं ५ ज्मरीं अरु·
णावाग्देवताश्री ह्रीं श्रीं पं ५ ह्सल्वयूं जयिनी·
वाग्देवताश्री ह्रीं श्रीं यं रं लं वं झसमरयरयूं सर्वेश्वरीवा
ग्देवताश्री ह्रीं श्रीं शं षं सं हं क्षः क्षमरीं कौलिनीवा
ग्देवताश्री चक्रारे ह्रीं श्रीं सौः त्रिपुरासिद्धिदा देवी
श्री अर्घोदकेन एता रहस्ययोगिन्यः सर्वरोगहरो
चक्रे समुद्राः ससिद्धयाः सायुधाः सवाहनाः सपरिवा
राः सर्वोपचारैः पूजिताः सन्तु महादेव्यै पूजां सम
र्पयेत् ह्सरव्फ्रें खेचरीमुद्रां प्रदर्शयेत् अथवा
णायायुधपूजनं मंत्रामध्ये महादेवीषडावरणा
बहिः पश्चिमादिचतुर्दिक्षु वामावर्तेन पूजयेत्
ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः सर्वजृंभणेभ्यो बाणेभ्यो नमः
ह्रीं श्रीं थं धं सर्वमोहनाय धनुषे नमः ह्रीं श्रीं आं ह्रीं
सर्ववशीकरणाय पाशाय नमः ह्रीं श्रीं क्रों क्रों सर्व
स्तम्भनाङ्कुशाय नमः मध्यत्रिकोणे कामेश्वर्यादि
काचता अग्रदलोत्तरेषु च कोणेषु पूजयेन्मन्त्री स
र्वकामार्थसिद्धये देव्या अग्रकोणे वाग्भवबीजमु
च्चार्य अग्निचक्रे कामगिर्यालये मन्त्री शानाथात्मि·
के रुद्रात्मशक्तिः श्रीकामेश्वरीदेवीश्री देव्या दक्षि·

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रा॰ ऐं क्लीं सौः कामराजबीजमुच्चार्य सूर्यचक्रे जालन्ध

२२५

225

रपीठे षष्ठीशनाथात्मिकी विष्ण्वात्मशक्ति श्री महा
वज्रेश्वरी देवी श्री देव्या वामकोणे शक्तिबीजमु
च्चार्य सोमचक्रे पूर्णगिरिगह्वरे उड्डीशनाथात्मि
की ब्रह्मात्मशक्ति श्री भगमालिनी देवी श्री चक्रा
रे ह्सैं ह्सकलह्रीं ह्सौं त्रिपुराख्या नित्या श्री अग्नीन्द
केन पत्राग्र तिरहस्य योगिन्यः सर्वसिद्धिप्रदे चक्रेस
मुद्राः ससिद्धयाः सवाहनाः सायुधाः सपरिवा
रः सर्वोपचारैः पूजिताः सन्तु महादेव्यै मुद्रां सम
र्पयेत् सौः बीजमुद्रां प्रदर्शयेत् बिन्दुचक्रे समस्त
विद्यामुच्चार्य ब्रह्मरन्ध्रे ओड्डीयानपीठे परमब्रह्म
न्दचक्रेश्वरी चर्यनाथात्मिकी श्री महात्रिपुरसुन्द
री देवी परब्रह्मात्मशक्ति श्री महात्रिपुरसुन्दरी नि
त्या श्री मूलमुच्चार्य त्रिपुरसुन्दरी चक्रेश्वर्यै नमः इति
पुष्पैः संपूज्य पुनः मूलमुच्चार्य श्री महात्रिपुरसुन्द
री तर्पयामि स्वाहेति वारत्रयं सन्तर्प्य अग्नीन्द्रके
न पत्रापरापर रहस्य योगिनी सर्वानन्दमये चक्रे
न्दवे परब्रह्मस्वरूपिणी परामृतशक्तिः सर्वचक्रे
श्वरी सर्वमन्त्रेश्वरी सर्वविद्येश्वरी सर्ववीरेश्वरी
सर्वपीठेश्वरी ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सर्ववागीश्वरी सर्वकामेश्वरी सर्वसिद्धेश्वरी जगद्
व्याप्तिमातृका चक्रासनदेवताः समुद्राः सरितश्च यः सा
युधः सवाहनाः सपरिवारा श्रीमहात्रिपुरसुन्दरी दे
वीपरापरया सपर्यया सर्वोपचारैः पूजिताः सन्तु
श्रीमहात्रिपुरसुन्दर्यै पूजां समर्पयेत् ऐं योनिमुद्रां
प्रदर्शयेत् पूर्ववद्धूपदीपौ च मुद्राकरणान्तर्पणं नैवे
द्यं सघृतं दध्यान्नं ताम्बूलादिकं पुनः अखण्डपूजाकर्त
व्या बहिरन्तर्यथेच्छयेति सम्यक्पूजां विधायैव नित्य
होमं समाचरेत् नित्यहोमं ततः कृत्वा पीठे देवीं समा
नयेत् नित्यहोमविधिं कृत्वा बलिदानविधिं चरेत्
ईशानादिषु कोणेषु मण्डलानां चतुष्टयम् श्रीचक्र
मभितो देवि त्रिकोणं व्योम मालिखेत् अथवा वाम
भागे तु मण्डलं चैकमालिखेत् व्योमं व्यापकं मण्ड
लं येत्यर्थः अथवेति समुच्चयार्थं बलिदानस्य तत्र
विधानाद्विकल्पएव अशक्तौ तत्रैव सकलबलिदा
नमिति कश्चित् प्राणायामं ततः कृत्वा जपेन्मंत्रम
नन्यधीः ततबलिदानक्रममाह मण्डलं चतुरश्रं तु स
हले वामभागतः विधाय मनुनानेन पुष्पाक्षतसम
र्चयेत् अर्घ्याम्बुपूर्णं सलिलं स्थापयेत्तत्र भाजनम्
ऐं व्यापकमण्डलाय नमः इति पुष्पैः प्रतीकमर्चयेत्तथ

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा

२२९

226

यास्वयोमसहस्रचतुरस्रमंडलत्रयंसदतिरो स
हस्रचतुरस्रमंडलेतेकृत्वा पंचव्यापकमंडलायनमः
त्रिशेष्येप्रत्येकंमंडलानिसंपूज्य तेषुमंडलेषु अर्घा
त्रपूर्णसलिलानिफलसहितानिगन्धपुष्पसहिता
निपात्राणिसंस्थाप्य वामस्थितपात्रेषुप्रत्येकंगंध
पुष्पैःपूजयेत् छत्रेभ्योनमः वटुकायनमः योगिनी
भ्योनमः दक्षपात्रद्वयेक्षेत्रपालायनमः गणेशाय
नमः ततःप्रत्येकंवाक्यत्रयंमन्त्रंपठन् उत्सृज्यदद्यात्
प्रथमंवामपात्रत्रये ॐ सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः
हुं स्वाहा एषबलिर्नमः द्वितीयपात्रे ॐ श्रीं एह्येहि दे
वीपुत्र वटुकनाथ कपिलजटाभारभासुर त्रिनेत्रज्वा
लामुखसर्वविघ्नान् नाशयनाशय सर्वोपचारस
हितंबलिंगृह्ण २ स्वाहा एषबलिर्नमः तृतीयपा
त्रे ॐ श्रीं हुं ऊर्ध्वब्रह्माण्डतोवादिविगगनतलेभूतले
निष्कलेवापातालेवातलेवासलिलपवनयोर्यत्र
कुत्रस्थितोवा क्षेत्रेपीठोपपीठादिषुचकृतपदाधूप
दीपादिकेनप्रीतादेव्यःसदानः शुभबलिविधिनापा
तुदेवेन्द्रवन्द्याः यांयोगिनीभ्यःस्वाहा योगिनी हुं फ
ट् स्वाहा एषबलिर्नमः दक्षपात्रद्वये क्षांक्षींक्षूंक्षैंक्षौंक्ष :
स्थानक्षेत्रपालधूपदीपादिसहितंबलिंगृह्णगृह्णस्वाहा

© Dharmartha Trust J&K. Digitized by eGangotri

पशुबलिनमः द्वितीयपात्रे ॐ क्लीं श्रीं गां गीं गूं गणपत
येवरवरदसर्वजनमेवशमानयबलिंगृह्णगृह्णस्वा
हा इतिगणपतिबलिमंत्रः क्लीं ग्लौं गं गणपतयेवर
वरदसर्वजनंमेवशमानय इमंबलिंगृह्णगृह्णस्वा
हा पशुबलिनमः वामांगुष्टनासिकाभ्यांवटुकस्य
लिर्भवेत् अंगुष्ठमध्यमानामायोन्याकारेणयोजये
त् वाममुष्टिंविधायादौतर्जनीसरलांकुरु अनयामु
द्रयादेविक्षेत्रपालबलिर्भवेत् तथा मुष्टिस्थमध्यमा
नाम्नीमः मुलीसरलांकुरु गजांतकमहामुद्रागण
पत्यबलिर्भवेत् वामांगुष्टानासिकाभ्यां वटुकपा
त्रे तर्जनीमध्यमानामिकाभिः योगिन्यः केवलतर्ज
न्यातेक्षेत्रपालस्यकेवलतन्मध्यमयागशास्यमुद्राकार्या
ततोनित्यहोमंकुर्यात् विशुद्धेस्थरतन्त्रे नित्यहोमंततः
कुर्यात्स्वजामाफल्यहेतवेकुंडेवास्थंडिलेवापिलोकिः
कामावयापिवा अर्घोदकेनसम्प्रोक्ष्य तिस्रोरेखास्त
तोलिखेत् गंधपुष्पैःसमभ्यर्च्य मूलेनाग्निंचज्वालये
त् कव्यादिंतोनमःइतिक्रव्यादंशांविनिक्षिपेत् तत्रदेवीं
समावाह्यषडंगरवनंचरेत् मूलांगदेवतानांचपकैक
माहुतिंहुनेत् मूलेनचमहादेव्यैतत्वाषोडशमाहरान्
योजयेद्विधिगेयाग्निसाधकोहृष्टमानसः ज्ञानार्णवे

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

२२७

227

परितोषततो देवि नित्यहोमं समाचरेत् मूलमंत्रेण दे
वेशि ङ्गनोत्यं चाङ्गतीक्रमात् प्राणापानौ तथा व्यानमुदा
नश्च समानकः एतत्त्वत्पंचानीयादाङ्गनीनां च पंचकं
षडङ्गनीः षडंगेषु नित्यहोमो यमीरिता नवरत्नेश्वरं
त्रे ऊरुणी वास्यं डिले मन्त्री सर्वलक्षणलक्षिते सामथ्या
र्यजलैः प्रोक्षणं संस्कारमारभेत् वीक्षणं मूलमंत्रेण
शरेण प्रोक्षणं मतं तेनैव ताडनं देवि वर्मणाभ्युक्षणं
स्मृतं ॥ होमं कृत्वा देवीं पूजायंत्रे नीमा उपविश्य प्रा
णायामं कृत्वा मंत्रस्य श्रोत्रमुखहृदयनेत्राणि विवि
च्य जपेत् तदुक्तं यामले ॥ मंत्रस्य प्रणवः श्रोत्रं मुखं
रेफः प्रकीर्तितं स्वराश्च बहुधा नेत्रा मंत्रविद्भिरनन्त
रं प्रतिबिम्बाच ये वर्णा हृदयं परिकीर्तितमिति वि
भाव्य जपेत् तद्यथा मंत्रोच्चारणं कृत्वा प्रश्नोत्तरस
हस्रकं जपेत् विज्ञानान्मंत्रं साधकस्तु कदाचन श्रो
त्रेण सहस्रं पुनस्तोदेव्याः शतं तत्त्वज्ञं तथा नेत्रं
प्रजपेन्मंत्रं विज्ञाय प्रकदाचन नेत्रत्वं कुर्वितं का
र्यानिः समन्त्रिग्धमनाजपेत् प्रकृताखवमंचार्यं नङ्।
तं न विलम्बितं सूर्यकोटिप्रतीकाशं प्रथ्वनिमध्ये विभा
वयेत् ततः कामकलां ध्यायेत् तद्भावनां प्रणाडप्रा
णमहोदयकं सौम्भाम ऊर्ध्वविन्द्वात्मकं वक्त्रमधो

© Dharmartha Trust J&K. Digitized by eGangotri

मध्ये बिंदुत्रयात्मकम् कुचाद्वयं ... उक्तेषेषे
षांगानि च भावयेत् एवं कामकलाचतुष्टयेन प
विकल्पितं परमानन्दमयं परदेवतास्वरूपमात्मानं
ध्यात्वा मूलविद्यामभ्यसेदिति जपादौ गुरुपादु
कां स्मरेत् यथा ऐं क्लीं श्रीं ह्समाव्ळ्रं ह्सक्षमल-
वर — सहक्षमलवरयीं ह्सौः लक्ष्मणाख्यापिनाथ
श्रीपादुकां पूजयामि इति स्मृत्वा गुरुभ्यो नम इति
नमस्कृत्य जपेत् जपं समाप्य प्राणायामं कृत्वाऽर्घो
दकेन ॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जप
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ इति देव्या
वामहस्ते तेजोमयं जपं समर्प्य परमेश्वर्याः परि-
गृहीतं विभाव्य मूलमंत्रेणानेन मूलं विवेद्य पुनर्ग
न्धादिभिरभ्यर्च्य नवमुद्राः प्रदर्श्य योनिमुद्रया हृ
दि मुखेऽभ्यमथ ललाटे ब्रह्मरन्ध्रे नमस्कृत्य किंकि
मादिना स्तवं कुर्यात् ॥ यथा ॥ किंकिंदुःखं दनुज
दलनि हीयते न स्मृतायां कांकां कीर्तिः कुलकम
लिनि प्राप्यते न स्तुतायां कंकं योगं त्वयि न विनते
चित्तमाले वितायां कांकां सिद्धिः स्वरवनुते गाय
तेनार्चितायां ॥१॥ स्वर्गसंसर्गसंरम्भस्फारिताचो
नविभ्रमे चिदानन्दमाण्डलान्तस्ते नमस्ते हरवल्लभे ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

जगदाह्लादनो योगे भोगायोग वियोगिनी स्थितिभा
वस्थिते तोगौरीनमस्याम्यग्रियेम्बिके ३ भावाभावस्य
म्भावस्वभावोद्भावकर्मणि चैतन्यपथगो देवि नमस्त
भ्यं वरांगने ४ सृष्टिस्थित्युपसंहारप्रवृत्तिनतपदोदये
विष्टिश्रांत महासत्त्वामात्रेमात्रेणमोस्तुते ५ वह्न्यर्क·
शीतकिरणाख्यलवकानने रोहिते शान्तःपीठस्थविशिवेन
मस्ते त्रिपुरेश्वरि ६ चराचरमिदं विश्वं प्रकाशयसि तत्त्व
तः मातृस्वरूपमस्याय तस्मै मातर्नमोस्तुते ७ स्मृताभा
वमयं हंसि सृष्टिनामिष्टशुभंकरी स्तुताभवाञ्छितां सिद्धिं
ददासि करुणामयि ८ भक्तस्य मे नित्यपूजानुरक्तस्य
समन्वय वाग्भवादिमहासिद्धिं देहि त्रिपुरसुन्दरि·
वि ९ परमानन्दसन्दोहप्रमोदरसनिर्भरे दुःखत्र
यपविज्ञान हारिणि पाहि मां शिवे १० शाब्दब्रह्म
मये देवि नित्ये त्रिपुरसुन्दरि यथाशक्तिकृतां पू
जां गृहाण परमेश्वरि ११ द्रव्यहीनं क्रियाहीनं मं
त्रहीनं च यत्कृतं तत्सर्वं कृपया देवि क्षमस्व परमे
श्वरि १२ यन्मया क्रियते कर्म जाग्रत्स्वप्नसुषुप्ति·
षु तत्सर्वं तावकी पूजा भूयाद्भूत्यै नमः शिवे १३ य
न्मया कमितदाननानामदत्तमल्पमेव वा हन्तसर्वं
जगद्दायि चिन्तनामयमंजलिः १४ लोकैलोप्यनन्तविभ

गा

© Dharmartha Trust J&K. Digitized by eGangotri

भुवनाधिपत्यांयत्नाधिपेहृदयमोहनदत्तदत्ताम ।
श्रीमन्महात्रिपुरसुन्दरिनामधेयांसर्वाभिलाषपरि
पूरयकल्पवल्लीं २५ इतिस्तुत्वाप्रदक्षिणांकृत्वादंड
प्रणामंकुर्यात ॥यथा॥ पद्भ्यांकराभ्यांजानुभ्यामु
रसाशिरसादृशा वचसामनसाचेतिप्रणामोष्टांग
ईरितः । पद्भ्यांकराभ्यांशिरसापंचांगानतयःस्मृ
ता अष्टांगउत्तमप्रोक्तोपंचांगोमध्यमःस्मृतः नदे
वंदृष्टतःकृत्वाप्रणामंक्वचिदाचरेत पश्चात्कृत्वात
योदेवीं—मित्वाप्रणमेत्परः तस्येहिकंफलंनास्ति
नपरत्रदुरात्मनः भ्रांत्वाभ्रांत्वाचतच्चापंएवयोदेवींप्रण
मेत्नरः अष्टांगप्रणिपातेनमुक्तिस्तस्यकरोस्थितः इ
तिप्रणम्योपविश्यचौटकचुलकेनइतः पूर्वंप्राणबु
द्धिदेहधर्माधिकारतोजाग्रत्स्वप्नसुषुप्त्यवस्थासुम
नसावाचाकर्मणाहस्ताभ्यामुदरेणशिश्नायत्कृतं
यदुक्तंयत्स्मृतंतत्सर्वंब्रह्मार्पणंभवतुस्वाहा । मांम
दीयंचसकलंश्रीमहात्रिपुरसुन्दर्यैसमर्पये इत्यात्मा
नंसपरिच्छदंदेव्यैसमर्प्यपुनःप्रणम्यात्मायषट् पू
जयेत ॥यथा॥ सृष्टिरूपचतत्र्यषोडशाष्टदलाष्टदले
षु सर्वीकृष्टशक्तिः पूर्वाम्नायसमयविद्याश्रीपादु
कांपूजयामि ॥ स्थितिरूपचतदशारदशारवृत्तक

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
२२९
229

मध्येषु ऐंक्लिं सेक्लीं मदद्रवे कूले स्रौः दक्षिणाम्ना
यसमयविद्याश्रीपादुकां पूजयामि अष्टारत्रिकोणम
ध्ये स्त्रां हसखफ्रीं हसफ्रें स्हौं भगवत्यम्ब हसक्तम
लवरयूं सहलमलवयरीं कुब्जिके हसखफ्रां हसायफ्रीं
अघोरे घोरे घोरमुखि किलि किलि विम्ब स्हौं हस
खफ्रीं हस्रौं पश्चिमाम्नाय समये श्वरी श्रीपादुकां पूज॰
यामि समस्तचक्रेश्वर खफ्रें महाचण्डयोगीश्वरी श्रीपा
दुकां वलयत्रये ॐ नादे ऊनादे स्वाहा बौद्ध समयविद्या श्री
पादुकां षोडशदले ॐ ब्रह्मणे नमः वैदिकसमयवि
द्याश्रीपादुकां षोडशदले पूजयामि अष्टदले ह्रौं शि
वाय ह्रौं नमः शैवसमयविद्याश्री चतुर्दशारे ह्रां ह्रीं सः
सूर्याय नमः सौरसमय विद्याश्री दशारद्वये वारद्वये ॐ
नमो नारायणाय नमः वैष्णवसमयविद्याश्री मध्यम
के ॥ ऐं गणाध्यक्षाय नमः त्रिकोणमध्ये ऐं क्लीं
सौः ॐ ह्रां ह्रीं क्लीं ब्लूं सः स्हौः क्लीं ऐं कामेश्वरी नि
त्याश्री ऐं क्लीं सौः ॐ नमः कामेश्वरि इच्छाका
मफलप्रदे सर्वसत्ववशंकरि सर्वजगत्क्षोभकरि
हुंहुंहुं ह्रां ह्रीं क्लीं ब्लूं सः सौः क्लीं ऐं ऐं पण्णकामेश्वरी
नित्याश्री ऐं भगभुगे भगिनि भगोदरि भगमाले
भगवाञ्छे भगगुह्ये ॥

© Dharmartha Trust J&K. Digitized by eGangotri

भगवो निभग निपातिनि सर्वभगवशंकरि भगरू
पे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय
वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अ
मोघे भगविच्चे क्षुभ क्षोभय सर्वसत्वान भगेश्वरि
ऐं ब्लूं जे ब्लूं भे ब्लूं मो ब्लूं हे ब्लूं हे क्लिन्ने सर्वाणि भगा
नि मे वशमानय स्त्रीं हर ब्लें ह्रीं भगमालिनी नित्या
श्री ऐं क्रीं श्रीं सर्वकार्यार्थसाधनि वज्रेश्वरि वज्रपं
जरमध्यगे क्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे क्रीं वज्रे
श्वरी नित्या श्री ह्रीं भगवति ब्लूं नित्या कामेश्वरि श्री
सर्वसत्ववशंकरि सः त्रिपुरभैरवि विपं विच्चे क्लीं म
हात्रिपुरसुन्दर्यै नमः ॥ ज्ञानतोऽज्ञानतो वापि य
न्मया क्रियते शिवे तव कृत्यमिदं देवि कृतनाय यत
क्षमस्व मे इति नमस्कृत्य स्वाभिमतं प्रार्थ्य क्रीं
श्रीं महात्रिपुरसुन्दरि पुनराचमनीयं कल्पयामि
नमः इति पुनराचमनीयं दत्वा प्राङ्मुखवाचेणानम
इति मंत्रेण देवतागणं देव्यंगे विलीनं विभाव्य संहा
रमुद्रया मंडलस्य क्रमेणादाय घ्राय वहन्नासापु
टेन श्री देवी स्वहृदि समानीय प्राणायामं कृत्वा तस्ते
जो वह्नि तेजो एकी कृत्वा मितेशुभे सांगं भवतन
न्सर्वं पूजा जाप्यं समरेश्वरि इति पठित्वा वामाम्भन

© Dharmartha Trust J&K. Digitized by eGangotri

रभेदेन कामकलाध्यानं कृत्वात्मानं तत्स्वरूपं भावये
त् ततः पश्चाद्योनित्रिकोणवृत्तमण्डलं कृत्वा तन्मण्डले
पेंव्यापकमण्डलाय नमः इति पुष्पैः संपूज्य विमाल्यपु
ष्पं गृहीत्वा ऐं ऐं ऐं ऐं फ्रीं उच्छिष्टचाण्डालिनिमातंगि
सर्ववशंकरि शोषिकायै नमः इति मण्डलोपरि पुष्पं
त्यजेत् ततो निर्माल्यं शिरसि धृत्वा नैवेद्यं भुक्त्वा यथा
सुखं विहरेत् ॥ इति श्रीविद्यापूजापद्धतिः समाप्ता ॥
वावाहीनं च महोत्सवे पवित्रे च मुक्ताहृष्या प्रपूजयेत्
नार्चयेद्वाममार्गेण अनाचारेण नार्चयेत् आरभ्य वि
दुस्थानं च पश्चात्कामकलां यजेत् वाम्नीं तृतीयभागे
तत्सुन्दरीं चतुरस्रके आकर्षणीं पंचमी च षष्ठे कामे
श्वरीं यजेत् वसुपत्रे च भैरवं षोडशारे कुले श्वरीं
पुष्पांजलित्रयं दत्वा जपेन्मंत्रमनन्यधीः एतदेव भवे
न्नित्यं मस्तके मस्तके त्यजेत् अपर्वणि तस्मरेन्मंत्रं योनि
भक्तिसमन्वितः कन्यापीठे अपर्वणि तु सेन्मंत्रं योनि
भक्तिसमन्वितः कन्यापीठे न्यके च घटे गन्यासमाच
रेत् नजपेदेसवोना मो श्राके: शोचेन दुष्यति श्रीक
मे अन्यत्र योगपूजाको वा शुचिः वाप्यशुचिर्वा शुचि अका
लेष्वप्यथवा काले अधिकारी सदा भवेत् योगपूजाको न मनसा
प्रसीद त्रिपुरे प्रभो तेन संतुष्टदैवतः सर्वमन्त्रसाधकः य
सिद्धो भू।

© Dharmartha Trust J&K. Digitized by eGangotri

पतिर्वापिनाप्नोति ``` समाथकः सनत्कुमारसंहि
तायां। स्तनकोटीवरारोहेन त्यजेत्तित्यसृजनं महाग
रुनिपातेन समाप्तानि परित्यजेत अतरूर्ध्वं त्यजेद्देवि
सातकः पातकी भवेत्॥ अथ कल्याणिस्तोत्रं। कल्या
णवृष्टिभिरिवामृतपूरिताभिः लक्ष्मीस्वयंवरणमंग
लदीपिताभिः सेवाभिरंबतवपादसरोजमूलेनाका
रि किंमनसि भाग्यवतांजनानां ।१। एतावदेवजननि
स्पृहणीयमास्ते त्वद्वन्दनासु सलिलस्थगितेपि नेत्रं॥
सान्निध्यमुद्यदरुणार्कसोदरस्यत्वद्विग्रहस्य सरया
मयया स्वतस्य २ ईशित्वभावकलुषाकृतिनाम संविद्र
लादयः पुनिपुगंप्रलयाभिभूताः एकस्सएवजननि
स्थिरसिद्धस्तेयः पादयोस्तव समर्प्पणानि करोति ३
व्यामहृत्रिपुरसुन्दरिताव कीयं काठिण्यकन्दलित
कांतिभरं कटाक्षं कन्दर्पभावसुभगाः खलुभक्ति
भाजः संमोहयंति तरुणीर्भुवनत्रयेपि ४ ह्रींकारमे
वतव। नामगृणंति वेदैर्मातस्त्रिलोकनिलये त्रिपुरे त्रि
नेत्रे त्वत्संस्मृतौ यमभटादिभयं विहाय नन्दन्ति नन्द
नवने सहलोकपालैः ५ हंते पुरामादिवलंपरिपूर्य
मानः प्राकृः कथंनुभवितागवलस्यवेगः नाथाम
नायघटिमानतिदं नवारं देहस्य प्राणस्य दहनमवधीन

श्री·
२३१
231

लस्य ९ सर्वज्ञतां सदसि वाग्वदनां प्रभूतो देवि त्वदंघ्रि
सरसीरुहयोः प्रणामः किंचित्स्फुरन्मुकुटमुज्ज्वलमा
तपत्रं द्वे चामरे च महतीं वसुधां ददाति १ कल्पद्रुमैर
भिमतप्रतिपादनेषु कारुण्यवारिधिभिरंब भवत्कटा
क्षैः आलोकय त्रिपुरसुन्दरि मामनाथं त्वय्येव भक्तिभ
रितं त्वयि दत्तदृष्टिम् ८ हन्तेतरेष्वपि मनांसि निधाय
चान्ये भक्तिं भजंति किल पामरदैवतेषु त्वामेव देवि म
नसा हमनुस्मरामि त्वामेव देवि शरणं जननि त्वमेव
लक्ष्येषु सत्स्वपि तवास्य विलोकितानां मामालोकय त्रि
पुरसुन्दरि मां कथंचित् नूनं मयापि सदृशः करुणै
कपात्रं मातो जनिष्यति जनो न च जायते वा १० ह्रीं ह्रीं
मिति प्रतिपदं जपतां तवाख्यां किं नाम दुर्लभमिह त्रि
पुराधिवासे मालाकिरीटमदवारणमाननीया
न्सेवते वसुमती स्वयमेव लक्ष्मीः ११ संपत्करा
णि सकलेन्द्रियनन्दनानि साम्राज्यदानकुशलानि स
रोरुहाक्षि त्वत्सेवनानि दुरिताहरणोद्यतानि मा
मेव मातरनिशं कलयन्तु नान्यम् १२ कल्पोपसंहृ
तिषु कल्पितताण्डवस्य देवस्य खण्डपरशोः परभै
रवस्य पाशांकुशैक्षवशरासनपुष्पबाणा सा
साक्षिणी विजयते तव ॥०॥०॥ ०॥ ०॥ ०॥

© Dharmartha Trust J&K. Digitized by eGangotri

वभक्तिरेका २४ ह्रींकारमेवतवधामतदेवरूपंतन्नाम
सुन्दरिसरोजनिवासशीले यत्तेजसापरिणतिंविय।
दादिभूतसंपमनोतिसरसीरुहसंभवादि २५ ह्रींकार
त्रयसंपुटेनमहतामंत्रेणसन्दीपितंस्तोत्रंय:प्रतिवास
रंतवपुरोमातर्जपेन्मंत्रवित् तस्यक्षोणिभुजोभवंति
वशगालक्ष्मीश्चिरस्थायिनी वाणीनिर्मलसूक्तिभा
वभरितानागतिंदीर्घंयश: इतिश्रीमहात्रिपुरसुंद
रीस्तोत्रंसमाप्तम्। अथत्रैलोक्यमोहनकवच॥ श्रीदे
व्युवाच। श्रीमत्त्रिपुरसुन्दर्यायायाविद्या:सुदुर्लभा:
कृपयाकथिता:सर्वा:श्रुताश्चाधिगतामया प्राणनाथा
धुनावृहिकवचंमंत्रविग्रहं त्रैलोक्यमोहनंवेतिनामत:
कथितंपुरा इदानींश्रोतुमिच्छामिसर्वार्थंकवचस्य
व श्रीईश्वरउवाच। शृणुदेविप्रवक्ष्यामिसुन्दरिप्रा
णवल्लभे त्रैलोक्यमोहनंनाममहाविद्योघविग्रहम्
यद्धृत्वादानवान्विष्णुर्निजघानमुहु:मुहु: सृष्टिंवित
नुतेब्रह्मायद्धृत्वापठनाद्यत: संहर्तीहरयतोदेवीदेवे।
शोवासवोयत: धनाधिप:कुवेरोपियत:सर्वेदिगी
श्वर: नदेयंपरशिष्येभ्योदेयंशिष्येभ्यएवहि अभ
क्तेभ्योपिपुत्रेभ्योदत्वामृत्युमवाप्नुयात् श्रीमत्त्रिपुर
सुन्दर्या:कवचस्यऋषि:शिव:छन्दोविराट्देवताचदे।

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीत्रिपुरसुन्दरी धर्मार्थकाममोक्षेषु विनियोगः प्रा॰
कीर्तिताः ॥ शिरो मे वाग्भवा पातु कएईलह्रीं स्वरूपकं
हसकलह्रीं ललाटे च पातु कामेश्वरादिमः हकहल
ह्रीं चक्षुषो पातु मे काममध्यमः कहयलह्रीं श्रुती पा
तु महामोक्षप्रदायका हकलसह्रीं शक्तिबीजे पातु
जिह्वां च पंचमी सदनं सकलं पातु पंचकूटेश्वरं सदा १
कएईलह्रीं घ्राणं मे पातु कामेश्वरी मम हसकहल
ह्रीं कण्ठं पातु भगवती मम सकलह्रीं शक्तिबीजे स्क
न्धौ पातु परात्मिका कामेशोपासिता देवी कण्ठदेशं
सदावतु कामादिषोडशी पातु भुजौ त्रिपुरसुन्दरी ता
रादिषोडशी पातु करौ वामादिषोडशी मायादिका हृ
दं पातु स्तनौ वाग्वादिषोडशी पार्श्वौ परादिका पातु
वाटौ श्रीसुन्दरी मम हसकलह्रीं पातु पृष्ठं हसकह
लह्रीं सदा कुक्षिं पातु कामराजः सकलह्रीं सदा
वतु लोपापंचदशी देवी मध्यदेशं च रक्षतु क
एईलह्रीं नाभिं पातु हकएईलह्रीं कटिं पातु।
शक्तिनी च सकएईलह्रीं सदा पातु मां मनु नाश।
ध्या सुन्दरी मां सदावतु सहकएईलह्रीं तु हक
गुल्फं सदावतु सहकहएईलह्रीं गुह्यं पायात्।
तु हसकएईल ॥ ० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रींजानुनीपातुचेन्द्रराणराधिताचमाम् हसकएईल
ह्रींतर्जंगायुग्मंसदावतु हसकहएईलह्रींगुल्फ।
युग्मंसदावतु हसकएईलह्रींपादंपायात्त्रिपुरसुन्दरी
ऊवेराराधिताविद्या सर्वांगंमासदावतु कएईलह्रीं
त्वप्राच्यांसदामांपरिरक्षतु॥ हसकहलह्रींयाम्येपा
तुमासुन्दरीपरा अगस्त्यापासिताविद्याचक्रस्यामांस
दावतु सएईरलह्रींचनित्यानैऋत्यांमेसदावतु सह
कहलह्रींपातुप्रतीच्यांसकलह्रींसः पातुमांत्रिपुरादे
वीनन्दिकेनप्रपूजिता कएईलह्रींवायव्येहसकहल
ह्रींमथोत्तरे सकलकह्रींऐशान्यांसुन्दरीमांसदावतु
इन्द्राणपूजितासामांश्रीमत्त्रिपुरसुन्दरी हसकलह्रीं
सहकलह्रींसकहलह्रींसर्वपूज्यासुन्दरीमेसर्वांगं
परिरक्षतु हसकलह्रींहसकहलह्रींसकलह्रीं।
पायाद्ब्रह्माणीमांदेवीश्रीमत्त्रिपुरसुन्दरी हसकल
हसकहलसकलह्रींपाताले वसुधकूटाशंकरी।
यासदामांपरिरक्षतु हसकलह्रींआधारो हसक
हलह्रींशिरः सकलह्रींपातुनाभिं सएईलह्रींग्र
नाहतं सहकहलह्रींकंठं सकलह्रींमनोभुवम्
षट्कूटावैस्वीमाचपातुमांसुन्दरीपरा कएईल
ह्रींहसकहलह्रींसकलह्रीं दुर्वासमाप्रपूज्याच

© Dharmartha Trust J&K. Digitized by eGangotri

पातुमांदिव्यसुन्दरी कह्रएईलह्रींहकएईलह्रींस
कएईलह्रीं कोथेनपूजितादेवीविदिव्यमांसदावतु।
हसकलह्रीं हसकहलह्रींसकलह्रीं महाज्ञानम
यीपातुमांमहाषोडशीपराश्रीमायामदनोवाग्भीप
रातावंशिवप्रिया हरिप्रियात्रिकूटाख्यापरावाग्भीम
नोभवः मायालक्ष्मीःमहाविद्यासावीज्ञाषोडशीप
रा। सर्वांगेमेसदापातुश्रीमत्त्रिपुरसुन्दरी कामोमा
यापराबालात्रिकूटाखीभगांकुशे कालीकामक
लाकूर्चः सर्वदोप्रणवःप्रिये श्रीमहाषोडशीपातु
याख्याताभुवनेश्वरि ज्ञानेनसततं— ह्रारापाशिव
स्यासर्वतोवतु श्रीमहाषोडशीपूर्णाप्रियादेव्याप्रपू
जिता यस्याविज्ञानमात्रेणमृत्युमृत्युर्भवेत्स्वयं ब्रह्मा
दयाःसर्वीब्रह्मसापिमामभितोवतु इतितेकथितं
देविब्रह्मविद्याकलेवरम् त्रैलोक्यमोहनंनामकव।
चंब्रह्मनिर्मितं समस्तमहाविद्यास्तत्रादौकथिताप्रि
ये तासांप्राणात्मावत्ययायायाविद्याःसुगोपिताःबहु
नाकिमिहोक्तेन श्रीमहाषोडशीपरा प्रकाशितामहा
देविवाहछालोपुनःपुनः महाविद्यामयंब्रह्मकवचं
मन्मुखोदितं गुरुमभ्यर्च्यविधिवत्कवचंप्रपठेत्ततः त्रिःस
कृत्वायथाज्ञानंसोपिपुण्यवतांवरः देशिकःसर्वविद्यास्य
धिकारी

© Dharmartha Trust J&K. Digitized by eGangotri

जपादिषु देवीमभ्यर्च्य विधिवत्पुरश्चर्यां समाचरेत्
अष्टोत्तरशतेन स्यादष्टांशं हवनादिकं ततस्तु सि।
द्धकवचः पुण्यात्मा मदनोपमः मंत्रसिद्धिर्भवेत्तस्य
पुरश्चर्यां विनाततः गद्यपद्यमयी वाणी तस्य वक्त्रात्प्र
जायते वक्त्रे तस्य वसेद्वाणी कमला निश्चला गृहे पु
ष्पांजल्यष्टकं देव्यै मूलेनैव पठेत्सकृत् अपि वर्षस
हस्राणां पूजायाः फलमाप्नुयात् आत्मानं तन्मयं
कृत्वा यः पठेत्कवचं परम् योयः पश्यन्ति तेषां त्रै
समदा मोभवेद्ध्रुवं विलिख्य भूर्जे गुटिकां स्वर्णस्थां
धारयेद्यदि कंठे वा दक्षिणे बाहौ सकुर्याद्वशं सर्वजगत्
त्रिलोकीं क्षोभयत्येव त्रैलोक्यविजयी भवेत् तद्गात्रं प्रा
प्य शस्त्राणि ब्रह्मास्त्रादीनि पार्वति माल्यानि कुसु
मान्येव सुखदानि भवन्ति हि स्पर्धामुद्धूय भवने ल।
क्ष्मीर्वाणी वसेत्ततः इदं कवचमज्ञात्वा यो जपेत्सुन्दरीं
पराम् न बलत्वप्रजप्तापि तस्य विघ्नान् सिद्ध्यति सश
स्त्रघातमाप्नोति दरिद्रो मृत्युमाप्नुयात् ॥ इति श्रीरु
द्रयामले तंत्रे देवीश्वरसंवादे त्रैलोक्यमोहनं नाम कव
चं समाप्तम् ॥ ॐ श्रीभगवानुवाच । शृणु देवि प्रव।
क्ष्यामि गुह्याद्गुह्यतमं शुभम् कवचं परमेशानि महा
श्रीत्रिपुरामयं नारायणो जगद्धाम्नि मन्त्रिये मन्परायणो

श्री॰
२२४
234

तथैवोक्तं महेशानि पुत्रेष्वपि सुगोपितं सर्वतंत्रेषु
यत्नोक्तं यत्नोक्तं यामलेष्वपि डामरेषु च यत्नोक्तं तदे
तद्भूतलं शुभे एतद्गोप्यं प्रयत्नेन स्वविद्यासिद्धिकाम्य
या नवविद्यात्मकं ज्ञाने सर्वकामफलप्रदे देवि गुह्य
तमं विभद्रकैस्मे चित्प्रकाशयेत् तत्रैवैशाखिके ज्ञाने
वीरवंद्ये महेश्वरि अकोणप्रमोदिनीशे विष्णुदेवरके
तथा नक्षत्रचिन्मया प्रोक्तं सत्यं सत्यं पुनः पुनः एतत्प्र
दिव्या देवेशि जरामृत्युविनाशनं श्रीचक्रं पूजयित्वा
तु विद्यां जप्त्वा शुभप्रदाम् कर्तं पालयितं दृत्तं समो।
स्मि वीरवंदिते तस्माद्विद्यां समासाद्य कवचं सर्वमा
चरेत् अन्यथा सिद्धिहानिः स्यात् एतत्कवचमुत्तमम्
कवचस्यास्य देवेशि त्रिदेवा ऋषयः स्मृताः छन्दोऽप्य
नुष्टभो ज्ञेयः देवता वैन्दवीश्वरी विनियोगो महेशा
नि त्रिवर्गफलसाधने॥ पातु मामनिशं नित्या महा
त्रिपुरसुन्दरी नित्याकामेश्वरी पातु पातु मां भगमा
लिनी नित्यक्लिन्ना च मां पातु भेरुण्डा पातु मां सदा
वह्न्यादिवासिनी पातु महाविद्येश्वरी च माम् शि
वदूती च मां पातु त्वरिता पातु मां सदा कुलसुन्दरी।
मां पातु नित्या नीलपताकिनी विजया सर्वदा पा
तु पातु मां सर्वमंगला ज्वालामालिनी च ॥ ०॥

© Dharmartha Trust J&K. Digitized by eGangotri

मांपातु विविद्यासु सिद्धिदा श्रीचक्रे पूजयितासु सर्व।
मोक्षप्रदायकम् कुलकुण्डे सदा पातु सर्वेशी कुल।
कामिनी सहस्रारे च मां पातु देवी ब्रह्मस्वरूपिणी यन्त्र
पीठेश्वरी मंत्रे च पायात् त्रिपुरसुन्दरी दशादिक्षु सदा।
पातु सृष्टिर्मां पातु सर्वदा आवाहनो सदा रक्षेत् पातिस्थे।
कादशात्मिका एककूटा च मां पातु त्रिकूटा पातु सर्व
दा पंचकूटात्मिका रक्षेत् पंचमी पातु सर्वदा विद्यापंच
दशी पातु पातु गोप्यासु षोडशी षट्कूटावर्ते मां नि
त्यं नित्यमेकादशी च माम् नवयोनौ सदा पातु कूटत्रय
निवासिनी स्वभावती मधुमती शक्तिबीजात्मिका च
या पायात् कामेश्वरी देवी आधारे कामपर्वते पूर्णगिर
श्वरी पायाद्धृदये परमेश्वरी जालन्धरी भ्रुवोर्मध्ये
पातु मां भगमालिनी उड्डीयाने सदा शीर्षे महात्रिपुर
सुन्दरी सर्वतोभद्रा वशाकर्षणवशोन्मादमहांकुशाः
खेचरी बीजयोन्याख्याः पान्तु मां सर्वतो भयात् वागी
श्वरी ज्ञानशक्तिः वाग्भवी पातु मां सदा कामराजी
कामकला पातु मां कामरूपिणी शक्तिबीजे सदा पा
तु शक्तिः स्वशक्तिरूपिणी अकारादि टतो हक्षपयशा
दयवर्गगाः पातु मामनिशं देव्यः कुलाचारस्य सिद्ध
ये हसौः साध्यात्रिकूटया लक्ष्मीयोनिः समन्विता।

© Dharmartha Trust J&K. Digitized by eGangotri

पायान्मामखिलामायात्कुलक्रमविलंघनात् कुला
चारेचयत्किंचिद्वैगुण्यंपूजनेजपे भावनासुचयत्कि
चित्कुलक्रमेविशोधने कुलाकुलगतोयश्चकुल
योषित्सुपूजनेपातुमामनिशंदेवीप्राणविद्यापुटीकृ
ता पावकाणांसदापातुदुस्त्वापेनसर्वदा सर्ववश्य
करःपातुपापात्पाशविमोचनः जम्भमोहवशास्त
म्भपदैःसार्धमहांकुशः पातुमामखिलाल्लोभा।
द्रोगशोकभयाद्भवात् देव्याःश्रीचक्रमध्यस्थाःप्र
कटाख्याश्चमातरः गुप्तागुप्ततराश्चैवसंप्रदायमयु
वाः कुलकौलिनिगर्भाश्चरहस्यातिरहस्यगाः परा
पररहस्याश्चयोगिन्यः पातुसर्वदा त्रिपुरामांसदा
पातुपातुमांत्रिपुरेश्वरी सुन्दरीमांसदापातुत्रिपुरावा
सेश्वरी वासिनीत्रिपुरेः सार्धंश्रीदेत्रिपुरयासह त्रि
पुरामालिनीपातुसिद्धिस्त्रिपुरसूविका पातुमामनि
शंविद्यायादेवीत्रिपुराम्बिका चक्रश्चकेश्वरीभिश्च
देवीभिःपरिपूजिता पायान्मामखिलाद्दुर्गाद्दुष्टग्रह
गणादपि श्रीमत्पदैर्महापूर्वीपायान्मांवैन्दवीश्वरी
स्वलविभ्रमहेपायाः कृतसंपुटकैःकरैः यस्या
पपीठनिकटेनिवसन्तिमहाम्बिकाः ययोदेवा।
नमानानियस्यारूपनिरूपणम्॥ यस्येदं॥

© Dharmartha Trust J&K. Digitized by eGangotri

कवचं गुह्यं गोपनीयं प्रयत्नतः इदं तत्कवचं देव्याः

शुचिशुद्धतमानसः यः पठेत्प्रयतो नित्यं सौभाग्यः स

र्वजंतवः धारयेयस्तु यत्नेन दुर्गमे रणसंगमे पदाः प

राङ्मुखा यांति विना युद्धेन विद्रुताः अथवा राजसद

नो पठित्वाथा प्रवेशयेत् दासवद्वशगो राजा सत्यं स

त्यं वदाम्यहं पूजने च जपे ध्याने नर्पणे वु समर्पणे यो

शक्तः सोपि कवचस्मरणात्सिद्धिदा भवेत् इदं कव

चराजेन्द्रं मंत्रं सद्गुरुमेव च सर्वथा गोपयेयत्नात् यदी

च्छेदात्मनो हितं कारागृहगतो वापि बद्धो वा निगडै र्व

डोरपि नाना दुःखाग्निसंतप्तः पतितो दुर्गवर्त्मनि स्म

रणात्कवचस्यास्य नरो मुच्येत संकटात् ॥ इति श्रीकु

मारप्रबोधकतंत्रे निरुक्तं श्रीसौभाग्यकवचं समाप्तं

अथ पंचमी स्तवराजः तत्रादौ यागनयत्र लिखितमस्ति

अथ काम्यानि ॥ तदुक्तं स्वतंत्रतंत्रे ॥ नित्यं नैमित्तिकं

काम्यं सापेक्षं पूर्वपूर्वतः अन्यथा चेद्भवेद्विघ्नकरो

न्यापत्परम्परा ॥ तदुक्तं वीरतंत्रे ॥ नित्याचारवतो मंत्री

कुर्यात्रैमित्तिकार्चनम् नैमित्तिकार्चने सिद्धः कुर्या

त्काम्यमां वडितम् तदुक्तं मत्स्यसूक्ते द्वादश्यां पूजये

द्विघ्नं चतुर्दश्यां यमुपापातिं अष्टम्यां पूजयेच्छक्तिं स

र्वसिद्धिमभीप्सतः अष्टम्यां च चतुर्दश्यां पूजयेच्छक्तिं

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰ २३६

236

सर्वप्रयत्नेन यद्यत्प्रार्थयते मंत्री तत्तदाप्नोति निश्चयः
लभते मंगलां वाणीं कुलाष्टम्यां महायजेत अत्र नि॰
त्यार्चनानंतरमेव नैमित्तिकं कार्यम यत्र कालनिय
मो दृश्यते तत्र मासे मासार्थं ` ` ` ` नित्यकाभ्यन्त
ष्ठानं करणीयम तथा चोक्तं रुद्रयामले मासाथ मध्य
वा मासे द्विगुणं त्रिगुणं तथा यावत्फलाभिमान्योगी
तावदेवं समाचरेत नैमित्तिके तथा काम्ये फलाभि
माण्डलावधिः नचेत्तद्द्विगुणं कुर्याद्यथा स्यात्फलभा
क्सुधीः अष्टम्यां पूजनं देव्याः सर्वकामफलप्रदं देवा
पुष्पं वीजपूरं च गन्धिपरिमिश्रितं मिश्रीकृत्य बलिं
दद्यादष्टम्यां तु विशेषतः स्वर्णमालां महादेव्यै दद्या
त्कन्यै विशेषतः फलेरीरं तथा दद्यात् दधि दद्यात्सशर्क
रम तस्मात्सर्वप्रयत्नेन संपाद्य पूजयेच्छिवे आज्ञासि
द्धिमवाप्नोति जपापुष्पं च वर्भरी चन्दनं चारु कुसुमं
दद्याच्छ्रेतापराजितां अर्थं दद्याद्विशेषेण नित्यपूजा॰
सु सर्वदा अशोत्तरशतेनाप्ये यावज्जीवितसंख्यया अ
थात्यन्तं प्रवक्ष्यामि सर्वकामार्थसिद्धये गोरोचना
दिभिर्द्रव्यैर्यंत्ररत्नं समालिखेत अतीव सुन्दरं रम्यं
तन्मध्ये प्रतिमां वराम जपनीं कामसहितां म॰
हावीजविदर्भितां विलिखेत्तन्नाना देवीं त ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नाष्टमसहस्रकः अहष्टपूर्वांदेवेशि अश्रुतपूर्वानतुले
भा राजकन्याथवाचांवीभयलज्जाविवर्जिता आया
तिसाधनेसम्यक्कंन्नमूढामती प्रियेमहावीजेकाम।
राजवीजे ॥ अथवादेवदेवेशि पदेकामर्वंवाहतआ
रभ्ययावन्मध्यंमहेश्वरी अकारादिक्षकारान्तेमातृव
र्णैर्विविन्नयेत पूजयेद्वात्रिसमयेकुलाचारक्रमेण
यः तत्क्षणान्महादेविसाधकःखेचरोभवेत पूज
यित्वामहेशानिमहदेकतरोगिरौ अजरामरतामप्य
श्नुतेनात्रसंशयः महाभूतदिनेचापिश्मशानेय
दिपूजयेत पूर्वयनिशिदेवेशिसर्वसिद्धिमवाप्नुया।
त महाभूतदिनेकृत्वाचतुर्दशीपूर्ववश्रुतयथोक्त
वत ॥ तथा ॥ चक्रमध्यगतोभूत्वासाधकश्चिंतयेत्तथा
तयन्तस्थंसहस्राणमात्मानमरुणंतथा साध्यम
प्यरुणीभूतंचिंतयन्परमेश्वरीम् अनेनक्रमयोगेन
स्वयंकन्दर्परूपवान सर्वसौन्दर्यसुभगः सर्वलोकव
शंकरः सर्वत्क्षोपचारैश्चमुद्रासहितविग्रहः एवंप्र
पूजयेद्यस्तुयस्यनामविदर्भितम् सभवेद्दासवद्देवि
धनाद्योवापिभूपतिः चक्रमध्यगतेरूपैनामयस्या
स्तुयोषितः अहष्टांनामहेशानियोनिमुद्राधरःप्रये
रक्ताटानयतेश्रीघ्रयहिताणिंराजकन्यकाम् राजकन्या

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰ मप्सरसं खेचरीं सुरकन्यकाम् विद्याधरीं दिव्यरूपां
२६॰ ऋषिकन्यां परस्त्रियां मदनोद्भवसंतापां स्फुरद्रत्नवदन
237 मण्डलं कामबाणप्रभिन्नांतःकारणं लेलिचक्षुषी
म् महाकामकलाध्यानयोगाभ्यासरवल्लिते होम
येत्स्वर्गभूलोकपातालतलघोषितः रोचनाभागा
मेकं च भागमेकं च कुंकुमं अश्वभागद्वयं देवि चन्दनं
मन्दयेत्समं पक्वतिलकं कुर्यात्त्रैलोक्यवशकार
कं अष्टोत्तरशतावृत्त्या मंत्रयित्वा वर्णेनयेत् राजानं न
गरं ग्रामं येनयेन यच्चप्स्यते मंत्रिणापारमेश्वानित
त्यं वेनस्यवश्यं नद्यापुष्पफलं गन्धं पर्णं वस्त्रं वरा
नने शतमष्टोत्तरं जप्त्वा यस्मै यस्मै प्रयच्छति सवश्यो
जायते देवि नात्र कार्या विचारणा स्त्रियास्तु सकला
वश्यादासीतत्त्वामवंत्यपि ह्हाकर्षणमेतत्तु कश्चि
तन्नान्यथा भवे रहस्यस्थानके देवि लिखेद्रोचनया॰
भूर्ति वारुह्मगारवेश्याढ्यः सर्वाभरणभूषितः प्रति
मोमलर्दीं कीलां विलिख्य मनोहरां नद्वालकाद्दृ॰
त्वामियोनिमंडलयोजितो जम्मनाममहाविद्यामंकुशा
र्तां विद्दिधितां सर्वसन्धिषु देहस्य मदनातुरमालिखेन
नीललटास्त्रिमनुष्यामं विन्तेयेरे हसंधिषु तदाकामिम
त्लोभूतमायांदेवीस्वरूपकः सद्यांतलोभनीवद्धामंत्र

© Dharmartha Trust J&K. Digitized by eGangotri

मष्टशतं जपेत् नियोज्य दहनागारे चन्द्रसूर्यकरात्मके
ततो विकलसर्वांगी कामभावेन पीडिता अनन्यमनसं
प्रेमभ्रममाणं सदालसाम् एवमाकर्षयेद्देवीं योज
नानां शतादपि जन्मसाध्याक्षरं नामसाध्यस्य जन्मना
मच इत्येकमेवेति काश्चित् महाविद्यामूलमंत्रः अ
कथा ः क्लीं मदनाक्षरकामबीजं क्लीं ककार इति काश्चि
त् तदामेति साध्यदिशाभिमुख इत्यर्थः दहनागार
स्त्रिकोणं मातृकां विलिखेत् चक्रबाह्यतः सकला।
शिरो भूर्जपत्रे स्वर्णपात्रे रौप्यपात्रे अथवा ताम्रपात्रे सौ
म्यार्थं सर्वजनानां व्याघ्रादीनां विशेषतः मातृकाणी
मिति मातृकाणि विदर्भितः नामाक्षरेणावेष्टित इत्य
र्थः इति संप्रदायः॥ तथैवोत्तरवाक्यस्मरणात् तथै
व मातृकायुक्तं स्वमंत्रावक्रमंडितं कर्पूरकुंकुमाद्यै
श्च अजरामरतां लभेत् स्वमंत्रेति मातृकाक्षरद्वयेन
तपकं नामाक्षरं ततो मातृकाक्षरद्वयं एवं समस्तमातृ
कामंत्रेणावेष्टितमित्यर्थः अनेनैव विधानेन रोचना
गुरुकुंकुमैः लिखेत् चक्रयोगेन साध्यनामवशान्ने
विदर्भितं स्वनाम्नात यस्मिन् कस्मिन्नपि स्थिता स्याव
रं जंगमं वापि सकलं वशमानयेत् चक्रयोगेन प्राग्
क्तदेवताचक्रयोगेनेत्यर्थः महात्रिपुरसुन्दर्याः का।

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
२३८
238

मस्कुटेनभाव्यता एकमेकमवष्टभ्य साध्यनामाह्वरा
णिच वहिश्वाविलेवौगैर्मातृकायाः प्रवेष्टयेत हेम
मध्यगतं कृत्वा च्छिलायां वामके भुजे धारयेयत्र कु॰
त्रापि त्रैलोक्यवशकारणं पूर्वक्रमेणानं ... स्नापसन्त
र्प्यशीलने मध्यवत्प्रेष्येवापिचन्नदिहीनि थापयेत
महाक्षोभो योषितां च जनानां मनस्तामपि नश्येव पूर्व॰
दृष्टानां पुनः स्थानेव जायते॥ पूर्वक्रमेण एकमेक॰
मवष्टभ्येत्यादिक्रमेण अवथानं ग्रंतरंगत्वात् पूर्वक्र
मेण जन्मनाममहाविद्या ग्रंकुशेनेत्यादिप्रकारेण
त्यर्थः॥ इति कश्चित॥ तथा॥ एतन्मध्यगतां पृथ्वीं
सशैलवनकाननां ज्वलन्तीं सर्वराजेन्द्रमण्डितां सागा
राम्बरां मामवंकं चिन्तयेयः सोसाक्षात्सोपमो भवेत
कटाक्षलेपमात्रेण नार्यस्तस्य वशगाः प्रिये राजानो ब्रा॰
ह्मणाः वैश्याः शूद्राः पशवो गजाः दृष्ट्वाकर्षयते
देवि त्रैलोक्यं सचराचरं दृष्ट्वा विशं नाशयेत्मन्त्रका
यी विचारणा भूतप्रेतपिशाचांश्च ज्वरांश्चातुर्थिका
दिकान शूलगुल्मादिरोगांश्च दृष्ट्वानीशयति
तत्क्षण एतस्मिन्नुरसभगे राज्ञो संपूजितं शिवे।
योमनानां शताद्देवि सम्यगाकर्षयेत्स्त्रियाम श्री॰
कीलीरेण संपुटं कुर्य्यादकारमेनया रोचनाकुंकु

मेवैलाहालकसंयुतम् कस्तूरीद्रवसंयुक्तमेकीकृ।
त्यततः परम् चक्रमेतत्समालिख्य यत्रनाम्नामदेश
रि तस्यव्याघ्रभयव्याधिविपुसर्पगजादिकम् चौरग्र
हज्वराविष्टशाकिनीडाकिनीभयं भयंनविद्यतेदेवि
पवमतस्तथा अथस्नात्वामसंयुक्तोरोचनाकुंकुमा
न्वितां निवापयेत्समाहाह्वासवक्किंकरोभवेत् पी
तद्रव्येस्समालिख्यपीतपुष्पैः समर्चयेत् पूर्वोक्ताभि
मुखोभूत्वास्तम्भयेत्सर्ववादिनं सहस्त्रवदनोदेविमू
कीभवतितत्क्षणात ॥ पीतद्रव्यंगोरचोनादि ॥ अत्रया
वयेदिन्द्रदिग्भागमिति वक्ष्यमाणत्वात्ससुक्तं ॥ तत्रदहादौष्
वेभागेस्थापयेदित्यर्थः चक्रेविन्यसितेदेवि शिमहानी।
लेवसेनच नामसंयोज्यविधिवद्वत्तिराग्निमुखोबुधः
वक्षोदग्ध्यामहेशानिमारयेद्वैरिणांशिवे महिस्ताष
पुरीषाभ्यांसमाकृष्य शेलजे गोमूत्रेणचसंलिख्य
नाममन्त्रर्भ्यपूर्ववत् शिवालवणमध्यस्थंविद्वेषण
कंभवेत् ॥ पूर्ववत् ॥ एकमेकमवष्टभ्यानिक्रमेण
नम्नामममहाविद्याक्रमेणावेत्यर्थः लवणेतिशिवा
श्रावणालवसमध्यस्थमितिचतत्रान्योपाठः ॥ आर
णालेकांचिकमितिप्रसिद्धं कृष्णरोचनयानाममध्य
स्थमिकाशिमध्यगं लंवमानेनदाकाशेप्राज्ञश्चाटव।

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰

२३९

239

कारकं महानीलीरोचनाभ्यां दुग्धलाक्षारसादिभिः
विलिख्य धारयेन्मंत्री सर्ववर्णान्वशं नयेत् अनेनैव वि
धानेन स्थापयेद्वह्निमध्यगं तेनोदकेन संस्नानः पीतं
तत्सर्ववश्यकृत् यमाशाभिमुखो भूत्वा चक्रं कुंभपदा
घेयेत् यस्य नामांकितं तस्य मंत्रहानिः प्रजायते रोचना
लिखितं चक्रं क्षीरमध्ये विनिक्षिपेत् रोचनालिखितं।
चक्रं क्षीरमध्ये विनिक्षिपेत् सर्ववश्यकरं देवि भवत्ये
व न संशयः गोमूत्रमध्यमं सम्यक् तत्स्वाटकरं भवेत्
तैलस्य चक्रराजं तु विद्वेषणकरं भवेत् ज्वलज्जलेति म
ध्यस्थं शत्रुनाशकरं भवेत् ॥ इति संक्षेपः ॥ काम्यहोमं
प्रवक्ष्यामि मंत्रीणां सर्वसिद्धिदम् मालतीजातिकाम
ल्लीकुसुमैर्मधुमिश्रितैः घृतप्लुतैः हुतैर्देवि वागीश
त्वं प्रजायते मूकस्याप्यतिमूढस्य शिलारूपस्य वाप्य
था॥ नृपापुष्पैः राज्ययुक्तैः करवीरैर्लस्याविधैः हवनान्मो
हयेन्मंत्री लोकत्रयनिवासिनः कर्पूरं कुंकुमं देवि शीघ्रं
मत्स्यमदेन हि हवनान्मदनो देवि मे त्रिगुणा विजितो भवेत्
सौभाग्येनापि विनाशेन सामर्थ्येनापि मन्त्रते चंपके पा
टले हुत्वा श्रियं प्राप्नोति निनलं श्रीगवाङ्गुग्गुलं वैव चन्द्र
मगुरुं होमयेत्तनः राजराजेन्द्रदेवानां पुरहिंवशमानये
त सर्वलोकाव शाः तस्य भवन्त्येव न संशयः चन्द्रं कर्पूरकं

© Dharmartha Trust J&K. Digitized by eGangotri

लक्षहोमाल्लभेद्राज्यं दारिद्र्यभयपीडितः दूर्वोपम
र्गध्यामनेपलांडुमधुहोमतः खेचरोजायतेयाग्रोकृत्वा
होमंचतुष्पथे क्षीरंमधुदधिहोमंद्रएषककृत्वावरा
नने आयुर्बलमथारोग्यमहासिद्धिर्जायतेन्तरेण क्रमे
णपीलनेक्षीरमधुभ्यांविघ्ननाशनं दधिमाक्षिकहो
मेनसौभाग्यंधनमाप्नुयात् पलाण्डुर्लशुनविशेषः
प्राणादूतिनयस्यप्रसिद्धिः पलानेतिचपाठः कृत्वावय
लमध्यनेमंत्रस्त्वामहेश्वरि खेचरोजायतेदेवि
यावोगत्वाचतुष्पथे इतिचतत्स्मृतीदर्शनात् पलेमां
से माक्षिकंमधु सितयाकेवलाहोमोवैरिजम्भनका
रकः सिताशर्करा होमाद्दधिमधुक्षीरन्नानाभिवीर
वन्दितो रोगहर्ताकालहर्तामृत्युहर्तानसंशयः क
मलैर्वकुलैर्होमः सम्पत्सम्पत्तिदायकः रक्तोत्पलैः
र्मंगलदर्पणराज्ञोनारीमवश्यगाय नीलोत्पलैर्महादु
ष्टावश्यमायांतिनान्यथा सितोत्पलैः श्रियंराज्यंल
भतेहवनाच्छिवे सितैस्तुशतपत्रकमलैः लक्ष्मीसौभा
ग्यमाप्नुयात् कलहारहवनात्त्रीसौभाग्यमतुलं
भवेत् पुन्नागवरहोमेनलक्षमात्रेणभूभृतः वश्या
भवन्तिसर्वत्रदशसंख्यानसंशयः पुन्नागाशोकहो
मेनकृत्वाशोहलमंगमान् अयुतत्रयसंख्येनशतसं

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
२८॰
240

ख्यान्वशंनयेत् नागरंगस्य होमेन वैश्या वश्या भवंति
हि कूष्माण्डफलहोमेन शूद्रा वश्या भवंति हि द्राक्षा
फलात्सिद्धयोष्टौ लक्षहोमान्न संशयः खर्जूरफलहो
मेन लक्षमंत्रेण भूतलेः वश्याविंशतिशोभ्याकाश्य
ताशंकरीकृता नारिकेलफलैर्होमात्सर्वसिद्धिः जाय
ते बिल्वलक्षहोमेन मंत्रज्ञो राजापरश्च वशिये पक्वाम्र
फलहोमेन लक्षमात्रेण सुन्दरि वत्सः समुद्रपर्यन्तां म
हीं वशमानयेत् पनसस्य फलैर्होमाल्लक्षेण शतभू
भुजः वश्या भवंति देवेशि नात्र कार्या विचारणा तिला
ज्यहोमाद्देवेशि कार्यसिद्धिर्भवेत्प्रिये राजिकालव
णाभ्यां तु इष्टलोकान्वशंनयेत् राजिका राजीइति प्रसि
द्धिः कुंकुमेन कृते देवि त्रैलोक्यं वशमानयेत् गुग्गु
लोः खलहोमेन सर्वदुःखानि नाशयेत् वैरिणं वश
मानयेच्चन्दनस्यापि होमतः रक्तचन्दनहोमेन वेश्या
वश्या वै पुरुषास्त्रियः कर्पूरस्य च होमेन वाग्वश्यं प्र
जायते नृगणाम् कस्तूरीहोमतो देवी राजानो रा
जमंत्रिणः वश्या भवन्ति सकला पतिव्रतान्वि
ताः प्रिये तिलतण्डुलहोमेन शान्तिर्भवति मन्दि
रे शर्करागुडहोमेन सर्वकार्यार्थसाधकः सु
तपायसहोमेन सितायुक्तेन मन्त्रिणः ।।

© Dharmartha Trust J&K. Digitized by eGangotri

त्रैलोक्यं वशमायांति धान्यसिद्धिमवाप्नुयात् नाना
विधानहोमेन धान्यसिद्धिर्भवेद्ध्रुवं सोपस्करस्य वट
कैरुपसर्गान्विनाशयेत् बंधूककुसुमैर्होमात्सर्वा
न्वै वशमानयेत् जपापुष्पैः जगद्वश्यं पलाशपुष्पैस्सु
मोहनं बकुलस्य कुसुमैः सौभाग्यं जायते मदन
दंडांगयूपहोमेन सौभाग्यं सकलं भवेत् जंबूफलैः
स्त्रियो वैश्याः कूष्माण्डैर्देवकन्यकाः श्रीफलैर्वा
लांगली मरीचैर्देवी सर्ववान्दिते रक्तखंडैः सर्वाभि
नद्धशपा राजकन्यकाः वश्या भवंति देवेशि नारिके
लफलेन वा केवलं घृतहोमेन वरदाः सर्वशक्तयः
शाकिन्यो त्रैषु कामनृपादिषु॥ तत्र स्थित्वा जपेल्लक्ष
माद्या देवी स्वरूपकः ततो भवति विद्येयं त्रैलोक्यव
शकारिणी ततो द्वितीयलक्षं तु प्रजपेत्साधकोत्तमः
पातालतलनागेन्द्रकन्यकाः क्षोभयंति तं तासां क
टाक्षजालेभ्यः संमोहं यांति साधकः तदा लक्षत्रयं
जप्त्वा साधकः स्थिरमानसः एवं लक्षत्रयं कृत्वा न
क्रियमेनस्तु चिः शुचिः लक्षत्रयं जपेद्यस्तु महापापैः प्र
मुच्यते लक्षत्रयेण पापानि सप्तजन्मभवान्यपि म
हापातकमुख्यानि नाशयेन्नात्र संशयः ततो लक्षत्रयं
जप्त्वा मंत्रयंत्रकलेवरः महापातककोटिघ्नं नाशये

© Dharmartha Trust J&K. Digitized by eGangotri

आ॰
२४१
241

त्रसंशयः॥ चतुर्लक्षजपाद्देविमहावागीश्वरोभवे
त् कुवेरइवदेवेशिपंचलक्षजपाद्भवेत् षट्लक्ष
जपमात्रेणमहाविद्याधरो भवेत् सप्तलक्षजपान्मंत्री।
खेचरीमेलकोभवेत् अष्टलक्षजपान्मंत्रीदेवपुरोणा
नसंशयः नवलक्षप्रमाणेनजपेत्त्रिपुरसुन्दरीम् रु
द्रमूर्तिःस्वयंकर्ताहर्तासाक्षान्नसंशयः सर्वविद्या
महावागीमहासौभाग्यवान्भवेत्॥ इत्यादिजपका
म्यः॥ पुरश्चरणानन्तुरंष्टध्यागभियानादिवलंविल
वेश॥ इतिश्रीचक्रवर्तिपद्मनाभविरचितायांआग
मकल्पलतायांचतुर्थःपल्लवः ॐनमःशिवाय॥
ॐअथवक्ष्येजगद्धात्रीमधुनाभुवनेश्वरीम् ब्रह्माद
योपियांज्ञात्वालेभिरेश्रियमूर्जितां लकुलेशोग्नि
मारूढोवामनेत्रार्धचन्द्रवान् बीजंतःस्यात्समा।
ख्यातंसेवितेसिद्धिकांक्षिभिः लकुलेशःहकारः
अग्निरेफःवामनेत्रःईकारः अर्धचन्द्रःनादः।
तेनह्रींइतिबीजंभवति अस्यपूजाविधिंवक्ष्येसर्व
कामार्थसिद्धिदम् प्रातःमुत्थायशिरसिस
हस्रदलकमलेगुरुंध्यायेत् प्रातःशिरसिशुक्लेऽब्जे
द्विनेत्रंद्विभुजंगुरुं इत्यादिध्यात्वा मानसोपचारैरभ्यर्च्य नमस्कुर्यात् तेन आत्म
तदर्थमनसैवकारयेत् प्रातःशिरसिमानसोपचारेणपूजयेत्

मस्कुर्यात्।

© Dharmartha Trust J&K. Digitized by eGangotri

ततो हृत्पद्ममध्ये देवीं ध्यायेत ॥ यथा ॥ उद्यद्दिनद्यु-
तिमिंदुकिरीटां तुंगकुचां नयनत्रययुक्तां । स्मेरमुखीं
वरदांकुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥ इति
ध्यात्वा ॥ मानसोपचारैराराध्य मूलमंत्रं दशधा जप्त्वा
नमस्कृत्वात्मानं तद्रूपं विभाव्य आवश्यकार्यार्थं बहिः ग-
च्छेत् ॥ इति प्रातःकृत्यं ॥ ततो मध्याह्नकाले नद्या-
दौ गत्वा मलविशोधनं स्नानं कृत्वा तिलकुशमादा-
य श्रीपरदेवतार्चनयोग्यता सिद्ध्यर्थं स्नानमहं क-
रिष्ये इति संकल्प्य विनिमज्ज्योन्माय मूलं जपन् ॐ
भगवद्रूपां श्रीभुवनेश्वरीमभिषिंचामि नमः इति वार-
त्रयं मूर्ध्नि जलं दत्त्वा पुनर्निमज्ज्य प्राणायामं ध्यानं पू-
र्ववत्कृत्वा मूलमुच्चार्य श्रीभुवनेश्वरीं तर्पयामि
स्वाहेति वारत्रयं संतर्प्य जलात्कूलमागत्य धौते वाससी
परिधायाचम्य गायत्र्या यथाशक्ति जपं समाप्य
रक्तचन्दनाक्षतजलकुसुमैस्ताम्रपात्रमापूर्य हस्ता-
भ्यां गृहीत्वा एषोऽर्घः भगवते सूर्याय नमः इत्यर्घं दत्त्वा
सूर्यं नमस्कुर्यात् ॥ ततो हृदि विद्यां भावयन् मौनी गृ-
हं गच्छेत् ॥ ततो गृहं गत्वा विगतबाह्यो पादौ प्रक्षाल्य
पूजामण्डपं प्रविश्य पूजास्थाने रक्तकंबलासनाय
नमः इत्यासनं संपूज्य तदुपरि प्राङ्मुख उदङ्मुखो वा प-

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
२४२
242

विघ्नवामकपोलेगुरुभ्योनमः दक्षकपोलेगणेशा
यनमः मध्येभुवनेश्वर्यैनमः इतिनमस्कृत्यभूतशु
द्धिंकुर्यात मूलाधारात्सर्वतत्वसहितांकुण्डलिनींस
हस्रदलपद्मेनीत्वावामकुक्षौअनादिभवसंचितंपाप
पुरुषंध्यायेत् ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्व
यम् सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं तत्संसर्गि
पदद्वन्द्वंसंगप्रत्यंगपातकं उपपातकरोमाणंरक्तश्म
श्रुविलोचनं खड्गचर्मधरंकृष्णंवामकुक्षौविचिंतये
त् इतिविचिंत्ययमितिवायुबीजंषोडशवारंजपन्वा
मनासापुटेनवायुनादेहमापूर्यनासापुटौधृत्वा पुनर
पियंइतिवायुबीजंचतुःषष्टिवारंजपन् कुम्भकंकुर्वन्
पापपुरुषेणसहशरीरंसंशोष्यपुनरपियमितिवा
युबीजंद्वात्रिंशद्वारंजपन् दक्षिणनासापुटेनवा-
युंरेचयेत् ततोरंइतिवह्निबीजंषोडशवारंजपन्
दक्षिणनासापुटेनवायुनादेहमापूर्यनासापु
टौधृत्वापुनरपिरमितिवह्निबीजंचतुःषष्टि-
वारंजपन् कुम्भकंकुर्वन् पापपुरुषेणसह-
शरीरंसदह्यपुनरपिरंइतिवह्निबीजंद्वात्रिंशद्वा
रंजपन् वामनासापुटेनभस्मनासहवायुंरेचये
वामनासापुटेनभस्मनासहवायुंरेचय ॥ ०॥

© Dharmartha Trust J&K. Digitized by eGangotri

ततः ठं इति चन्द्रबीजं षोडशवारं जपन् वामनासापु
टेन वायुना देहमापूर्य नासापुटौ धृत्वा वमिति वरुण
बीजं चतुःषष्टिवारं जपन् कुंभकं कुर्वन् ललाटचन्द्रा
द्गलितामृतधारामंत्रीवोहृष्टिं निपात्य पुनरपि लमिति
पृथिवीबीजं द्वात्रिंशद्वारं जपन् शरीरं दृढं विचिंत्य द
क्षिणनासापुटेन वायुं रेचयेत् ततो हृदि हस्तं दत्वा।
आं ह्रीं क्रों हंसः मम प्राणा इह प्राणाः एवं ५ मम जी
व इह स्थितः मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्र
घ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्रति
ष्ठां कृत्वा हृत्पद्मे देवीं समानीय तत्वानि यथास्थानं स्थाप
येत् इति भूतशुद्धिः ततो मूलमंत्रेण प्राणायामं कुर्या
त्। यथा॥ क्लीं इति षोडशवारं जपन्॥ वामनासापु
टेन वायुना देहमापूर्य नासापुटौ धृत्वा ऐं इति चतुःष
ष्टिवारं जपन् कुम्भकं कुर्वन् पुनरपि क्लीं इति द्वात्रिंश
द्वारं जपन् दक्षनासापुटेन वायुं रेचयेत् इत्येकः प्राणा
यामः एवं क्रमेण यथाशक्ति प्राणायामं कुर्यात् आदौ
संहारक्रमेण मातृकान्यासं पश्चात् सृष्टिक्रमेण मातृ।
कान्यासं पश्चात्सृष्टिक्रमेण मातृकान्यासेन संहारक
मर्म्महा॥ ह्लं नमः परमात्मने स्टं टपापुटे इत्यादिक्र
मेण सृष्टिक्रममाह॥ ॐ अं नमो ललाटे इत्यादिक्रमे

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
२४३
243

णमातृकांन्यसेत ततोः स्यभुवनेश्वरीमंत्रस्य शक्त्य
ऋषिः गायत्रीच्छन्दः श्रीभुवनेश्वरीदेवता अभीष्ट।
सिद्ध्यर्थेविनियोगः शिरसिशक्त्यऋषयेनमः मुखे
गायत्रीच्छन्दसेनमः हृदिश्रीभुवनेश्वर्येनमः कृ
तांजलिः ममाभीष्टसिद्ध्यर्थेजपेविनियोगः॥ ततोमू
लमंत्रेणव्यापकंकुर्यात मस्तके ॐहृल्लेखायैनमः
मुखेपंगगनायैनमः हृदये ॐरक्तायैनमः गुह्येक
करालिकायैनमः पादये ॐमहोच्छुष्मायैनमः ॐ
पउड्डे ॐहृल्लेखायैनमः इत्यादिक्रमेणन्यसेत ऊर्ध्व
मुखे ॐहृल्लेखायैनमः पूर्वमुखेपंगगनायैनमः द
क्षिणमुखेॐरक्तायैनमः उत्तरमुखे ॐकरालिकाये
नमः पश्चिममुखेॐमहोच्छुष्मायैनमः इतिवि।
न्यस्यकरांगन्यासंकुर्यात॥ यथा॥ ह्रांअंगुष्ठाभ्यांन
मः ह्रींतर्जनीभ्यांनमः ह्रुंमध्यमाभ्यांनमः ह्रैंअना
मिकाभ्यांनमः ह्रौंकनिष्ठिकाभ्यांनमः ह्रः करतल
करपृष्ठाभ्यांनमः ह्रांहृदयायनमः ह्रींशिरसेस्वाहा
ह्रुंशिखायैवषट् ह्रैंकवचायहुम ह्रौंनेत्रत्रयाय
वौषट् ह्रः अस्त्रायफट् इत्यूर्ध्वोर्ध्वंतालत्रयंछो।
टिकाभिर्दशदिग्बन्धनंकुर्यात भालप्रस्तगायत्री
भ्यांनमः दक्षिणकपोलेसावित्रीविश्वाभ्यांनमः

© Dharmartha Trust J&K. Digitized by eGangotri

वामकण्ठेवागीश्वरीमहेश्वराभ्यांनमः वामकर्णाग्रे
श्रीसहितधनपतयेनमः मुखेरतिसहितस्मरायनमः
सव्यकर्णेपुष्टिसहितगणपतयेनमः दक्षिणक
र्णान्तरालेशंखनिधयेनमः वामकर्णान्तरालेपद्म
निधयेनमः मुखेमूलंन्यसेत् कण्ठमूलेगायत्रीसहि
तब्रह्मणेनमः दक्षनेत्रेसावित्रीसहितविष्णवेनमः वा
मनेत्रेवागीश्वरीसहितमहेश्वरायनमः दक्षांसेश्री
धनपतियेनमः हृदिरतिसहितस्मरायनमः वामां
सेपुष्टिसहितगणपतयेनमः पार्श्वयोःशंखनिध
येनमः पद्मनिधयेनमः नाभौमूलंभालेब्राह्म्यैनमः
वांसेमाहेश्वर्यैनमः वामपार्श्वेकौमार्यैनमः नाभौवै
ष्णव्यैनमः दक्षपार्श्वेवाराह्यैनमः दक्षांसेइन्द्राण्यैन
मः गलपृष्ठेचामुण्डायैनमः हृदिमहालक्ष्म्यैनमः मू
लेनव्यापकंकुर्यात् ततोहृत्पद्मेदेवींध्यायेत्। यथाउद्य
द्दिनकरद्युतिमिति॥ ध्यात्वामानसोपचारैराराध्यन
मस्कृत्यचक्रमुद्धृत्ययथोक्तपीठेस्थापयेत्॥ यथा॥ प
द्ममष्टदलंबाह्येवृत्तंषोडशभिर्दलैः विलिख्यकर्णि
कामध्येषट्कोणमतिसुन्दरं श्रावाद्यष्टपत्राष्टत्तेनहि
निष्टजायंत्रेसमुद्धृत्ययथोक्तपीठेसंस्थाप्यार्घ्यपात्रंस्था
पयेत् स्ववामेत्रिकोणवृत्तमण्डलंकृत्वा तद्परित्रिपदि

श्रा॰
२४४
244

कामारोप्यमेवह्निमण्डलायदशकलात्मनेनम इति।
त्रिपदिकांसंपूज्यतदुपरिपात्रंसंस्थाप्य अंसूर्यमण्डला
यद्वादशकलात्मनेनमइतिपात्रंसंपूज्यमूलमंत्रेणपत्
च्छुद्धजलेनापूर्य ॐसोममण्डलायषोडशकलात्मने
नम इतिजलंसंपूज्यतस्मिंजलेमूलमष्टधाजप्त्वा तत्रग
न्धपुष्पाक्षतान्निक्षिपेत्॥ तद्दक्षिणेत्रिकोणवृत्तमण्ड
लंकृत्वा तदुपरित्रिपदिकामारोप्यमवह्निमण्डलाय।
दशकलात्मनेनम इतित्रिपदिकांसंपूज्यतदुपरिशंखं
संस्थाप्य अंसूर्यमण्डलायद्वादशकलात्मनेनम इतिशं
खंसंपूज्यमूलेनशुद्धजलमापूर्य ॐसोममण्डलायषोड
शकलात्मनेनमइतिजलंसंपूज्यवमिति धेनुमुद्रयामृ
तीकृत्यफडितिवामहस्ततर्जन्यावगुण्ठ्यअस्त्रायफड
ति छोटिकाभिर्दशदिग्बन्धनंकृत्वा तदग्रेमूलमष्ट
धाजप्त्वा॥ गन्धपुष्पाक्षतान्निक्षिप्य भगवतिभुवनी।
श्वरिइहागच्छइत्यावाह्यतद्देवतात्मकंभावयेत्
ततः सामान्यार्घ्यक्रमेणान्यानिपात्राणिस्थापये
त् तेनोदकेनात्मानंपूजोपकरणंचाभ्युक्ष्य सर्वं।
विद्यामयंकुर्यात् ततः पीठंपूजयेत् यथा य।
न्त्रोपरि कर्णिकायाम् मण्डूकायनमः ॐका।
लाग्निरुद्रायनमः ॐकालाग्निरुद्रायनमः ॥०॥

© Dharmartha Trust J&K. Digitized by eGangotri

कमधायनमः आधारशक्तयेनमः प्रकृत्यैनमः क्षी
रसमुद्रायनमः रत्नद्वीपायनमः कदम्बवनायनमः
कल्पवृक्षायनमः मणिमण्डपायनमः रत्नसिंहास
नमः आग्नेयादिकोणेषु धर्मायनमः ज्ञानायनमः
वैराग्यायनमः ऐश्वर्यायनमः पूर्वादिदिक्षु अध
र्मायनमः अज्ञानायनमः अवैराग्यायनमः अनै
श्वर्यायनमः पुनः कर्णिकायोउपर्युपरिक्रमेण अ
सूर्यमण्डलायनमः ऊंसोममण्डलायनमः संवह्नि
मंडलायनमः संसत्तायनमः रंरजसेनमः तंतमसे
नमः आंआत्मनेनमः पंपरमात्मनेनमः ह्रींज्ञा
नात्मनेनमः ततः केसरेषुनवशक्तीः पूजयेत ॐप्र
बोधायैनमः मध्येॐमंगलायैनमः ततः सदाशिव
महाप्रेतपद्मासनायनमः इतिसंपूज्य अस्त्रायफट्
इतिॐउमायैनमः ॐविजयायैनमः ॐअजितायैनमः
ॐअपराजितायैनमः ॐनित्यायैनमः ॐविलासिन्यै
नमः ॐदोग्ध्र्यैनमः ततोदिनकराकिरणरूपेण कुसु
मांजलौवहनासापुटेनस्वहृदयाद्देवींसमानीय ह्रींभुव
नेश्वरीममृतचैतन्यमूर्तिंकल्पयामिनम इतिमूर्ति
संकल्प्य यंत्रोपरिपुष्पंदत्वा प्राणप्रतिष्ठांकुर्यात यंत्रो
परिकिंचिंजलंदत्वाहस्तेनस्पृशन आंह्रींक्रोंहंसः

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीभुवनेश्वर्याः प्राणा इह प्राणाः एवं ५ श्रीभुवनेश्वर्या
जीव इह स्थितः एवं ५ श्रीभुवनेश्वर्याः सर्वेन्द्रियाणि वा
ङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु
स्वाहा भगवति श्रीभुवनेश्वरि इहागच्छेह तिष्ठ सन्निहि
ता भव सन्निरुद्धा भव अत्राधिष्ठाने कुरु मम पूजां गृहाण
देवेशि क्रों हृदयाय नमः इत्यादि ऊर्ध्वोर्ध्वं तालत्रयं छोटि
काभिर्दशदिग्बन्धनं कुर्यात् परमीकृत्य योनिमुद्रा बद्ध्वा श्री
भुवनेश्वर्यै नमः इति नमस्कुर्यात् ततः करकच्छपिकां
बद्ध्वा ध्यायेत् उद्यद्दिनद्युतिमिंदुकिरीटामिति ध्यात्वा षो
डशोपचारैः पूजयेत् यथा॥ आसनं स्वागतं चार्घ्यं पा
द्यमाचमनीयकम् मधुपर्काचमनं स्नानं वसनाभर
णानि च गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा प्रयो
जयेदर्चनायामुपचारांस्तु षोडश इदमासनम्
ॐ भुवनेश्वर्यै नमः ॥ स्वागतमिति कुशलप्रश्नम्।
मिदमर्घ्यं ॐ भुवनेश्वर्यै नमः इदं पाद्यं इदमाचम।
नीयम् एष मधुपर्कः इदं पुनराचमनीयम् इदं स्ना
नीयम् इदं वस्त्रं पलान्याभरणानि एष गन्धः इदं।
पुष्पम् एषः धूपः एष दीपः नैवेद्यं पुनः समानी
य अर्घोदकेन अस्त्राय फट् इति प्रोक्ष्य हुमित्यवगु।
ण्ठ्य वमिति धेनुमुद्रयामृतीकृत्य मूलमष्टवारं जप्त्वा।

© Dharmartha Trust J&K. Digitized by eGangotri

इदंनैवेद्यं ॐभुवनेश्वर्यैनमः इत्युत्सृज्यअग्रेचजलंहस्ते
कृत्वाः अमृतोपस्तरणमसिस्वाहा इतिजलगण्डूषंदत्वा
प्राणायस्वाहा अपानायस्वाहा समानायस्वाहा उदाना
यस्वाहा व्यानायस्वाहा इतिपंचप्राणाहुतीर्हुत्वापुन
रपिजलंगृहीत्वा अमृतापिधानमसिस्वाहा इतिजलं
दत्वा इदंपुनराचमनीयं ॐभुवनेश्वर्यैनमः एतत्तांबू
लं ॐभुवनेश्वर्यैनमः इतिपुष्पांजलित्रयेनासंपूज्यमू
लंजपन् अंगुष्ठानामिकाभ्यां श्रीभुवनेश्वर्यैनमः इ
तिपुष्पांजलित्रयेनामूर्तिंतर्पयामिस्वाहा इतिवारत्र
यंसंतर्प्य अग्निकोणे ह्रांहृदयायनमः इत्यादिपूर्वद
क्षिणपश्चिमोत्तरेषु ह्रः अस्त्रायफट् इतिपूजयेत त
तः आवरणान्पूजयेत कर्णिकामध्ये ॐहृल्लेखायै
नमः पूर्वेगगनायैनमः दक्षिणेरक्तायैनमः उ
त्तरेकरालिकायैनमः पश्चिमे अंमहोच्छुष्मायैन
मः आग्नेयादिकोणेषु अग्नौ ह्रांहृदयायनमः नैऋत
कोणे ह्रींशिरसेस्वाहा वायुकोणे ह्रूंशिखायैवषट्
ईशानकोणे ह्रैंकवचायहुं मध्ये ह्रौंनेत्रत्रयायवौषट्
पूर्वदक्षिणपश्चिमोत्तरेषु ह्रः अस्त्रायफट् इतिपूज
येत षट्कोणेषु पूर्वकोणेगायत्रीसहितब्रह्मणेनमः
नैऋतकोणेसावित्रीसहितविष्णवेनमः वायुकोणेस

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
२४६
246

रस्वतीसहितरुद्रायनमः अग्निकोणेलक्ष्मीसहितकुबेरायनमः वारुणकोणेरतिसहितमदनायनमः ईशानकोणेपुष्टिसहितविघ्नराजायनमः षट्कोणपार्श्वयोः शंखनिधयेनमः पद्मनिधयेनमः आग्नेयादिकेसरेषुहृदयादीन् शिखाकवचानि अग्रेनेत्रंदिक्षुपूजयेत पूर्वादिष्टदलेषु अनंगकुसुमायैनमः अनंगकुसुमातुरायैनमः अनंगमदनायैनमः अनंगमदनातुरायैनमः भुवनपालायैनमः गगनवेगायैनमः शशिरेखायैनमः गगनरेखायैनमः शशिरेखायैन इतिपूजयेत पूर्वादिषोडशपत्रेषुकरात्यैनमः विकरात्यैनमः ॐउमायैनमः ॐलक्ष्म्यैनमः ॐसत्यायैनमः ॐश्रुत्यैनमः ॐस्मृत्यैनमः ॐधृत्यैनमः ॐश्रद्धायैनमः ॐमेधायैनमः ॐमत्यैनमः ॐरत्यैनमः ॐकान्त्यैनमः ॐआर्यायैनमः पद्माद्बहिः पूर्वादिक्रमेणअनंगरूपायैनमः अनंगमदनायैनमः मदनातुरायैनमः ॐभुवनवेगायैनमः भुवनपालिकायैनमः ॐसर्वशिशिरायैनमः ॐअनंगवेदनायैनमः अनंगमेखलायैनमः॥ इतिपूजयेत तद्बहिर्लोकपालान्पूर्वादिक्रमेणपूजयेत ॐइन्द्रायनमः ॐअग्नयेनमः ॐयमायनमः ॐनैर्ऋतायनमः॥

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ वरुणाय नमः ॐ वायवे ॐ कुबेराय नमः ॐ ईशा-
नाय नमः ऊर्ध्वं ब्रह्मणे नमः अधः ॐ अनन्ताय नमः
इति पूजयेत् तद्बहिः तदस्त्राणि पूजयेत् ॥ अथाव-
रणध्यानम् ॥ ॐ हृल्लेखाद्याः समभ्यर्च्याः पंचभूतस-
मप्रभाः वरपाशांकुशाभीतिधारिण्यो मितभूषणाः
दण्डकुण्डिकाक्षमालाभयहस्ता गायत्री ब्रह्मणो शं-
खचक्रगदापद्मधारिणी पीताम्बरा सावित्री विष्णुपर
श्वेताक्षमालाभयवरहस्ता सरस्वती महेश्वरी रत्नकुंभ
मणिकरण्डधरस्तुन्दिलः पीतवर्णः कुबेरः तदंग-
स्थावामबाहुनात्तमालिंग्य वामेनोत्पलधारिणी रतिः
श्रेकुशपाशहस्तः करेण कान्ताभगं स्पृशन् दिगम्ब-
रो माध्वीकपूर्णकपालं धारयन् शुण्डेन चषकधारेर-
क्तवर्णो विघ्नेशः मदविह्वलाक्षरक्तवर्णा एकपाणिना
गणेशलिंगं स्पृशंती अन्येनात्तरक्तोत्पलासमाश्लि-
ष्टकान्ता दिगम्बरा पुष्टिरनंगरूपा यायास्तु ॥ चषकं ता-
लवृन्तं च ताम्बूलं छत्रमुत्पलं वामेषु कुसुमं च बि-
भ्राणाः करपंकजैः नानाभरणसन्दीप्ताः इत्यावरणा-
संपूज्य प्राणायामं कृत्वा देवसहस्रं शतं वा जपेत्
जपं समाप्य प्राणायामं कृत्वा ओदकं दत्त्वा गुह्या-
तिगुह्यमित्यादि पठित्वा देव्या वामहस्ते नाम यं जपं

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
२४७
247

समर्प्य घण्टां वादयन् स्तवं कृत्वा दण्डप्रणामं कृत्वा उ
पविश्याथ जपं गृहीत्वा इतः पूर्वं प्राणबुद्धिदेहधर्मा
धिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा क।
र्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्कृतं यदुक्तं।
यत्स्मृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा पुनर्जलं गृ।
हीत्वा मां मदीयं च सकलं श्रीभुवनेश्वर्यै समर्पये इदं
पुनराचमनीयं श्रीभुवनेश्वर्यै नमः भगवति भुवनेश्व
रि पूजितासि त्वमस्वेति संहारमुद्रया पुष्पमानीयाघ्रा
य वहन्नासापुटेन देवीं हृत्पद्मे समानीयात्मानं तद्रूपं वि
भाव्य निर्माल्यं शिरसि धृत्वा नैवेद्यं भुक्त्वा यथासुखं वि
हरेत् प्रजपेन्मंत्रविन्मंत्रं द्वात्रिंशल्लक्षमानतः त्रिस्वादुयु
क्तैर्जुहुयाद्दशद्रव्यैर्दशांशतः दद्याद्द्वै दिनेशायनन्तरं सं
चिंत्य पार्वतीम् अश्वत्थोदुम्बरप्लक्षन्यग्रोधसमिधस्ति
लाः सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः इति भुव
नेश्वरीपद्धतिः समाप्ताः। अथ भुवनेश्वरीस्तोत्रं श्रीम
हादेव उवाच महासंमोहनी देवी सुन्दरी भुवनेश्वरी एका
क्षरी एकमंत्री एकाकी लोकनायकी एकरूपा महारूपा स्थू
लसूक्ष्मा शरीरिणी बीजरूपा महाशक्तिः मंत्रासनजयव
र्धिनी महाबलिर्महाशक्तिर्योगिनी पापनाशिनी अष्टसि
द्धिः कलारूपा वैष्णवी भद्रकालिनी भक्तिप्रिया महादेवी
दविग्रह्मादिरूपिणि शिवरूपी विष्णुरूपी कालरूपी स
लालिनी पुरातिपुराणरूपावती पुण्यवर्धिनी रुद्राणी

© Dharmartha Trust J&K. Digitized by eGangotri

पार्वतेन्द्राणि शंकरार्धशरीरिणी नारायणी महादेवी महि
षी सर्वमंगला अकारादिक्षकारांता ह्यष्टत्रिंशत्कलाधरी स
मस्ताद्रिगुणनाथी शरीरोत्पत्तिकारिणी आकल्पान्तकला
व्यापि सृष्टिसंहारकारिणी सर्वशक्तिर्महाशक्तिः सर्वाणि
परमेश्वरी ह्लेखाभुवनादेवी महाकविपरायणा इच्छाज्ञा
नक्रियारूपा अणिमादिगुणाष्टका नमः शिवायै शान्तायै
शांकरी भुवनेश्वरी वेदवेदांगरूपा च अतिसूक्ष्मशरीरिणी
कालज्ञानी शिवज्ञानी शैवधर्मपरायणा कालान्तरीका
लरूपी संज्ञाप्राणधारिणी खड्गश्रेष्ठा च खट्वांगी त्रिशूलध
रधारिणी अभयालोकरक्षा च पिनाकी नागधारिणी वज्र
शक्तिर्महाशक्तिः पाशतोमरधारिणी अरूपा बहुरूपा च
नायका लोकवश्यगा अहादप्राभुनादेवी ह्लेखाभुवना
नघा खड्गधारी महारूपा सोमसूर्याग्निमध्यगा पर्वशाता।
एकैनाम स्तोत्रमंत्रेण भाषिते सर्वपापप्रणाशनं सर्वविघ्न
निवारणं सर्वशत्रुक्षयकरं सदा विजयवर्धनं आयुष्करं
पुष्टिकरं रक्षाकरं यशस्करं अप्रमादिप देव्यर्थमसत्वाश
कलापहं ॥ इति श्रीरुद्रयामले तंत्रे श्रीभुवनेश्वरीपाता
ष्टनामस्तोत्रं समाप्तं। श्रीदेव्युवाच प्रभो श्रीभैरवश्रेष्ठ दया
लो भक्तवत्सल भुवनेशी भवेत् हृदयं यत्तव वल्लभा॥ श्री
शिव उवाच शृणु देवि प्रवक्ष्यामि भुवनेश्याष्टकं शुभं येन
विज्ञातमात्रेण त्रैलोक्यं वशगं भवेत् ॐ नमामि जगदाधा
रां भुवनेशीं भवप्रियाम् भुक्तिमुक्तिप्रदां रम्यां रमणीयां
शुभावहाम् त्वं स्वाहा त्वं स्वधा देवी त्वं यज्ञ यज्ञनायिका
त्वं नाथ त्वं नमो ह्रीं व्याप्यव्यापकवर्जिता त्वमाधार

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्वसिन्ध्यावज्ञाताज्ञेयंपरंपदम् त्वंशिवस्त्वंस्वयंविष्णु

स्त्वमात्मापरमोव्ययः त्वंकारणंचकार्यंचलक्ष्मीस्त्वं

चहुताशनः त्वंसोमस्त्वंरविःकालस्त्वंधातात्वंचमारुतः

गायत्रीत्वंसावित्रीत्वंमायात्वंहरिप्रिया: त्वमेवैकापरा

शक्तिस्त्वमेवगुरुरूपधृक त्वंकलात्वंकलातीतात्वमेवज

तांप्रियः त्वंसर्वकार्यंसर्वस्यकारणंकरुणामयी इदम

ष्टकमाद्यायाभुवनेश्यावरानने त्रिसन्ध्यंश्रद्धयामर्त्योयः

पठेत्प्रीतमानसः सिद्धयोवशगास्तस्यसंपदोवशगा

गृहे राजानोवशमायान्तिस्तोत्रस्यास्यप्रभावतः प्रेत

भूतपिशाचाद्यानेत्रंनेतादिशांग्रहा: यंयकामप्रवाञ्छे

तसाधकप्रेतमानसा तंतमाप्नोतिकृपयाभुवनेशावरा

नने अनेनसदृशंस्तोत्रंनमसेभुवनत्रये सर्वसंपत्प्रदं

सिद्धंस्तोत्रंपावनपावनम् अनेनस्तोत्रवर्येणसाधिते

नवरानने सम्पदोवशमायान्तिभुवनेशीप्रभावतः

इतिश्रीभुवनेशीस्तवराजः

समाप्तः शुभम् ॥

ॐश्रीगणेशायनमः ॐनमः शिवायनमः ॐअ

थकाम्यानि ॥ ॐमन्त्रीत्रिमधुरोपेतैः हुत्वाचाष्ट

सासिद्धैः सहस्रमितिशेषः ॥ आम्लरणान्वशा

येत्क्षीत्रं पार्थिवानपिमोहितः पलाशपुष्पै

स्तर्पंत्रीमन्त्रिणः कृमदैरपि ॥ पंचविंशतिसंजप्तेर्ज

लेःस्नानोदिनेदिने आत्मानमभिषिंचेभ्यः सर्वसौ

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वसौभाग्यवान्भवेत् पंचविंशतिसंज्ञमंजलेश्यानः
वेश्वरः अवाप्यमहतीमश्लाकवीनामग्रणीभवेत्
कर्पूरागुरुसंपृक्तं कुंकुमं साधु साधितं अष्टोत्तरश
तजपेन गृहीत्वा तिलकं कुर्याद्राज्यवश्यमनुत्तमं
श्चालिष्टश्मशानीकृत्वा पुत्तलीमश्रुवान्विनाम् जप्तो
प्रतिष्ठितप्राणां मन्त्रात्मा भक्षयेद्रविवासरे वशं
नयति राजानं नारीं वा नरमेव वा कण्ठमात्रोदके स्थि
त्वा वीक्ष्यतोयगतिं रविं त्रिसहस्रं जपेन्मन्त्रमिष्टांक
न्यांलभेन्नरः अनेनान्मंत्रेनमंत्री गुंजीतयीतिसिद्धये
लिखित्वा भस्मना मायां समांथे फलकादिषु तत्का
ले दर्शयेन्मन्त्रस्तुवैश्यस्पैतनराभिरणी तन्त्रान्तरमाह
वाग्भवं शंभुवनिताकमावीजत्रयात्मकं मन्त्रसमुद्ध
रेन्मन्त्री त्रिवर्गफलसाधनं अस्यार्थः वाग्भवं ऐं शं
भुवनिता क्लीं रमावीजं श्रीं तेन ऐं क्लीं श्रीं इति मन्त्रः
अस्यमन्त्रस्याङ्गमन्त्रध्यानादि तिरिक्तं सर्वं पूर्वोक्तभुव
नेश्वरीवीजवत् अङ्गमेवास्य ऐं क्लां हृदयाय नमः ऐं
क्लीं शिरसे स्वाहा ऐं क्लूं शिखायै वषट् ऐं क्लैं कवचा
य हुं ऐं क्लौं नेत्रत्रयाय वौषट् ऐं क्लः अस्त्राय फट् कु
र्यान्सर्वं दिगाद्यामां स्तस्यैवात्राभिसाधकः ध्यानेत
सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ रानायकशेखरां स्मितमुखीमापीनवक्षोरुहां पाणि
भ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां र
त्नघटस्थसव्यचरणां ध्यायेत्परामम्बिकां रत्नचष
कं दक्षिणहस्ते रविलक्षं जपेन्मन्त्रं पायसैः मधुरप्लुतैः
दशांशं जुहुयान्मन्त्री पीठशक्तीर्नियोजयेत् वाग्बीज
पुटिता माया विद्येयं त्र्यक्षरी मता तेन ऐं ह्रीं ऐं इति म
न्त्रो भवति अस्य मन्त्रस्यापि अंगमंत्रध्यानादिकं सर्वं पू
र्वोक्तभुवनेश्वरीबीजवत् अंगमन्त्रस्य मध्येन दीर्घयुक्ते
न वाग्पुटेन प्रकल्पयेत् ऐं ह्रां ऐं हृदयाय नमः ऐं ह्रीं ऐं
शिरसे स्वाहा ऐं ह्रूं ऐं शिखायै वषट् ऐं ह्रैं ऐं कवचाय
हुं ऐं ह्रौं ऐं नेत्रत्रयाय वौषट् ऐं ह्रः ऐं अस्त्राय फट् ध्या
नं तु यथा मांगीशशिशेखरां निजकरैर्दानं च रक्तोत्पलं
रत्नाढ्यं चषकं वरं भयहरं संबिभ्रतीं प्राञ्चितां मुक्ताहा
रलसत्पयोधरवतीं नेत्रत्रयोल्लासिनीं वन्देऽहं सुरपूजि
तां हरवधूं रक्तारविन्दस्थितां वरादि अथो दक्षिणहस्त
मारभ्य प्रदक्षिणक्रमेण विनिनीयं आवरणपूजायां
मध्ये हृल्लेखा पूर्वे गगनां दक्षिणे रक्तां उत्तरे करालिकां
महोच्छुष्मां षट्कोणस्य पूर्वकोणे गायत्रीं ब्रह्माणीं च
नैरृते कोणे सावित्रीं विष्णुं च वायुकोणे सरस्वती
रुद्रं च ॥ वह्निकोणे कुबेरं ॥

२५०

250

© Dharmartha Trust J&K. Digitized by eGangotri

महालक्ष्मीं च वारुणकोणे मदनं रतिं च ईशाने वि
घ्नेशं क्षेत्रेशं च पूजयेत् आग्नेयादिकोणकेसरेषु हृदय
शिरःशिखाकवचानि मध्ये नेत्रं दिक्षु अस्त्रं च पूजयेत्
अष्टदलेषु पूर्वादि ओं ब्राह्मण्यै नमः ईं माहेश्वर्यै न
मः ऊं कौमार्यै नमः ऋं वैष्णव्यै नमः लृं वाराह्यै नमः
ऐं इन्द्राण्यै नमः औं चामुण्डायै नमः अः महालक्ष्म्यै न
मः दलाग्रेषु असिताङ्गाय नमः इं रुरवे नमः उं चण्डा
य नमः ऋं क्रोधाय नमः लृं उन्मत्ताय नमः एं कपा
लिने नमः ओं भीषणाय नमः अं संहाराय नमः इ
ति पूजयेत् ततः षोडशदलेषु करालीं विकरालीं उ
मां सरस्वतीं श्रीं दुर्गां उषां लक्ष्मीः श्रुतिः स्मृतिः धृतिः
श्रद्धा मेधा रतिः कान्तिः आर्याः पूजनीयाः पूर्वादिक्र
मेण तद्बहिः अनङ्गरूपा अनङ्गमदना मदनातुरा भु
वनवेगा भुवनपालिका सर्वशिशिरा अनङ्गवेदना
अनङ्गमेखला पूजनीयाः तद्बहिः लोकपालान् त
द्बहिः तदस्त्राणि पूजयेत् तत्र ब्राह्मणीप्रभृतीनामे
वरणध्यानं भैरवाङ्कसमारूढाः स्मरावेशमदाल
सः असिताङ्गादिभैरवाणां ध्यानं शूलं कपालं श्वे
तं च बिभ्राणाः टङ्कडमरुभिं कृष्णवर्णस्वराभीमाकृटि
सालकशोभितः अन्येषां ध्यानं भुवनेश्वरीं च काल

© Dharmartha Trust J&K. Digitized by eGangotri

आ

२५१

251

रीमन्त्रापदेशोऽद्य हुँव्यं नवलतेनपेमंचंज्ञऽयानदशा
शतः पलाशपुष्पैः स्वासवैः पुष्पैर्वा राजवृक्षैः अने·
नो बिन्दुसंयुक्तो माया ब्रह्माग्नितारवान् पाशादियुत
रो मन्त्रः सर्ववशपफलप्रदः अनन्तः आकारः बिन्दुः अ
नुस्वारः तेन आं माया ह्रीं ब्रह्मा ककारः अग्निरेफः ता
रः ॐ तेन क्रों तेन आं ह्रीं क्रों इति मन्त्रः अस्य भुवनेश्व
रीमन्त्रस्य शक्तिऋषिः गायत्रीछन्दः भुवनेश्वरीदेव
ता अभीष्टसिद्धो विनियोगः अंगमायास्तु ह्रीं हृदयाय
नमः ह्रीं शिरसे स्वाहा ह्रीं शिखायै वषडित्यादि पद्ममष्ट
दलं मध्ये षट्कोणमतिसुन्दरं आचाराद्भूपराद्येसुजायंत्र
जया विजया जिता पराजिता नित्या विलासिनी दोग्ध्री
अघोरा मंगलाः पीठशक्तयः ह्रीं इति पीठमंत्रः ध्यानम्
वरांकुशौ पाशमभीतिमुद्रां करैः वहन्तीं कमलासन·
स्थां बालार्ककोटिप्रतिमां त्रिनेत्रां भजेऽहमाद्यां भुवनेश्व
रीताम् वरादयो दक्षिणाधोहस्तमारभ्य प्रादक्षिण्ये
न चिन्तनीयाः आवरणपूजा च कर्णिकामध्ये
ह्रीं रवायै नमः पूर्वे गगना दक्षिणे ॥
रक्ता उत्तरे करालिका पश्चिमे महोच्छुष्मा ॥
आग्नेयादिकोणकेसरेषु हृदयशिरः शि
खाकवचानि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अग्रेनैऋते दिक्षु अष्टदले पूर्वादिक्रमेण पूजये
त् ब्राह्मीमाहेश्वरीकौमारीवैष्णवी वाराहीइन्द्रा·
णीचामुंडा महालक्ष्मीपूजनीयः तद्बहिः लोकपा
लान् तद्बहिः तदस्त्राणि इत्येवमादिध्यानं भुवने·
श्वरीपकारदीपूजापद्धतौ द्रष्टव्यं ब्रह्म्यादिध्यानम्
मातृकाभेदपरिच्छेदे द्रष्टव्यं हविष्याशीजपेन्मंत्रं
नवलक्षं जितेन्द्रिया षट्सहस्रं प्रजुहुयाज्जपा
न्तेमन्त्रवित्तमः दधिक्षौद्राप्लुताक्ताभिः समिद्भिः
क्षीरभूरुहां तत्संख्यया तिलैः शुद्धैः पयोक्तैः जुहुयं
त्ततः इति श्रीआगमकल्पलतायां श्रीभुवनेश्वरी
पूजापरिच्छेदः पटलः ॥
ॐ नमः शिवाय श्रीपरब्रह्मणे नमः ॐ अज्ञान
तिमिरध्वंसिसंसारोद्धारकारकं आनन्दकन्दमव
तादनवंदे ईश्वरं महः वाराहीतंत्रे आद्याकृतयुगेश
स्यापंचकूटाचद्वापरे षट्कूटाचकलौ शास्या सर्व
त्रेत्रगोपिता सर्वकाले सर्वयुगे सुन्दरी परमेश्व
री षट्कूटाच मायाबीजयुक्ता तत्रैव वाराहीतन्त्रा
वतारात् ज्ञानार्णवे त्रिपुरात्रिविद्यादेविवालाव
प्रथमं शृणु यस्याविज्ञानमात्रेण सालान्तरगुरु
भैरवेन यथा सर्वमध्वंसमुच्चार्य बिन्दुनादकला॰

© Dharmartha Trust J&K. Digitized by eGangotri

आ

२५६

253

त्मकं स्वरान्तं पृथिवीसंस्थं तुर्यस्वरविभूषितं बिन्दु
नादकलाक्रान्तं सर्गव्याङ्गुरव्ययः शाक्रस्वरसमो
पेता विधेयं श्रीदरीमता सूर्यस्वरः ऐकारः स्वरान्तः
ककारः पृथिवी लकारः तुर्यस्वरः ईकारः शाक्रस्व :
औकारः तेन ऐं क्लीं सौः इतिमन्त्रः
तथा च शारदातिलके अथरो विन्दुमालाघ्यो ब्र
ह्मेन्द्रस्थः शशीयुतः हिनीयोभृगुसनघ्योमनुस्ता
तीयमीरितं पथावालेतिविख्यातः त्रैलोक्यवशका
रिणी अथरः ऐकारः बिन्दुः अनुस्वारः ब्रह्माककका
रः इन्दुः लकारः शशी विन्दुः ईयुतः भृगुः सकारः
सर्गघोविसर्गाघ्यः मनुरौकारः तेन ऐं क्लीं सौः
इतिमंत्रः गंगातरंगकल्लोलस्फुरद्वहाक्यदत्तायिनी म
हासौभाग्यजननी महासौख्यप्रदा भवेत् महासौ
न्दर्यसुभगा महापस्तुविनाशिनी सर्वतीर्थमयी दे॰
वी सर्वरत्नादिदा भवेत् महामोक्षप्रदानित्यं महा
भोगप्रदा शिवा वाग्भवेनेन्दुमरूसा वाणी ज्ञानप्रदा
यिनी ॥ कामराजेन बीजेन सक्षोथलस्फुरवि
घाघाकं गोपस्फुरन्वि घांत्रैलोक्यंमोहयन्तीयं श॰
क्तिबीजेन सुव्रते ॥ सर्ववर्णविवर्णाविवर्तान सौ
भाग्यं तस्य मन्दिरे ॥ तथा ॥

© Dharmartha Trust J&K. Digitized by eGangotri

इतिरणमूर्तिनेत्रे आदिमाद्यंचमध्यंचमध्यंमध्यं
तथान्तिमं अन्त्यमन्त्यंतथान्त्यंचसैववशीनफला•
भवेत् तथा गर्णोनिश्रयेशानीमरणवेनदशगातरी
आदिमेकारः पुनरपिसएव ऐंऐंऐंभवतिमध्य•
कामबीजंक्लींपुनरपिवारद्वयंतदेव एवंक्लींक्लीं
क्लीं अन्त्यंसौः पुनरपिवारद्वयंतदेव तेनसौःसौः
सौः इतिभवति तदातिबीजं ऐंमन्त्रान्तेदेयं तथा
ऐंऐंक्लींक्लींक्लींसौःसौःसौः ऐं इतिमन्त्रः एतस्मा
देवमरणवेदमेदशगासनोभवेत् यथा गंऐंऐंक्लीं•
क्लींक्लींसौःसौःसौः ऐं इतिमंत्रः अस्यपूजादिकं
सर्वसम्पत्करपूजावत् तानागर्णवेपि सिंहास
नगतादेवी कथंसाविप्रशाम्भवा कथयस्वमहे
शानकथंसिंहासनेभवेत् शिवचन्द्रौवह्निसं
स्थौवाग्भवंतदनन्तरं शिवोहकारःचन्द्रः मकारः
वह्निः रेफः वाग्भवः ऐंकारः तेनहसैरे इत्ये
वभवन्ति कामबीजंतथादेविशिवचन्द्राग्नि
तेनना पृथ्वीबीजंतवमायांवानीयंप्रणउवल्लभे का
मबीजंककारःशिवोहकारः चन्द्रःमकारः पृथ्वीबी
जंलकारः वह्निरेफः वामाक्षिविन्दुयुक् हसकलरीं
इतिभवति ऊमाद्योःपरमेशानिहिलागर्भंतदेवन्तवं

© Dharmartha Trust J&K. Digitized by eGangotri

शक्तिबीजेमहेशानि शिववह्नी नियोजयेत् त्रिपुरा
भैरवीदेवी महासंपत्प्रदायिनी कुमार्यास्तृतीयबीजेस्थि
तेविसर्गंहरीकृत्यविन्दुयुक्तंकुर्यात् तेनसौः शिवो
हकारः वह्निः रेफः तेन हसौं इतिभवति तथाच
हसैं हसकलरीं हसौं ॥ इतिमंत्रः॥ तत्रविशेष
माह पृथ्वीबीजमितिद्विवेति तेनतादृशोहित्वावि
सर्गंहरीकृत्यविन्दुंयोजयेदित्यर्थः अतएवमंत्रांत
रेसंपत्प्रदाभैरवीयंतत्रतार्तीयबीजके भिन्नंहित्वा
ततः सर्गंनिक्षिपेत्तत्रदीर्घत्रविन्दोस्तादृशिकस्यए
विद्यात्पत्वमुक्तं तृतीयबीजेहकारेणास्यवेतिकेचि
त् वियदृगुक्ताणस्याभौतिकोविंदुशेखरः वि
यतदादिकेलग्निस्थितंवामाक्षिविंदुमत् आका
शमृगुवह्निस्थोमनुः सर्वेद्रावणदवान् वाग्भ
वेप्रथमंबीजंकामराजंद्वितीयकं तृतीयंशक्तिबी
जाख्यंत्रिभिः बीजैर्मदाहृता पंचकूटात्मिकाविद्या
वेद्यात्रिपुरभैरवी पंचकूटात्मकइति पंचकूटमं
त्रवर्णावदितेत्यर्थः दीक्षांप्राप्यविशिष्टलक्षणायु
नः संपत्प्रदायांकुर्याल्लक्ष्यामंत्रमनन्यमपेक्षनियतं
तत्वार्थलक्षवधि स्वादुकैश्चनेरैः पलाशकुसुमैः
सम्यकमसिद्धेनले मंत्रीभानुसहस्रकंप्रतिकृ।

© Dharmartha Trust J&K. Digitized by eGangotri

नेदष्वादिस्तैरपि देव्याद्यानत्वाविहाद्यानत्वानिवा।
विशुद्धदेहो देवेशि ततो न्यासं समाचरेत् ऋषिरस्मन्मदे
शानिटत्विणामूर्तिरव्ययः न्यसेच्छिरसि छन्दस्त्वाने
किच्छन्दो मुखे प्रिये देवता हृदये बाला त्रिपुरा परमे
श्वरी बीजं वाग्भवमित्युक्तं शक्तिस्तार्तीयमुच्यते नाभे
रावरणं न्यसेद्गलादानाभि वापरं मूर्धादि गलपर्यन्ते
मध्यत्वं विन्यसेत् क्रमात् एवं च नाभेरावरणं न्यसेद्धृ
ग्भवं मंत्रवित्तमः हृदयानाभिपर्यन्तं कामबीजं प्रविन्य
सेत् इत्यादि निबंधेषु वाग्भवादि पदं भैरवी प्रथमबीज
परं बालाबीजानामेव वाग्भवादि परिभाषा बलादिति
निरस्तं उक्तवचनविरोधात् बालाबीजानामेव वाग्भवा
दिपदेन परिभाषणाच्च तन्मूलत्वेन भैरव्यादीनामपि
तथात्वं केनात् एवं बीजैः त्रिभिरिति प्रपंच भरोप्येतत्य
रपव साधारण शब्दत्वात् यद्वा यत्र वामं श्रीयद्धीमंतत्परं
वाग्भवादि परम विशेषात् तथा वामे पाणितले वैकं दद्य
पाणितले तथा उभयोः संपुटे विद्या त्रिबीजं विन्यसेच्छि
वे एवं वाद्यं द्वितीयं करयोस्तार्तीयमुभयोः न्यसेत् मू
र्ध्नायावेद्धृदि न्यस्य भ्रुवोर्बीजत्रयं क्रमात् इति निबन्धे प्र
थमेव क्रमो बोद्धव्यः एकवाक्यतावलात् तथा च प्रमाण
कौमुद्यां । विद्यान्यासं ततः कुर्यात् त्रिभिर्बीजैः क्रमाच्छि
वे करयोर्विन्यसेदादौ मणितले वन्थेतलेयके दद्यवा
मे च विन्यस्य करतलं पृथक्‌पाणिषु पुनर्दद्यात्‌तु वामेतपाद
योश्च तथा न्यसेत् नादांते हृदये लिंगे न्यसेद्देवि ततः पदं
एतेषु गोपुरे देवेशि संहारक्रमतो न्यसेत् विद्यास्तृष्टिक्रमे
णैव ज्ञानी हिपरमेश्वरि नवयोन्यात्मकं न्यासं कुर्याद्धीमे

श्रा०

स्त्रिभिस्ततः कर्णयोश्चिबुके भूयः गण्डयोर्वदने पुनः
नेत्रयोर्नासि विन्यस्य बाहुयुग्मे स्तनद्वये ततः कूर्परयोः
१५५ कट्योर्जान्वोर्ध्वजमूर्धनि पादयोः गुह्यदेशे च पार्श्वयोः
255 हृत्स्तनद्वये कण्ठवनवयोर्व्याख्येयमेतद्दीनत्रयं क्रमात्
बाहुयुग्मस्तनत्र्यंसयोर्नेत्रे पुनरितिवन्येषु पाठः क
र्णादौ वामदक्षक्रमेण न्यासः हस्तन्यासेन व्याप्यत्वदर्श
नात् बीजैस्त्रिभिर्न्यसेद्धस्ततले च मध्यदलद्वये हि तयम
प्युभयोस्तृतीयामिति प्रपंचेष्वभिधानात् एकत्र लिखि
तत्वादिन्यायात् किंचाग्निविन्यासे मध्यापसव्येतरण्योः
ललाटे ततो बुधः कर्णयुग्मे च वक्त्रे चेति त्रिपुरार्णवाभि
धानात् मध्यपदस्य दक्षेपि न्यासे शक्यत्वात् दक्षादिवा
मक्रम इति शिवः॥ अथ यन्त्रोद्धारः॥ ततो न्यायेन वेक्ष
मावारपूजां समाचरेत् तत्रादावनुविश्रामी नायन्त्रोद्धारं प्र
कल्पयेत् ईशानादग्निपर्यन्तमनन्तरेखां समालिखेत् ई
शानद्ये तदग्रान्तरेखांश्चाकृष्य देशिकः एकीकृत्य च वा
रुणं चाग्निं रेखां पञ्चाशीव त्रिकोणाकाररूपं च शक्ति
रूपमिदं शिवे पूर्वशान्त्याग्रभावेन मध्ये च पृष्ठवदालिखे
त् रेखान्तपरमेशानि वायुवारुणकोणयोः संधिभेदक
मेणैव तयोः शम्भोस्ततः परं रेखे चाकृष्य कोणाभ्यां
डदग्रान्मूलगान् कुरु वज्रिमारुतमेन त्र्यास्त्रपूर्वान्संग्रह
वन्हिने नवयोनिविशोभाढ्यं चक्रराजमिदं भवेत् एतद्धा
र्येनमंडलं पूर्वेन्द्रसन्निभं उल्लासमष्टपत्रं च चतुर
श्रं लिखेच्छिवे वसुद्वीवविशोभाढ्यं सर्वानन्दकं सदा
विलिख्य पूजयेद्यंत्रं हेमरूप्यादिपट्टके भूमौ वस्त्रे च पीठे
पुं कुंकुमागुरुचन्दनैः सिन्दूररजसा वापि कस्तूरीचु

© Dharmartha Trust J&K. Digitized by eGangotri

कुङ्कुमरुणादिभिः स्वर्णरत्नलेखन्या कल्पितं मरणमये
थवा विलिख्य यन्त्रं देवेशि पूजाद्यानि साधयेत् अ
थ पूजाविधिं वक्ष्ये सर्वतन्त्रेषु गोपितं ब्राह्मे मुहूर्ते चो
त्थाय स्वशिरसि गुरुं ध्यायेत् प्रातः शिरसीत्यादि ध्या
त्वा मानसोपचारैराराध्याज्ञानतिमिरान्धस्येत्यादि
नमस्कृत्य ततो हृत्पद्मे देवीं ध्यात्वा मानसोपचारैरा
राध्य मूलविद्यां यथाशक्ति जप्त्वा नमस्कृत्यात्मानं
तद्रूपं विधाय यावश्यकार्थं बहिः गच्छेत् ततो मध्या
ह्नकाले नद्यादौ गत्वा मलविशोधनं स्नानं समाप्य ति
लकुशमादाय श्रीपरदेवतार्चनयोग्यतासिद्ध्यर्थं
स्नानमहं करिष्ये इति संकल्प ॐ इत्यङ्कुशमुद्रया
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन सत्ये
न मे देव तीर्थं देहि दिवाकर गङ्गे च यमुने चैव इत्यादि
सवितृमण्डलात्तीर्थमावाह्य त्रिर्निमज्ज्योत्थाय मूलम
न्त्रजप्तकुम्भमुद्रया श्रीत्रिपुरभैरवीमभिषिञ्चामि नम
इति वारत्रयं मूर्ध्नि दत्त्वाचमेत् यथा प्रथमकूटमुच्चा
र्यात्मतत्त्वाय स्वाहा त्रितीयकूटमुच्चार्य शिवतत्त्वाय
स्वाहा त्रितीयकूटमुच्चार्य शिवतत्त्वाय स्वाहा इत्याच
म्य यथा स्थानानि स्पृष्ट्वा पुनर्निमज्ज्योत्थाय गात्रमा
र्जनं कृत्वा सन्ध्यां कृत्वा पितृतर्पणं च कृत्वाचम्य मूल

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

२५९

256

विद्यामुच्चरन् श्री त्रिपुरभैरवीं तर्पयामि स्वाहा इति त्रिसन्तर्प्य जलादुत्थाय धौते वाससे परिधाय योपविश्य आचम्य मूलविद्यां जपन् ऊर्ध्वाग्रेण वारत्रयं मूर्ध्नि जलं दत्वा गायत्रीं जपेत् जपं समाप्य रक्तचन्दनार्घ्यं जलं ताम्रपात्रमापूर्य हस्ताभ्यां गृहीत्वा ललाटं स्पृशन् ह्रां ह्रीं सः ऊं मार्तण्डभैरवाय प्रकाशशक्तिसहिताय स्वाहा इति सूर्यार्घ्यं दत्वा सूर्याय नमः इति नमस्कुर्यात् ततो मूलमन्त्रं जप्त्वा जपं समाप्य पुनरपि रक्तचन्दनाक्तजलं ताम्रपात्रमापूर्य तस्मिञ्जले भैरवीं वक्त्रं ध्यात्वा हस्ताभ्यां गृहीत्वा ललाटे ऐं त्रिपुरायै विद्महे भैरव्यै धीमहि तन्नो देवी प्रचोदयात् इति जपन् श्री त्रिपुरभैरव्या अर्घ्यं कल्पयामि नमः इति देव्या अर्घ्यं दद्यात् मन्त्रोद्धारमाह त्रिपुरा च तथा टेन्तं विद्महे पदमुद्धरेत् भैरव्यै च ततः प्रोक्ता धीमहीति ततो वदेत् तन्नो देवी पदं चोक्त्वा प्रचो प्रचोदयादुदीरयेत् गायत्री त्रैपुरी ख्याता वा गायेन समुद्धरेत् ततो मौनी प्रयोगं संभाषणं परित्यज्य स्वः वाङ्मागच्छेत वाङ्मागत्वा हस्तौ पादौ प्रक्षाल्य ताम्रपात्रे समानयेत् संस्थाप्य जलेन द्वारं प्रोक्ष्य

॥ ॥ ॥ ॥ ॥

द्वारदक्षिणेगणेशायनमः वामेक्षेत्रपालायनमः
तयोः पार्श्वयुगेगंगायैनमः यमुनायैनमः उपरि-
द्वारश्रियैनमः अधोदेहल्यैनमः ततोंगंसंकोच्यशूद्रं
प्रविश्यपार्घजलेनगृहाभ्यंतरंप्रोक्ष्य गंब्राह्मणेनमः
गंवास्तुपुरुषायनमः इतिसंपूज्यभूमौत्रिकोणंवि
लिख्य क्रीं इतिपृथिवींसंशोध्य तदुपरिरक्तकंबला
द्यासनमास्तीर्यार्घजलेनप्रोक्ष्यवापठेत् मेरुपृष्ठ-
ऋषिः सुतलंछंदः कूर्मोदेवता आसनेशोधनेवि
नियोगः पृथ्वित्वयेति क्रींश्रींआधारशक्तिकमला
सनायनम इत्यासनंसंपूज्य तदुपरिप्राङ्मुखउत्तर
मुखोवाउपविशेत् पराबीजेनसंरक्ष्यैतत्तस्या
धारपूर्वकं शक्तीतिपदमालिख्यकमलासनमा
लिखेत् ऊं तेनमपदंचोक्त्वाआसनस्यमंत्रःप्रिये
अक्षतमादाय अपसर्पंतुइतिपठित्वाततोन्विकी
र्य अस्त्रायफट् इतिवामपादघातेनभौमानान्ता
लत्रयेणांतरिक्षगान् वालयासमुदंचितवक्त्रेणऊर्ध्व
दृष्ट्यादिव्यान् इतित्रिविधविघ्नान्निरस्य वामेगुरु
भ्योनमः दक्षिणेगणेशायनमः मध्येश्रीत्रिपुर
भैरव्यैनमः इतिनमस्कृत्यास्त्रायफट् इत्यूर्ध्वोर्ध्वताल
त्रयंछोटिकाभिर्दिग्बंधनंकृत्वा अस्त्रायफडितिगं

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा

२५०

247

यथुष्माभ्यं करोमि शोध्यकृतांजलिः अस्य भैरवीमं
त्रस्य दक्षिणामूर्तिऋषिः पंक्तिछंदः त्रिपुरभैरवीदेव
ता आद्यंबीजं ऐंतं शक्तिः रेफः कीलकं विद्याद्यभीष्ट
सिद्धौ विनियोगः शिरसि दक्षिणामूर्तये ऋषये नमः
मुखे पंक्तिछन्दसे नमः हृदि त्रिपुरभैरव्यै नमः कृतांज
लिः मम विद्याद्यभीष्टसिद्ध्यर्थे विनियोगः ततो भूत
शुद्धिं कुर्यात् शरीराकारभूतानां भूतानां यद्विशोधनं
अव्ययब्रह्मसंयोगाद्भूतशुद्धिरियं मता स्वांके तन्मानह
स्तौ कृत्वा सोहमिति मंत्रेण प्रदीपकलिकाकारं हृद
यस्थं जीवात्मानं मूलाधारस्थकुण्डलिन्या सह शिरस्थ
सहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि लीनं
विभाव्य पृथिवीमप्सु तां वह्नौ वह्निं वायौ समीरणं आ
विलाप्य तथाकाशे आकाशं प्रकृतौ ततः अपरब्रह्म
रूपां तां मायाशक्तिं परात्मनि इति समस्तदेहानि प्रपं
चं परमात्मनि प्रविलाप्य पुरुषाकारामनादिभव
संचितं ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयं तत्संसर्गिपदद्व
न्द्वं अंगप्रत्यंगपातकं ॥ उपपातकरोमाणं र
क्तश्मश्रुविलोचनं खड्गचर्मधरं क्रुद्धं कुक्षौ वाम
ङ्के विचिंतयेत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ततश्चवह्नेर्वामेन सधूम्रवर्णं यमिति वायुबीजं षोड
शवारंजपन् वामनासापुटेन वायुनादेहमापूर्य पुन
र्यमिति चतुःषष्टिवारंजपन् कुम्भकं कुर्वन् देहसंशो
ध्य पुनर्यमिति द्वात्रिंशद्वारंजपन् दक्षनासापुटेन
वायुं रेचयेत् ततो रक्तेन वायुसंबद्धेन रमिति वह्निबी
जेन रमिति वह्निबीजेन षोडशवारजपेन दक्षिणना
सापुटेन देहमापूर्य चतुःषष्टिवारजपेन कुम्भकं कुर्व
न् तद्दग्धीभूतमिति विचिंत्य रमिति द्वात्रिंशद्वारंजप
न् वामनासया भस्मना सह वायुं रेचयेत् ततः ठमि
ति चन्द्रबीजं शुभ्रं अमृतात्मकं वामनासापुटेन पीयू
षात्मकं ललाटचंद्रं षोडशवारंजपन् नयेत् ततो वमि
ति वरुणबीजं चतुःषष्टिवारंजपन् ललाटचंद्राद्गलि
तामृतसारमयीं दृष्टिं निपात्य तया देवोपासनयोग्यं
सकलं वपुः कुर्वन् लमिति द्वात्रिंशद्वारंजपन् सक
लं शरीरं दृढीभूतं विचिंत्य दक्षनासापुटेन वायुं रेचये
त् पुनरुत्पादयेद्देहं पवित्रं परमात्मनः परंब्रह्मात्मि
का माया मातृका प्रकृतिः परा प्रजायत जगन्मातुरा
काशं नभसोनिलः समीरणाद्भूहद्भिर्वह्नेरापस्त
तो मही स्वीयमेभ्योपि भूतेभ्यस्तेनातद्रूपं कलेवरं देव
ताराधने योग्यमुत्पन्नमिति भावयेत् तस्मिन्देहे परा

© Dharmartha Trust J&K. Digitized by eGangotri

श्री
२५८
258

त्मायं सर्वज्ञः सर्वशक्तिमान् समस्तदेवतारूपः सर्वम
यमयः शुभः आत्मरूपेण देहे सजीवभावेन तिष्ठति
इत्येवभावनायुक्तो भूतशुद्धिं विदोदिता नासापुटौ
धृत्वा वायुमवष्टभ्य हंसः सोहं अवतर २ शिवपदा
जीवषीवं सुषुम्णा पथेन प्रविश अंगागाद्यंगुह्लसोल्ल
स ज्वल २ प्रज्वल २ हंसः सोहमिति स्वाहा ततः पृथि
व्यादीनि तत्वानि यथास्थाने स्थापयित्वा हृत्पद्मे देवी
समानीय हृदि हस्तं दत्वा प्राणप्रतिष्ठां कुर्यात् यथा
ओं सोहं मम प्राणाः ओं सोहं मम जीव इह स्थितः ओं
सोहं मम सर्वेंद्रियाणि वाङ्मनश्चक्षुः श्रोत्रघ्राणप्रा
णा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति बीजं न्यसे
त् प्राणप्रतिष्ठामंत्रो यथा मुखवृत्ते समभ्यार्थं हंसश्च
विपरीततः उष्णेरेतपरमेशाविविधेयं व्यस्तीभवेत्
प्राणप्रतिष्ठामंत्रो यं सर्वकर्माणि साधयेत् सुखवृत्ते
आकारः स बिंदुरितिरेचः तेन ओं सोहमिति विपरी
तः तेन ओं सोहमिति मंत्रः एतत्करणाशक्तानाम् एत
न्मात्रेणैव भूतशुद्धिः स्यादिति ततः प्राणमं कुर्या
त् मूलमंत्रेण वा तया वा कुर्यात् यथा मूलमंत्रं षोडश
वारं जपन् वामनासापुटेन देहमापूर्य पुनः नासापु
टौ धृत्वा तदेव चतुःषष्टिवारं जपन् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

क्रम्भकं कृत्वैन पुनस्तदेवद्वात्रिंशद्वारं जपन् दक्षनासा
पुटेनवायुंरेचयेत् इत्येकः प्राणायामः अथांतर्मातृ
कान्यासः अष्टपत्रांबुजे कंठे स्वरान् षोडशविन्यसेत्
द्वादशाब्जे हृत्पद्मे कादीन् द्वादशविन्यसेत् दशपत्रां
बुजे नाभौ डकारादीन्न्यसेद्दश षट् पत्रे लिंगमध्यस्थे
बकारादीन्न्यसेत्षट् आधारे चतुरो वर्णान् वादी
न्न्यसेत्तद्दले हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेच्छि
वे इत्यंतर्मातृकान्यस्य सर्वांगन्यासमाचरेत् अथ मातृ
कान्यासः मूर्धा च मुखवृत्तं च नेत्रके द्वे पार्वति नासा च
द्वे ओष्ठदंते च मूर्धास्ये च प्रविन्यसेत् पाणिपादयुगस्यात
संध्यग्रे च तथा शिवे पार्श्वे हृत्पृष्ठनाभि जठरे च यथा
क्रमान्न्यसेत् यादीन्सधातकान्प्राणजीवत्वस्थाणि
तान्न्यसेत् हृदये बाहुमूले च तथा परगले शिवे ककु
द्यां हृदयप्रांते पाणिपादयुगे तथा जठराननयोर्देवि
व्यापकं च क्रमान्न्यसेत् व्यापकमिति हृदयमारभ्य उत्त
मांगव्यापकमित्यर्थः हृदयप्रांते प्राणादिविशेषणं
मवाकुलाभाय एवं हृदयमारभ्य पाणिपादयुगेनत
इति न हृदयमेवार्थः यथा अंनमो ललाटे आंनमो मु
खवृत्ते इंनमो दक्षचक्षुषि ईंनमो वामचक्षुषि उंनमो द
क्षकर्णे ऊंनमो वामकर्णे ऋंनमो दक्षनासायां ॠंनमो

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा
२५८
259

वामनासायां लिंनमो दक्षगंडे लींनमो वामगंडे एंन
मो ओष्ठे ऐंनमो ऽधरे ओंनमो ऊर्ध्वदंते औंनमो ऽधोदंते अंन
मो मूर्ध्नि अः नमो मुखे कंनमो दक्षबाहुमूले खंनमः
कूर्परे गंनमो मणिबंधे घंनमो ऽंगुलिमूले ङंनमो ऽंगुल्य
ग्रे चंनमो वामबाहुमूले छंनमः कूर्परे जंनमो मणि
बंधे झंनमो ऽंगुलिमूले ञंनमो ऽंगुल्यग्रे टंनमो दक्षोरुमू
ले ठंनमो जानुनि डंनमो गुल्फे ढंनमो ऽंगुलिमूले णं
नमो ऽंगुल्यग्रे तंनमो वामोरुमूले थंनमो जानुनि दं न
मो गुल्फे धंनमो ऽंगुलिमूले नंनमो ऽंगुल्यग्रे पंनमो दक्ष
पार्श्वे फंनमो वामपार्श्वे बंनमः पृष्ठे भंनमो नाभौ मंन
मउदरे यंनमस्त्वगात्मनि हृदये रंनमो ऽसृगात्मनि दक्ष
बाहुमूले लंनमो मांसात्मनि ककुदि वंनमो मेदात्म
नि वामबाहुमूले शंनमो ऽस्थ्यात्मनि हृदयादिदक्षकरे
षंनमो मज्जात्मनि हृदयादिवामकरे संनमः शुक्रात्मनि
हृदयादिदक्षपादे हंनमः प्राणात्मने हृदयादिवामपा
दे लंनमो जीवात्मने हृदयाद्युदरे क्षंनमः परमात्मने
हृदयादिमुखे अथ श्रीकेशवादिन्यासः यथा वासुदेव
ऋषिः पंक्तिः छंदः ईशानो देवता न्यासकर्मणि विनि
योगः ॥ ॐ हृदयाय नमः इति आदिन्यस्य ध्यायेत्
ओं वन्धूककांचननिभं रुचिरात्तमालाम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पाशांकुशौचवरदंनिजबाहुदंडैः विभ्राणमिंदुशक
लाभरणंत्रिनेत्रमर्धांबिकेशमनिशंवपुराश्रयामः
इतिध्यात्वामातृकास्थानेषुन्यसेत् अंश्रीकण्ठायपू
र्णोदर्यैनमोललाटे आंअनंतायविरजायैनमोमुखे
इंसूक्ष्मायशाल्मल्यैनमः ईंत्रिमूर्तयेलोलाक्ष्यैनमः उंअ
मरेश्वरायवर्तुलाक्ष्यैनमः ऊंअर्घीश्वरायदीर्घघोणायै
नमः ऋंभारभूतायदीर्घमुख्यैनमः ॠंअतिथीशाय
गोमुख्यैनमः लृंस्थाणुकायदीर्घजिह्वायैनमः लॄं
हरायकुंडोदर्यैनमः एंझिण्टीशायऊर्ध्वकेश्यैनमः
ऐंभौतिकायविकृतमुख्यैनमः ओंसद्योजातज्वाला
मुख्यैनमः औंअनुग्रहायउल्कामुख्यैनमः अंअक्रू
रायश्रीमुख्यैनमः अः महासेनायविद्यामुख्यैनमः
कंक्रोधेशायमहाकाल्यैनमः खंचंडीशायसरस्वत्यैन॰
गंपंचांतकायगौर्यैनमः घंशिवोत्तमायत्रैलोक्यविद्या
यैनमः क्रंक्रोधेशायमहाकाल्यैनमः ङंएकरु
द्रायमंत्रशक्त्यैनमः चंकूर्मायआत्मशक्त्यैनमः छंएक
नेत्रायभूतमात्र्यैनमः जंचतुराननायनमः लंबोदर्यै
झंअजेशायद्राविण्यैनमः ञंसर्वेश्वरायनागर्यैनमः
टंसोमेश्वरायखेचर्यैनमः ठंलांगलिनेमंजर्यैनमः
डंदारुकायरूपिण्यैनमः ढंअर्धनारीश्वरायवीरिण्यै॰

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ २८॰ 260

नमः रां उमाकांताय काकोदर्यैनमः तं आषाढिने पूतनायैनमः थं दण्डिने छत्रकायैनमः दं अद्रीशाय योगिन्यैनमः धं मीनेशाय शंखिन्यैनमः नं मेषाय गर्जिन्यैनमः पं लोहिताय कालरात्र्यैनमः फं शिखीशाय कुब्जिन्यैनमः बं छगलंडेशाय कपर्दिन्यैनमः भं द्विरंडेशाय कपालिन्यैनमः मं महाकालेशाय जयायैनमः यं त्वगात्मने वालीशाय सुमुख्येश्वर्यैनमः रं असृगात्मने भुजंगेशाय रेवत्यैनमः लं मांसात्मने शिवेशाय व्यापिन्यैनमः तः क्रोधात्मने संवर्तकेशाय मायायैनमः

अथ मंत्रन्यासः नाभेराचरणांतं न्यसेद् गलादानाभि वा परे मूर्धादि गलपर्यंतं अस्तरं विन्यसेत् क्रमात् इति बाला मंत्रन्यासः एवं भैरवमंत्रपतेपि नाभेराचरणांन्य. सेद् वाग्भवं मंत्रवित्तमः हृदयान्नाभिपर्यंतं कामराजं च विन्यसेत् मूर्धादिहृदयांतं च शक्तिवीजं प्रविन्यसेत् यथा नाभेराचरणं यावत् ह्स्रैं नमः हृदयादिनाभिपर्यंते ह्स्कह्रीं नमः ब्रह्मरंध्रादि हृदयं यावत् ह्सौं नमः

अथ करन्यासः वामपाणितले चैकं दक्षपाणितले तथा उभयोः संपुटे विद्यात् त्रिवीजं विन्यसेत् प्रिये भैरवीमंत्रपाते आद्यं द्वितीयं करयोस्तालीयमुभयोर्न्यसेत् दक्षक्रमेण ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रैंनमोदक्षकरे ह्सकलरींनमोवामकरे स्त्रौंनमः
करतलपृष्ठयोः मूलाधारेहृदिन्यस्यभ्रूयोबीजत्रयंक्र
मात् शिरसिस्त्रैंनमः हृदिह्सकलरींनमः मूलाधारे
स्त्रौंनमः अथनवयोनिन्यासः दक्षकर्णेस्त्रैंनमः वा
मकर्णेह्सकलरींनमः चिबुकेस्त्रौंनमः गंडयोर्वदनेच
नेत्रयोः नासिकायां अंसयोःजठरेयो कूर्पयोःऊर्वो
जानुनोःलिंगे पादयोःगुह्ये पार्श्वयोःहृदि स्तनयोः
कंठेइतिनव मूलेरतिंहृदिप्रीतिंभ्रुवोर्मध्येमनोभवं
बालबीजैस्त्रिभिर्न्यसेत्स्थानेष्वेषुविशेषतः मूलाधारे
ऐंरत्यैनमः हृदिक्लींप्रीत्यैनमः भ्रूमध्येसौः मनोभवा
यनमः अमृतेशीचयोगेशीविश्वयोनिःक्रमादिमाः
विलोमबीजैर्विन्यस्यमूर्तिन्यासंसमाचरेत् विलोमबी
जैरितिसौः आदिबालाबीजैरित्यर्थः मूलाधारेसौः
अमृतेश्यैनमः हृदिक्लींयोगेश्यैनमः भ्रूमध्येऐंविश्व
योन्यैनमः ततोमूर्तिन्यासंकुर्यात् मस्तकेसह्रैरौंईशा
नासमोभवसहितायनमः मुखेसह्रवंतत्पुरुषायम
करध्वजसहितायनमः हृदिसह्रंस्यंअघोरायकुमार
कंदर्पसहितायनमः गुह्येसह्रिंवामदेवायमनोभव
सहितायनमः पादयोः सह्रूंसद्योजातायकामदे
वसहितायनमः ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिपुरान् प्रविन्यसेद्यथा ह्सैं मरुद्व्योमाः ग्निसंयुतः
सत्यादि पंचकस्वाप्योवीजमेषां समीरितं मरुतः सका
रः व्योम हकारः अग्निरेफः सत्यरिकारः तदादि पंचकं
पपेडइउकारस्वरूपं स्वस्ववीजेति सह्रौं सह्रैं सह्रूं
सह्रिं सह्रं ऊर्ध्वमुखे सह्रौं ईशानाय मनोभवसहि
तायनमः पूर्वमुखे सह्रैं तत्पुरुषाय मकरध्वजसहि
तायनमः दक्षिणमुखे सह्रूं अघोराय कुमारकंदर्प
सहितायनमः उत्तरमुखे सह्रिं वामदेवाय मन्मथ
सहितायनमः पश्चिममुखे सह्रं सद्योजाताय मक
रध्वजसहितायनमः अथ करन्यासः षड्दीर्घयुक्ते
नादीनबीजेनांगक्रियामता ह्सौं अंगुष्ठाभ्यां नमः
ह्सौं कनिष्ठिकाभ्यां नमः ह्सः करतलकरपृष्ठाभ्यां
नमः अथांगन्यासः ह्सां हृदयायनमः इत्यादि अ
स्त्रायफट् इत्यंते ऊर्ध्वाधस्तालत्रयं छोटिकाभिर्द
शादिशो बध्नीयात् अथ पंचबाणन्यासः पंचवा
णान् क्रमेणैषकं गुलिषु विन्यसेत् अंगुष्ठा
दिकनिष्ठांतं क्रमेण परमेश्वरि द्रां द्रीं क्लीं ब्लूं इति
प्रोक्तं च भ्रमाः सर्गवान् भवेत् तेनमः ॥
पंचबाणा इमे देवि नामानि शृणु पार्वति ॥
क्षोभनोद्रावणे देवितया ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तथाकर्षणसंज्ञाकः वश्योन्मादौक्रमेणैवकथितानि
वरानने कामास्तथैवविज्ञेयास्तेषांवीजानिसंशृणु प
ञ्चवीजंमध्यवाणंवाग्भवंपरमेश्वरि तुर्यवाणंतत
श्चैवस्त्रीवीजंतत्क्रमात्प्रिये पंचकामाइमेदेविनामा
निशृणुवल्लभे काममन्मथकंदर्पमकरध्वजसंज्ञकः
मीनकेतुर्महेशानिपंचमःसमुदीरितः चंद्रमाःसका
रः द्रांद्रींक्लींब्लूंसः इतिपंचवाणाः क्लींक्लींऐंब्लूंस्त्रींइति
पंचकामाः द्रांक्षोभनायनम इत्यादिक्रमेणांगुष्ठा
दिषुन्यसेत् क्लीं कामायनम इत्यादिक्रमेणांगुष्ठादि
षुन्यसेत् अनंतरंमूर्धादिषुन्यसेत् पंचवाणांस्ततोन्य
स्य मंत्रीत्रैलोक्यमोहनान् द्रांमायांद्राविणींमूर्ध्नि
द्रींमायांक्षोभिणींपदे क्लींवशीकरणंवक्ष्ये गुह्येब्लूंवी
जपूर्विकां आकर्षिणींहृदिपुनः सर्गांतोभृगुसंयुतः
संमोहिनीक्रमाद्देविवाणन्यासोयमीरितः न्यासोयं
था मूर्ध्नि द्रांद्राविण्यैनमःपादयोः द्रींक्षोभिण्यैनमः
मुखे क्लींवशीकरिण्यैनमः गुह्येब्लूंआकर्षिण्यैनमः हृ
दि सः संमोहिन्यैनमः सर्गांतोभृगुसंयुतइति भृगुःस
कारः सर्गोविसर्गः तेनसइतिभवति अथसुभगादि
न्यासः भालभ्रूमध्यवदनकंठिकाकंठहृत्सुच नाभ्युपि
ष्टानयोः पंचनाराभ्याः सुभगादिकाः न्यसेत्साध्यविना

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ देव्योमंत्रिगणसुभगाभगाः भगासर्पिण्यथ पराभ
२६२ गमालिन्यनंतरं अनंगानंगकुसुमाभूयः चानंगमे॰
262 खलाः अनंगमदनाःसर्वासदविभ्रमभेदवाः वाक
कामंस्तु पुनः स्त्रीसः ताराः पंचोदिता असौन्यासं कु
र्याद्भूषणाख्यंनमः साधकसत्तमः न्यासो यथा पें
क्लींस्तुंस्त्रीसःसुभगायैनमो ललाटे भ्रुमध्ये पेंक्लीं
स्तुंस्त्रीसः भगायैनमः मुखे ५ भगसर्पिण्यैनमः
कण्ठमध्ये ५ भगमालिन्यैनमः कण्ठे ५ अनंगा
यैनमः हृदि ५ अनंगकुसुमायैनमः नाभौ ५ अनं
गमेखलायैनमः स्वाधिष्ठाने लिंगे ५ अनंगमद
नायैनमः अथभूषणन्यासः न्यसेच्छिरसि भाल
भ्रुकर्णाक्षियुगलेनसि गंडयोरोष्ठयोर्दंतपंक्त्योरास्ये
न्यसेत्स्वरान् चिबुके च गले कंठे पार्श्वयोः स्तनयुग्म
के दोर्मूलयोः कूर्परयोः पाण्योस्तत्पृष्ठदेशयोः नाभौ
गुह्ये पुनश्चोर्वोर्जान्वोर्जंघयोस्तथा स्फिचोस्तत्तल
योः पश्चाच्चरणांगुष्ठयोस्तथा कादिवांताःन्यसेद्ध
र्णान् स्थानेष्वेषु समाहितः कांच्यां ग्रैवेयके पश्चा
त्ताटंके हृदि शृंखके कर्णकुंडलयोर्मूले वलमान् शा॰
लसानस्ततो अष्टाविमान् प्रविन्यसेद् विदेशिकसत्तमः
कांच्यादिषदं न तस्यानोपलक्षकं भ्रुकर्णादिपुंडे हि वर्णन्या सः।

© Dharmartha Trust J&K. Digitized by eGangotri

इतिन्यासोयथा शिरसिअंनमः ललाटे आंनमः भ्रूयुगे
इंनमः ईंनमः कर्णयुगे उंऊंनमः अक्षियुगे ऋंॠंनमः
नासायां ऌंनमः गंडयोः ॡंनमः ओष्ठयोः एंऐंनमः
दंतपंक्त्योः ओंऔंनमः मुखे अंअःनमः चिबुके कंनमः ग॰
ले खंनमः कंठे गंनमः पार्श्वयोः घंङंनमः स्तनयोः
चंछंनमः दोर्मूलयोः जंझंनमः कूर्परयोः ञंटंनमः पा
ण्योः ठंडंनमस्तनपृष्ठयोः ढंणंनमः नाभौ तंनमः गु
ह्ये थंनमः ऊर्वोः दंधंनमः जान्वोः नंपंनमः जंघयोः
फंबंनमः स्फिचोः ऊरुमूलयोः भंमंनमः अतलयोः
यंरंनमः चरणांगुष्ठयोः लंवंनमः कहृांशंनमः ग्री
वायां षंनमः कटके वलयस्थाने संनमः हृदि हंनमः
गुह्ये ळंनमः कर्णयोर्मौलौ क्षंनमः ज्ञानार्णवे एवं
न्यस्त्वा शरीरे सोऽसमाहितमनास्ततः परमानंदसंदेह
सानंदश्चिंतयेत्परां ततोहृत्पद्ममध्ये देवीं ध्यायेत् उद्य
द्भानुसहस्रकांतिमरुणक्षौमां शिरोमालिकां रक्ता॰
लिप्तपयोधरां जपवटीं विद्यामभीतिं वरं हस्ताब्जैर्दध
तीं त्रिनेत्रविलसद्वक्त्रारविंदश्रियं देवीं बद्धहिमांशुरत्न
मुकुटां वन्दे समंदस्मितां इतिध्यात्वामानसोपचारैरा
राध्य योनिमुद्रां बद्ध्वा हृदयमुखभ्रूमध्यललाटब्रह्मरं
ध्रेषु नमस्कुर्यात् तद्यथा योन्याख्याहृदिविख्याता॰

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा·

२६२

263

त्रैलोक्यक्षोभणाभवेत् त्रैलोक्यद्रावणंनाममुद्रएवस्या
परमेश्वरि भ्रूमध्यस्थामहेशानि त्रैलोक्याकर्षणीभ
वेत् ललाटस्थामहेशानि त्रैलोक्यवशकारिणी ब्र
ह्मरंध्रस्थितासैवसर्वाह्लादकरीपरा पंचमुद्रामयी
देवियोनिमुद्रांप्रदर्शयेत् इतिनमस्कृत्यार्घ्यपात्रंस्था
पयेत् यथास्ववामे ईकारगर्भत्रिकोणं विलिख्य
तदुपरिषट्कोणंचतुरस्रंकृत्वा तदुपरित्रिपदिका
मारोप्य मंवह्निमंडलायधूम्रार्चिरादिदशकलात्मने
नमः इतित्रिपदिकांसंपूज्य फडितिशंखंप्रक्षाल्य शु
द्धजलमापूर्य ऊंसोममंडलाय अमृतादिषोडशक
लात्मनेनमइतिजलंसंपूज्य तज्जलंषडंगेनाभ्यर्च्य
हसक्षमलवरयूं आनन्दभैरवायवषट् नमः हसक्षम
लवरयीं आनन्दभैरव्यैवौषट् इतिजलंसंपूज्यजलं
स्पृशन् मूलमंत्रमष्टधाजप्त्वागंधपुष्पाक्षतानित्रि
ष्पास्त्रेणसंरक्ष्यकवचेनावगुंठ्यधेनुमुद्रयामृतीकृ
त्ययोनिमुद्रांप्रदर्श्य तस्मिन् जले त्रिकोणंविलि
ख्यतन्मध्येचपंचरत्नानिप्रजयेत् गभौचयवलाः
पश्चादिंदुस्थाः क्रमतः शिवे वामकर्णसमायुक्तानाद
बिन्दुविभूषिताः बीजपंचकमेतत्पंचरत्नानिसुंदरि ग्लूं
गगनरत्नायन· स्लूं मर्त्यरत्नायन· ह्लूं स्वर्गरत्नायन ब्लूं
पातालरत्नायन·

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रूमर्त्यनागरत्नायनमः गमौचेति गकारमकारौ य
कारवकारलकारश्चेत्यर्थः इन्द्रोलकारः वामकर्णः
ऊंकारः इतिपंचरत्नः संपूज्य गैंगंगेचयमुनेचैवेत्यादि
ना सवित्समंडलात्तीर्थमावाह्य तद्धतिणेभ्योत्तणीणा
त्रेकिंचिज्जलंनिक्षिप्य तेनोदकेनात्मानंपूजोपकरणं
चाभ्युक्षयंत्रोपरिपीठमभ्यर्चयेत् कर्णिकायै मंडूकाय
नमः कालाग्निरुद्रायनमः गैंकच्छपायनमः गैंआ
धारशक्त्यैनमः गैंप्रकृत्यैनमः गैंकूर्मायनमः गैंअ
नंतायनमः गैंपृथिव्यैनमः गैंक्षीरसमुद्रायनमः
गैंरत्नद्वीपायनमः गैंकदम्बवनायनमः ऊंवर्णम
यकल्पवृक्षायनमः गैंमणिमंडपायनमः गैंरत्न
सिंहासनायनमः आग्नेयादिकोणेषु गैंधर्मायनमः
ऊंज्ञानायनमः गैंवैराग्यायनमः ऊंपश्वर्यायनमः
गैंपूर्वादिदिक्षु अधर्माय अज्ञानाय अवैराग्यायनमः
अनैश्वर्यायनमः पुनःकर्णिकायां उपर्युपरिक्रमेण
अंसूर्यमंडलायनमः ऊंसोममंडलायनमः मंवह्नि
मंडलायनमः संसत्वायनमः रंरजसेनमः तंतमसे
नमः अंअंआत्मनेनमः पंपरमात्मनेनमः क्रींज्ञाना
त्मनेनमः ततःकेसरेषुनवशक्तीःपूजयेत् इच्छायैन
ज्ञानायैनमः क्रियायैनमः कामिन्यैनमः कामदायि

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
२६७
264

स्यैनमः रत्यैनमः प्रियायैनमः नंदायैनमः मथैम
नोर्मन्यैनमः पेंपरायैनमः अपरायैनमः परापरायै
नमः प्राग्योत्यंतराले श्रीगुरुभ्योनमः परमगुरुभ्योन
मः परमेष्टिगुरुभ्योनमः स्त्रौः सदाशिवमहाप्रेतपद्मा
सनायनमः ततोदिनकरकिरणारुणकुसुमांजलौ
वहन्नासापुटेन स्वहृदयाद्देवीं समानीय पंचभिः प्रण
वैर्मूर्तिलस्यामावाह्य पूजयेत् तारोवाक्शक्तिकमला
हसखफ्रेंहसौःपुनः इत्यासनमंत्राद्येविशेषः ॐ क्लीं ऐं
श्रीं हसखफ्रेंसौः इतिमंत्रः मूलमुच्चार्य श्रीमहात्रिपु
रभैरवीसमस्तचैतन्यमूर्तिकल्पयामिनमः इतिमूर्ति
संकल्प्य पंचसंस्थापप्राणप्रतिष्ठांकुर्यात् यथा आं
क्रौं क्रौं हंसः श्रीत्रिपुरभैरव्याः प्राणाइहप्राणाः एवं
वीजं ५ श्रीत्रिपुरभैरव्याः सर्वेन्द्रियाणिवाङ् मनश्चक्षुः
श्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा
इतिप्राणान्प्रतिष्ठाप्य आवाहनादिमुद्राः प्रदर्श्यष
डंगंविन्यस्यपुनः ध्यात्वाषोडशोपचारैः पूजयेत् ॥
यथा आसनंस्वागतंचार्घ्यंपाद्यमाचमनीयकम् ॥
मधुपर्काचमनस्नानवसनाभरणानि
च सुगंधसुमनोधूपदीपनैवे
द्यवंदनम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रयोजयेदर्चनायामुपचारांस्तु षोडश यथा इदमा-
सनं श्रीत्रिपुरभैरव्यै नमः स्वागतमिति कुशलप्रश्नं इद
माचमनीयं इदं स्नानीयं एतानि पट्टवस्त्राणि इदं स
र्वाभरणं एष गंधः इदं पुष्पं एष धूपः श्रीत्रिपुरभैर
व्यै नमः ततो नैवेद्यं पुरतः समानीयास्त्राय फट् इति
जलेन प्रोक्ष्य हूं इति वामहस्ततर्जन्यावगुंठ्य वमिति धे
नुमुद्रयामृतीकृत्य तदुपरि मूलमष्टजप्त्वा इदं नैवेद्यं त्रि
पुरभैरव्यै नमः इत्युत्सृज्य जलं गृहीत्वा अमृतोपस्तर
णमसीति जलं गण्डूषं दत्वा प्राणाय स्वाहा अपानाय
स्वाहा समानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहा
इति पंच प्राणाहुतीः कृत्वा तस्याः स्वीकारं विभाव्यामृ
तापिधानमसि स्वाहा इति पुनरपोशानं दत्वा इदं पुन
राचमनीयं श्रीत्रिपुरभैरव्यै नम इति एतानि तांबूला
नि त्रिपुरभैरव्यै नमः श्रीत्रिपुरभैरव्यै नम इति पुष्पांज
लित्रयेण संपूज्य श्रीत्रिपुरभैरवीं तर्पयामीति देव्यामु
खे त्रिवारं सन्तर्प्य षडंगेन संपूजयेत् यथा ह्स्रां हृदया
य नमः ह्स्रीं शिरसे स्वाहा ह्स्रूं शिखायै वषट् ह्स्रैं
कवचाय हुं ह्स्रौं नेत्रत्रयाय वौषट् ह्स्रः अस्त्राय फ
ट् इति पूर्वादिदिक्षु संपूज्य श्रीत्रिपुरभैरव्यै नमः इ
ति नमस्कृत्यावरणानि पूजयेत् यथा मध्यत्रिकोणे

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

२६५

265

अग्रकोणे ऐंरत्यैनमः दक्षकोणे ऐंप्रीत्यैनमः वाम-
कोणे ऐंमनोभवायैनमः ततोष्टयोनिषुअष्टशक्तीः
पूजयेत् ऐंक्लींब्लूंस्त्रींसः सुभगायैनमः एवंबीजादि
भगायैनमः ५ भगसर्पिण्यैनमः ५ भगमालिन्यैनमः
अनंगकुसुमायैनमः ५ अनंगमेखलायैनमः ५ अनं
गमदनायैनमः ततः केसरेषु पूर्वादिक्रमेण ब्राह्म्या
दिशक्तीः पूजयेत् यथा ब्राह्म्यैनमः माहेश्वर्यैनमः
कौमार्यैनमः वैष्णव्यैनमः वाराह्यैनमः इन्द्राण्यैन-
चामुंडायैनमः महालक्ष्म्यैनमः पत्राग्रेषु असितांगा
यनमः रुरवेनमः चंडायनमः क्रोधायनमः उन्मत्ता
यनमः कपालिनेनमः भीषणायनमः संहारायन
मः तद्बाह्ये इन्द्रादीन्पूजयेत् यथा ब्राह्म्यैनमः मा
हेश्वर्यैनमः कौमार्यैनमः वैष्णव्यैनमः वाराह्यैनमः
इन्द्राण्यैनमः चामुण्डायैनमः महालक्ष्म्यैनमः पत्रा
ग्रेषु असितांगायनमः रुरवेनमः चंडायैनमः क्रो
धायनमः तद्बहिः तेषामस्त्राणि पूजयेत् ततः पु-
ष्पांजलित्रयेण देवीं संपूज्य प्राणायामं कृत्वा गुरुभ्यो
नम इति गुरुं नमस्कृत्य जपेत् जपं समाप्य पुनः प्रा
णायामं कृत्वा चोदकेन गुह्यातिगुह्यगोप्त्री त्वं इत्यादि
देव्या वामहस्ते तेजोमयं समर्प्य

५

ज्रूपंपरमेस्वर्यापरिगृहीतंविभाव्यमूलेनतांमूलंनि
वेद्यपुनःगंधादिभिः संपूज्ययोनिमुद्रांप्रदर्श्य श्रीत्रिपु
रभैरव्यैनमःइति नमस्कृत्यस्तुत्वा दंडप्रणामंकृत्वाऽप
विश्य अर्घोदकेन इतःपूर्वंप्राणबुद्धिदेहधर्माधिका
रतोजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनसावाचाकर्मणाप
द्भ्यामुदरेणशिश्नायत्कृतं यदुक्तं यत्स्मृतं तत्सर्वंब्रह्मा
र्पणंभवतुस्वाहा मामदीयंचसकलंत्रिपुरभैरव्यैसम
र्पये इत्यात्मानंसमर्प्यनमस्कृत्य इदंपुनराचमनीयं
श्रीत्रिपुरभैरव्यैनमः इतिमूलमुच्चरन्भगवति त्रिपुरभै
रवि पूजितासि तमस्वेति संहारमुद्रयास्वहृदिसमा
नीयप्राणायामंकृत्वात्मानंतद्रूपंविभाव्यनिर्माल्य
पुष्पंगृहीत्वा निर्माल्यवासिन्यैनमः इतिपेशान्यांदि
पेत् ततश्चरणोदकंपीत्वानैवेद्यंस्वीकृत्ययथासुखं
विहरेत् इतिश्रीत्रिपुरभैरवीपूजापद्धतिः पूजानंतरं
नित्यहोमंकुर्यात् यदिविधिच्छन्नतोदेविनित्यहोमेसमा
चरेत् मूलमंत्रेणदेवेशिजनेत्पंचाहुतीःक्रमात् प्रा॰
णापानौतथाव्यानमुदानश्चसमानकः एतत्स्वरूपं
जानीयादाहुतीनांचपंचकं षडाहुतीःषडंगेषुनित्य
होमेयमीरितः नित्यहोमविधिंकृत्वाबलिदानविधिं
चरेत् ईशानादिषुकोणेषुमराङ्लानांचतुष्टयं श्री

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा
२६६
266

चक्रमभितो देवि त्रिकोणं व्योमचालिखेत् व्योमव्या
पकं मंडलं वेत्यर्थः अथवेति समुच्चयार्थे बलिदान
स्यतत्र विधानात् विकल्प एव अशक्तो बटुकस्य सक
लबलिदानमिति कश्चित् पूर्वमंत्रैः समभ्यर्च्य बटु
कादिकमद्रिणे एह्येहि देवीपुत्रांते बटुकांते तु नाथ
व कपिलांत जटाभारभास्वरांते त्रिनेत्रं च ज्वालामु
खंतु सर्वांते विघ्ननाशाय नाशाय सर्वोपचारसहितं
बलिं गृह्णद्वितयपदं वह्निजायान्वितो मंत्रो बटुक
स्य समीरितः अनेन विधिना देवि बटुकस्य बलिं हरेत्
एह्येहि देवीपुत्र बटुकनाथ कपिलजटाभारभास्वर
त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय नाशय सर्वोप
चारसहितं बलिं गृह्ण २ स्वाहा इति मंत्रः ऊर्ध्वं वस्मा उ
तो वा दिवि गगनतले भूतले निष्कले वा पाताले का
नने वा सलिलपवनयोर्यत्र कुत्र स्थिता वा क्षेत्रे पीठोप
पीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा
नः शुभबलिविधिना पांतु देवेंद्रवंद्याः एतदंतो महेशा
नियां बीजं योगिनी नतः भ्यः स्वाहा सर्वमंत्रांते योगि
नीपद्मालिखेत् कवचं चास्त्रमालिख्य वह्निजायां पु
नः लिखेत् अनेन मनुना देवि योगिनी बलिमाहरे
त् देवेंद्रवन्द्यानंतरं यायोगिनीभ्यः स्वाहा ॥

© Dharmartha Trust J&K. Digitized by eGangotri

योगिनीहूं फट् स्वाहांतमंत्रः षट् दीर्घस्वरसंभिन्नंत
कारं रुद्रनवालिखेत् लकारो बिन्दुवाचावाहलिएणमूर्ति
संहितायांयोगिनीनांकथ्यते पुनः क्षेत्रपदं पालं धूप
दीपादिचालिखेत् सहितं पदमालिख्य गृह्ण गृह्ण
ततोलिखेत् वह्निजायान्वितो मंत्रः क्षेत्रपालस्यसं
त्तरि अनेन मनना देवि क्षेत्रपालबलिं हरेत् क्षांक्षींक्षूं
क्षैंक्षौंक्षः क्षेत्रपाल धूपदीपादिसहितं गृह्ण २ इति
स्वाहामंत्रः गांगींगूं त्रयमालिख्य ङे. तं गणपतिं वदे
त् वरवरदं ततेच सर्वजन ममालित् मेवशमानये
त्तका बलिं गृह्ण गृह्ण ह्यथापदं वह्निजायान्वितो मंत्रो गा
णपत्य बलिं हरेत् गांगींगूं गणपतये वरवरद सर्वज
नमेवशमानय बलिं गृह्ण स्वाहा इति मंत्रः वामांगुष्ठा
नामिकाभ्यां वटुकस्य बलिं हरेत् अंगुष्ठमध्यमानामापो
न्याकारेण योजयेत् वामपुष्टिं विधायादौ तर्जनीमव
लोकरु अनया मुद्रया देवि क्षेत्रपालबलिर्भवेत् तथा
मुष्टिस्य मध्यमस्थामंगुलं समवलोकरु गजदंतमहामु
द्रा गाणपत्य बलिर्भवेत् अनेन विधिना देवि पूजये
त्परमेश्वरी भुवनेश्वरीं वरां लक्षं जपेन्मंत्रं तद्दशांशे
डनेच्छिवे तर्पणांत ततः कुर्यात्सर्वसौभाग्यभाग्भवेत्
निबन्धेषु तत्सलक्षं जपेदित्यर्थः ॐ भैरवीमपाप

श्रा

२९०

207

त्रिदेशात् तत्वतत्त्वानि दशांतरंगत्वात् शाक्तितत्त्वानां
दशसंख्यात्वादिति वस्तुतः द्वादशतत्त्वानि तत्त्वार्थत
त्वावधीति भ पंचसारस्वरसात् न च विरोधः अस्य
गाभेदपरत्वात् कलौ संख्या चतुर्गुणा इत्यभिधानादि
त्यर्थः अस्यैभैरवी स्तुतिः ॐ ब्रह्मादयः स्तुतिशतैरपि
सूक्ष्मरूपां जानन्ति नैव जगदादिमनादिमूर्तिं तस्माद्
वयं कुचनतां तव कौङ्कुमाभां स्थूलां स्तुमः सकलवाङ्मय
मातृभूतां १ सद्यः समुद्यत् सहस्र दिवाकराभां वि
द्याक्षसूत्रवरदाभयचिह्नहस्तां नेत्रोत्पलैस्त्रिभिरलं
कृतवक्त्रपद्मां त्वां हारभाररुचिरां त्रिपुरे भजामः २
सिन्दूरपूररुचिरं कुचभारनम्रं जन्मान्तरेषु कृतपुण्य
फलैकलभ्यं अन्योन्यभेदकलहाकुलमानभेदैर्जा
नन्ति किं जडधियस्तव रूपमम्ब ३ स्थूलां वदन्ति मुन
यः श्रुतयो गृणन्ति सूक्ष्मां वदन्ति वचसामधिवासम
न्ये त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयम
पारकृपां तु राशिं ४ चन्द्रावतंसकलितां शरदिन्दुशु
भ्रां पंचाशदक्षरमयीं हृदि भावयन्ति त्वां पुस्तकं जपव
टीममृताढ्यकुम्भं व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्रां ५
शंभुस्त्वमद्रितनया कलितार्धभागो विष्णुस्त्वमम्ब क
मलापरिवृद्धदेहः पद्मोद्भवस्त्वमसि वागधि
...भवस्त्वमसिवागः पि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सभूमिस्त्वेषां क्रियाश्च जगति त्रिपुरे त्वमेव ६ अग्निर्न
वाग्भवभवांश्च तवः पदादीर्भावान्पदेषु विहितान्समुदा
रयन्ती कर्णादिभिश्च करणैः परदेवतां त्वां संविन्मयीं
हृदि कदापि न विस्मरामि ७ आकुंचि वाग्भवजित्यच
वैरिषट्कमालोकनिश्चलधियां निजनासिकाग्रे ध्या
यन्ति मूर्ध्नि कलितेन्दुकलावतंसं त्वद्रूपमस्य हृदि नस्तर
णार्कमित्रे ८ त्वं माप्यमन्मथविपार्वसुरथभागं सृष्टिं
करोषि जगतामिति वेदवादः सत्यं तदद्रिनन ये जगदे
कमातर्नो चेदशेषजगतः स्थितिरेव न स्यात् ९ पूजां वि
धाय कुसुमैः सुरपादपानां पीठे तवाबकनकाचलकं
दरेषु गायन्ति सिद्धवनिताः सह किन्नरीभिरास्वादि-
तासवरसारुणनेत्रपद्माः १० विद्युद्विलासवपुषः श्रि
यमावहन्तीं यान्तीं स्ववासभवनाच्छिवराजधानीं सौंद
र्यमार्गकमलानि विकासयन्तीं देवीं भजे तव परामृत
सिक्तगात्रीं ११ आनन्दजन्मभवनं भवनं श्रुतीनां चैत
न्यमात्रतनुमेव तवाश्रयामि ब्रह्मेशविष्णुभिरुपासि
तपादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथावत् १२ शा
न्त्यैर्भाविभुवनं सृजन्तीं तु रूपा यान्तहि भर्ति पुनरर्कत
नुः स्वशक्त्या ब्रह्मात्मिका हरति नस्सकलं युगान्ते तां शा
रदां मनसि जातु न विस्मरामि १३ नारायणीति नर-

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रा
२६८
268

कारणीवत्वारणीति गौरीति खेदशमनीति सरस्वती
ति ज्ञानप्रदेति नयनत्रयभूषतीति त्वाम द्रिराजतन
येनिवुधा वदंति ॥ ये स्तुवंतिजन्मानः श्लोकैर्द्वादश
भिः क्रमात् त्वामनप्राप्यवाक्सिद्धिं प्राप्नुयुस्ते परांश्रि
यं ॥ इतिभैरवीस्तोत्रं ॥ अथ काम्यानि होमैयः कुरुते
देव्या बिल्वपत्रेण मानवः यंयंकामयतीकामीसस
वंसमवाप्नुयात् ललाटस्य चैमेषस्य सरोमंमांसमे
ववाज्येनमिश्रं संयुक्तं पुंडरीकैः सपायसं पनसाम्र
युतं हुत्वा कृत्वा श्रीमनपायिनी द्रव्यधनधान्यं च पु
त्रलाभो भवेन्नृणां ललाटो मद्दिषः अष्टमीर्धंचतुर्द
श्यांनवमीदिनतथैवच राज्ञो संप्रजयेद्यस्मान्महाविभ
वविस्तरः पलाशकुसुमाकाशो प्रयुतलसीचविवर्जये
त् प्रजनात्सातकीभूयाल्लयग्रचापिश्रियंवरेन् तथा
निंवैष पत्रं सिद्धमन्त्रमंत्रीसा यैयदिष्टमात्मनः पत्रे
हुतेभवेद्दग्धे पोरमाया वसतिः भवेत् रक्तोत्पलेसि
मधमैरभोगैर्वाहयारिजैः पुष्पैः पयोत्रैः सहूतैः रो
मादि वश्यवशानयेत् हयारिः करवीरैः पयोत्रैः पायसं
वाक्सिद्धिलभते मंत्री पलाशकुसुमान्वितैः कुक
यासकुंभभोजे यद्दृष्टैः मधुयान्वितैः ललसंख्येन दद्यं
वाप्रत्यहं भोजयेद्द्विजान् वनितापुवतीरम्याः श्रीए
येदेवताधिया ।

© Dharmartha Trust J&K. Digitized by eGangotri

होमांतेयनथान्याधैस्तोषयेद्गुरुमात्मनः कर्पूरागुरु
संयुक्तैर्गुग्गुलैर्जुहुयात्सुधीः ज्ञानंदिव्यमवाप्नोति ते
नैवसमभवेत्कविः क्षीरार्थैर्वस्त्रताखंडैर्होमः सर्वापस्
मृजित् दूर्वाभिरायुषे होमः क्षीरार्थाभिर्दिनत्रयं
गिरिकर्णीभवैः पुष्पैः ब्राह्मणान्वशमानयेत् गिरि
कर्णीअपराजिताकल्हारैः पार्थिवान्पुष्पैस्तद्भवैः
कर्णिकारजैः मल्लिकार्थस्तुमैः क्षत्रा राजपुत्रान्वश
नयेत् कारंठकुसुमैर्वैश्यान्नृषलान्पाटलाद्भवैः
कोरंठः झिंटीति प्रसिद्धिः अनुलोमविलोमान्तःस्थि
तंसाध्याक्षरयान्वितं मंत्रमस्यार्थंजुहुयान्मंत्रीमधुरैः
लोडितैः सर्पिभिः मधुसैर्मिश्रैर्वशयेत्पार्थिवानृत्वगणा
न् अनेनैवविधानेनतत्पत्नीस्तत्सुतानपि एवंबिल्व
भवैःपुष्पैःमधुत्रयसंयुतैः नरनारीनरपतीः होमतो
वशमानयेत् मालतीवकुलोद्भूतैःपुष्पैश्चन्दनलोडि
तैः जुहुयात्कवितांमंत्रीलभतेवत्सरान्तेसमधुत्रयसंयु
क्तैः फलैर्बिल्वसमुद्भवैः जुहुयाद्दशायेल्लोकान् श्रिय
माप्नोतिपुष्कलां पाटलैः कुसुमैः कुन्दैरुत्पलैर्नागव
शपकैः नंद्यावर्तैर्विकसितैः कृतमालैर्जुहोतियः जा
यतेवत्सराद्वाक्श्रियाविजितपार्थिवः नन्द्यावर्ततरा
रः साज्यमंत्रंप्रजुहुयाद्वेदत्रसमस्तिमान कस्तूरीकुं

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
२६९
269

ङ्कुमोपेतं कर्पूरं ज्ञकयाहृशी कंदर्पादधिकं सद्यः सौंद
र्यमधिगच्छति लाजाइज्जङ्घान्नंश्रीदधिहीरमधुस्तुता
नू विजित्यलोकानखिलान्सजीवेच्छरदांशतं पादद्वयं
मलयजंपादंकुंकुमकेसरं पादंगोरचनांचैवश्रीणिपि
ष्ट्वाहिमांभसा विदध्यात्तिलकंभालेयात्वश्रपयेनवी
क्ष्यते यास्त्रशोन्त्यशपते येवींवश्यपाः स्वल्तस्पतेचिरात्
कर्पूरकपिचोराणिसमभागानिकल्पयेत् चतुर्भागा
जटामांसीमावतीरोचनामता कुंकुमंसप्तभागंस्या
त्रिभागंचन्दनंमतं अगुरुर्नवभागः स्याद्दितिभागः क्र
मेणच हिमाद्रिः कन्यकापिष्टमेतत्सर्वंसुसाधितं
श्रादायतिलकंभालेकुर्याद्भूमिपतीन्नरान् वनिता
मदगर्वाढ्यामदोन्मत्तान्मतंगजान् सिंहान्व्याघ्रान्म
हासर्पान्भूतवेतालरात्तसान् दर्शनादेववशयेत्ति
लकंधारयन्नरः इत्यागमकल्पलतायांभैरवीसपर्या
विधिरेकोनविंशतिपटलः ॥

वक्ष्यामिसिद्धिमस्त्रायाविद्यासर्वार्थसिद्धिदां यांज्ञा
त्वामुनयः सर्वेपरांसिद्धिमवाप्नुयुः फेत्कारीतंत्रसंदिष्टं
मंत्रोद्धारंप्रयत्नतः कथयामिसमासेनसाधकानांसुखा
वहं तद्यथा लक्ष्मीलज्जातथामायामायाज्ञाद्वादशिकाप्यथा
वज्रवैरोचनीयेमायायुग्मंततःपरं फट्कारेणसमा
युक्तंस्वाहाचतदनंतरं ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लक्ष्मीश्रीः लज्जा क्लीं मायाह्रीं मात्राद्वादशिकापि वज्र
वैरोचनीये स्वरूपं मायायुग्मं ह्रूं ह्रूं फट्कारः स्वरूपं स्वा
हास्वरूपं तेन श्रीं क्लीं ह्रूं एवं वज्रवैरोचनीये फट्स्वाहा
इतिषोडशाक्षरो मंत्रः लक्ष्मीबीजेन दाद्यं स्यान्नदा श्रीः
सर्वतोमुखी लज्जाबीजेन चाद्येन वश्यतां याति योषितः
मायाबीजेन चाद्येन महापातकनाशनं मात्राद्वादशि
काबीजमाद्यं स्यान्मुक्तिकारणं तथाच तंत्रांतरे वामाक्षि
वह्निसंयुक्तं बिन्दुनादविभूषितं शिवबीजं महेशानि
लज्जाबीजमुदाहृतं ईशानमुद्धृत्य च वामिबीजं सबि
न्दुकं नादविभूषितं च सवामकर्णोपरितः प्रकल्प्य मा
यां वदंतीह मनीषिणस्तामिति तंत्रैवोक्तेः मात्राद्वाद
शिकेति द्वादशस्वरवर्णः स्यान्नादबिन्दुविभूषिता इ
ति तत्रैवोक्तेः मंत्रांतरमाह अनादिबीजं मंत्रस्य कीर्त
येन्मंत्रवित्तमः वज्रवैरोचनीये स्यान्मायाबीजं ततः प
रं फट् स्वाहया समायुक्तं मंत्रमंत्रिमहोरगं सर्वसिद्धि
प्रदं पुण्यं भक्तिमुक्तिफलावहं अनादिबीजं ओंकारः व
ज्रवैरोचनीयेस्वरूपं मायाबीजं ह्रूं ह्रूं फट् स्वाहा स्व
रूपं तेन वज्रवैरोचनीये ह्रूं ह्रूं फट् स्वाहा इति त्रयोदशा
क्षरो मंत्रः तथाचोक्तं भैरवीतंत्रे प्रणवेन त्रयो देवा ब्रह्म
विष्णुमहेश्वराः वकारे वरुणः साक्षाज्जकारे चसुराधिप

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰ २०॰ 270

रेफेऽनाशनो देवो वकारे चसुराधिपः येकारे त्रिपुरा
देवी रेफे त्रिपुरसुन्दरी त्रैलोक्यविजयो देवी सदैवैका
रसंभवा चकारे चन्द्रमा देवो नकारेपि विनायकः ई
कारे कमला साक्षाद् एकारे च सरस्वती मायायुग्मे तथा
देवी महाल्या सह संगता फट्कारे प्रकृतिः साक्षात्स्वा॰
कारं ऊस्मायुधः हाकारे च रतिः साक्षाद् एवं मंत्रसमु
च्चयः इति मंत्रवासना इति मंत्रवर्णकथनेन द्विती
यमंत्रस्यैवाभिधानात् प्रथममंत्रे प्राणसंबन्धो नास्ति
मानाभावात् तत्त्वबोधादावपि एवमुद्धारात् यदि च
तंत्रे प्रणवेन समायुक्तो मंत्रः सर्वार्थसाधक इति पा
ठः तत्प्रणवयोगेन मंत्रांतरत्वमित्यर्थः इति प्रांचः
तंत्रांतरे शक्तिस्त्रितत्त्ववाग्बीजतार मंत्रान्समुद्धरेत्
वज्रवैरोचनेत्यंते भगवान्मारुतो भवेत् कूर्चमस्त्रं हि
ध्यांतो सोत्रि शक्तिर्मनुरीरितः शक्तिः क्रीं त्रितत्त्वं हूं वा
ग्बीजं ऐं तारः ॐ भगवान् एकारः मारुतो यकारः कू
र्चं हूं अस्त्रं फट् द्विठः स्वाहा तेन क्रीं हूं ऐं वज्रवैरोचनी
ये हूं फट् स्वाहा इति पंचदशाक्षरात्मिका शक्तिमंत्रः तथा भैर
वोप्युक्तिः श्रोत्रः छिन्नः सप्राह्यरानने देवता छिन्नमस्तक्या
ह्रीं जं मायायुग्मं भवेत् मायायुग्मं कूर्चबीजं हृदयं हूंहूं मंत्रांतर
माह तत्त्वबोधे शृणु देवि प्रवक्ष्यामि षोडशीं दक्षिणामपि
रसाक्रान्तेन पालजालावाग्भवं वज्रवैपरे ।

© Dharmartha Trust J&K. Digitized by eGangotri

रोचनीयपराहुंहुमस्त्रमंत्रोग्निवल्लभा रमाश्री कूर्च

बीजंहूं लज्जाह्रीं वाग्भवंऐं वज्रवैरोचनीयेस्वरूपं प

राहुंहुंक्रींक्रीं अस्त्रंफट् अग्निवल्लभास्वाहा तथाच

श्रीहूंह्रीं ऐं वज्रवैरोचनीयेक्रींक्रींफट्स्वाहा इतिषोड

शाक्षरोमंत्रः त्रिशाक्षिमंत्रोयथा तथाच मंत्रांतरमाह

वेधाद्यंवज्रवैरोचनीये सर्वपदंवदेत् वुद्धिजाकित

घानीये वज्रमुक्तंप्रकीर्तयेत् वर्णिनीयशिवंषष्ठत्व

वत्रुग्विंउचंद्रवत् हैघाफट् वह्निवनिताभालस्तेष

मनुर्मेहान् वेदाद्यंऐं वज्रवैरोचनीयेस्वरूपं वह्निव

नितास्वाहा तेन ऐंवज्रवैरोचनीयेसर्ववुद्धिजाकि

नीयेवज्रवर्णिनीयेहुंहुंफट्स्वाहा इतिसप्तविंशाक्ष

तरोमंत्रः अथपूजाविधिंवक्ष्येसर्वसौभाग्यदायिनी

ब्राह्मेमुहूर्तेउत्थायस्वशिरसि प्रातःशिरसीत्यादिना

गुरुंध्यात्वामानसोपचारैराराध्यगुरुभ्योनमइतिनम

स्कृत्यदेवींध्यायेत् ऊलकुण्डलिनींसुप्तभुजगाकारमेना

षट् चक्रभेदक्रमेणपरमशिवेनीत्वापेकंविभाव्यमन

साराध्य मूलादिब्रह्मरन्ध्रांतांविसतंतुतनीयसीं सा

ताटमस्तानन्दस्वरूपिणींतन्मभापटलव्याप्तशरीरंपरि

चिंतयेत् आत्मानंतद्रूपंविभाव्यवहिर्गच्छेत् ततःप्रातः

कृत्यंसमाप्यस्नानार्थंनद्यादौगत्वा यथोक्तविधिनास्ना

© Dharmartha Trust J&K. Digitized by eGangotri

श्री
२२
271

त्वा धातेवाससी परिधाप्याचम्य मंत्रं यथाशक्ति जप्त्वा
गृहं गच्छेत् गायत्री यथा ॐ वज्रवैरोचनीये विद्महे
छिन्नमस्तायै धीमहि तन्नो देवी प्रचोदयात् गृहं गत्वा
हस्तौ पादौ प्रक्षाल्य पूजास्थानं प्रविश्य रक्तकंबला
द्यासनमास्तीर्य ॐ आधारशक्तिकमलासनाय नम
इत्यासनं संपूज्य तदुपरि स्वस्तिकाद्यासनक्रमेण
प्रविश्य ततः स्ववर्णादिपीठे रक्तचन्दनकुंकुमादिना
यंत्रं लिखित्वा प्रथमे पीठे परिस्थापयेत् यथा चतु
र्द्वारं भूपुरावृत्तं अष्टदलं पद्मं विलिख्य तन्मध्ये भानुम
ण्डलं सत्वरजस्तमोरूपरेखात्रययुतं त्रिकोणं विलि
ख्य तत्रैव त्रिकोणं रेखास्तु त्रिद्वारयुक्तं योनिमंडलं
विलिख्य त्रिकोणमध्ये हूं हूं फट् कारं च लिखेत्
इति यंत्रं लिखित्वा यथोक्तपीठे संस्थाप्य वामे गुरुभ्यो
नमः दक्षिणे गणेशाय नमः पुरतः छिन्नमस्तायै नमः
इति नमस्कृत्य सुंदरीपूजोक्तप्रकारेण भूतशुद्धिं कुर्या
त् यथा स्वांकऊर्ध्वं न हस्तौ निधाय सोहमिति मंत्रेण
हृदयाज्जीवात्मानं कुलकुंडलिनीं च षट् चक्रभेदक्रमेण
सहस्रदलकमलकर्णिकांतर्गत परमात्मनि संयोज्य पृ
थिव्यादीनि तत्वानि प्रविलाप्य पुरुषाकारभाक् प्रना
दिभवसंचितं ब्रह्महत्याशिरस्कं चेत्यादि वामकुक्षौ विचिंत्य
इत्यनकेवामेन नासियमिति ।

© Dharmartha Trust J&K. Digitized by eGangotri

वायुवीजं षोडशवारं जपन् वामनासापुटेन वायुना
देहमापूर्य पुनर्यमिति चतुःषष्टिवारं जपन् कुम्भ
कं कुर्वन् देहसंशोषणं पुनर्हमिति द्वात्रिंशद्वारं जप
न् दक्षनासापुटेन वायुं रेचयेत् ततोरुणेन वायुं से
वह्नेनरमिति वह्निवीजेन षोडशवारजप्तेन दक्षना
सापुटेन वायुनादेहमापूर्य चतुःषष्टिवारजप्तेन कु
म्भकं कुर्वन् तद्भस्मीभूतं विचिंत्य रमिति द्वात्रिंश
द्वारं जपन् वामनासया भस्मनासह वायुं रेचयेत्
ततः ०मिति चंद्रवीजं पुंधं मकृत्यात्मकं वामनासा
पुटेन भ्रूकषात्मकं ललाटचन्द्रं षोडशवारं जपनये
त् ततो रमिति चतुःषष्टिवारं जपन् ललाटचंद्रा
दादित्तां नाम तत्त्वमयी वृष्टिं निपात्य तया देवोपासन
योग्यं सकलं वपुः कुर्वन् लमिति द्वात्रिंशद्वारं जप
न् दक्षनासापुटेन वायुं रेचयेत् उत्तरनासापुटो ष्ट
त्वा वायुमवष्टभ्य हंसः सोहं अवतर २ शिवपदा
जीवशिवं सुषुम्णापथेन प्रविश मूलशृंगाटमुल्ल
सोल्लसद्धंसः सोहं स्वाहा ततः पृथिव्यादीनि तत्त्वा
नि यथास्थाने स्थापयित्वा हृत्पद्मे देवीं समानीय हृ
दि हस्तं दत्वा आंह्रींक्रोंहंसः मम प्राणा इह प्राणाः
एवं पंचवीजानि ५ मम जीव इह स्थितः एवं ५

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

२७२

272

मम सर्वेंद्रियाणि वाङ्मनश्चक्षुश्श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति जीवं न्यसेत् ततः प्राणायामं कुर्यात् यथा इडावक्त्रे वामेन सिद्धमिति बीजं षोडशवारं जपन् वायुना देहमापूर्य पुनस्तमेव चतुःषष्टिवारं जपन् कुम्भकं कुर्वन् पुनस्तमेव द्वात्रिंशद्वारं जपन् दक्षनासापुटेन वायुं रेचयेत् एवं वारत्रयं कुर्यात् अथ ऋष्यादिन्यासः अथ मंत्रस्य भैरव ऋषिः सम्राट् छन्दः छिन्नमस्ता देवता ह्रूं ह्रूं बीजं स्वाहा शक्तिः अभीष्टार्थसिद्धौ विनियोगः शिरसि भैरव ऋषिः मुखे सम्राट् छन्दसे नमः हृदि छिन्नमस्तायै नमः कृतांजलिः समाभीष्टसिद्धौ विनियोगः ततो मातृकान्यासं कुर्यात् कनिष्ठादिक्रमेण करन्यासं कुर्यात् आं खड्गाय हृदयाय नमः कनिष्ठयोः ईं सुखड्गाय शिरसे स्वाहा अनामिकयोः ऊं वज्राय शिखायै वषट् मध्यमयोः ऐं पाशाय कवचाय स्वाहा तर्जन्योः औं अंकुशाय नेत्रत्रयाय वौषट् अंगुष्ठयोः अः सुरक्षाय अस्त्राय फट् करतलपृष्ठयोः ततोंगन्यासं कुर्यात् यथा आं खड्गाय हृदयाय स्वाहा हृदये ईं सुखड्गाय शिरसे स्वाहा ऊं वज्राय शिखायै वषट् ऐं पाशाय कवचाय स्वाहा

© Dharmartha Trust J&K. Digitized by eGangotri

स्कन्धाद्गुरुपर्यंतं ऐंश्रंक्रंश्मायनेत्रत्रयाय वौषट् नेत्र
त्रये श्रः सुरताय श्रस्ताय फट् इत्यूर्ध्वोर्ध्वतालत्रयं द
त्वा छोटिकाभिर्दशदिग्बन्धनं कुर्यात् ततो भूतशुद्धिं
पुनः कृत्वा देवीं रूपं च चिंतयेत् बालसूर्यप्रभातुल्यां
प्रदीपकलिकोपमां षोडशवर्षदेशीयां ध्यायेन्मंड
लसंस्थितां पुनर्नरशरीरेपि ह्यात्मनो मंत्रविग्रहः
देवीध्यानं प्रवक्ष्यामि सर्वकामार्थसिद्धये इंगलापिं
गला चैव सुषुम्णा च विशेषतः त्रिनाडीसंहता दे
वी चित्रिणी त्रिविधा तथा श्वेतरक्तातकृष्णांगी ब्रह्मी
शा विष्णुमूर्त्तितः स्वनाभौ नीरजं ध्यायेच्छुद्धं विकसि
तं सितं तन्मध्ये कोणमध्ये च मंडलं चंडरोचिषः ज
पाकुसुमसंकाशं नववंधूकसंनिभं रजः सत्त्वतमो
रेखा योनिमंडलसंनिभं मध्ये चैव सदा देवी सूर्यको
टिसमप्रभां देवीं तां च करे वामे धारयंतीं स्वमस्तकं
प्रसारितमुखं भीमं लेलिहानोग्रजिह्वकं प्रसरद्दीधि
रीधारां निजकंठसमुद्भुतां विकीर्णकेशनिचयां
नानाभूषणभूषितां दिगंबरां महाघोरां प्रत्यालीढ
पदस्थितां रतिकामोपविष्टां तां केचिद्ध्यायंति योगि
नः विपरीतरतिस्थां च ध्यायेहृतिमनोहरां वर्णि
नीडाकिनीयुक्तां वामदक्षिणपार्श्वयोः" इति शेव

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

२२२

273

वर्णिनीं ध्यायेद्डाकिनीं वामके तथा वर्णिनीं लोहि
तां सौम्यां मुक्तकेशीं दिगंबरां कपालकर्तृकाहस्तां
वामदक्षिणयोगतः देवीं गलोच्छलद्रक्तधाराया
नेचरूर्वतीं अस्थिमालाधरां देवीं नागयज्ञोपवी
तिनीं डाकिनीं वामपार्श्वे तु कल्पांतज्वलनोपमां
विद्युच्छटाभनयनां दंतपंक्तिबलाकिनीं दंष्ट्राक
रालवदनां पीनोत्तुंगपयोधरां महादेवीं महाघो
रां मुक्तकेशीं दिगम्बरां लेलिहानमहाजिह्वां मुंड
मालाविभूषितां करस्थेनकपालेन भीषणेनाति
भीषणां आभ्यां निषेवितां ध्यायेद्देवीं साधकसत्तमः
अपरे च प्रवक्ष्यामि शृणु देवि यथाक्रमं स्वनाभौ
नीरजे शुभ्रे भानुमंडलमंडिते योनिचक्रसमायुक्ते
गुणत्रयसमन्विते तत्रमध्ये महादेवीं ध्यायेन्नाम
पदेवतां प्रदीपकलिकाराम तनिभीमां व्यवस्थितां
करकच्छपिकां बद्धां बद्धपद्मासनस्थितां योनिमु
द्रासमायुक्तां हृदयस्थितलोचनां इतीदं निष्कलं ध्या
नं तथा चातिकलास्थितं इति ध्यात्वा मानसोपचारैरा
राध्य नमस्कारांश्च पात्रं स्थापयेत् तथा त्रिकोण
मंडलं कृत्वा तदुपरि त्रिपदिकामारोप्य मं वह्निमंडला
य दशकलात्मने नमः इति त्रिपदिकां संपूज्य अस्त्राय
फट् इत्यर्घ्यपात्रं प्रक्षाल्य तदुपरि संस्थाप्य,

© Dharmartha Trust J&K. Digitized by eGangotri

अं सूर्यमंडलाय द्वादशकलात्मने नम इति पात्रं संस्थाप्य
मूलमंत्रेण पत्रं शुद्धजलमापूर्य उं सोममंडलाय षोड
शकलात्मने नम इति जलं संस्थाप्य मूलमंत्रमष्टधा जप्त्वा
स्त्रेण संरक्ष्य कवचेनावगुंठ्य धेनुमुद्रयामृतीकृत्य तत्र
गन्धपुष्पाक्षतान्निक्षिप्य तेनोदकेनात्मानं पूजोपक
रणं चाभ्युक्षयेत् ततो यंत्रोपरि पीठान्पूजयेत् यथा
आधारशक्त्यै नमः कूर्माय नमः अनन्ताय नमः पृथि
व्यै नमः सुरासमुद्राय नमः रत्नद्वीपाय नमः कल्प
उद्यानाय नमः स्वर्णवेदिकायै नमः कल्पवृक्षेभ्यो न
रत्नमंडपाय नमः रत्नसिंहासनाय नमः आनन्दकंदा
य नमः संविन्नालाय नमः सर्वतत्त्वात्मकपद्माय नमः
प्रकृतिमयपत्रेभ्यो नमः विकारमयकेसरेभ्यो नमः
पंचाशद्बीजाढ्यकर्णिकायै नमः अं सूर्यमंडलाय द्वाद
शकलात्मने नमः उं सोममंडलाय षोडशकलात्मने
नमः मं वह्निमंडलाय नमः सं सत्त्वाय नमः रं रजसे न
मः तं तमसे नमः आं आत्मने नमः अं अंतरात्मने नमः
पं परमात्मने नमः ह्रीं ज्ञानात्मने नमः ॐ रत्यै नमः क्लीं
कामाय नमः मूलेन श्रीछिन्नमस्तादेव्यासनाय नमः
इति पूजयेत् ततो मूलाधारस्थदीपकलिकाकारतेजः
स्वरूपां कुंडलिनीं बिसतंतुतनीयसीं षट्चक्रभेदक्रमेण

श्री

२०८

274

परमशिवेनीता तामेव शिवयोगेनस्थूलतां प्रापिता ंदत्तनासापुटेन निःसार्य कुसुमांजलावानीयं यंत्रोपरिस्थापयित्वावाहयेदनेन ॐ सर्वसिद्धिप्रदे वर्णिनी ये सर्वसिद्धिप्रदे डाकिनी ये छिन्नमस्ते प्रचंडे हि मम सिद्धिंदेहि तिष्ठ तिष्ठ हूं हूं फट् स्वाहा इति पठेत् ततो यंत्रोपरिस्थापयित्वा यंत्रस्य प्राणप्रतिष्ठां कुर्यात् श्रीं क्लीं क्रों स्वाहा छिन्नमस्तायाः प्राणा इह प्राणाः एवं छिन्नमस्ताया जीव इह स्थितः एवं छिन्नमस्तायाः सर्वेंद्रियाणि वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां कृत्वावाहयेत् भगवति श्री छिन्नमस्ते इहागच्छ इह तिष्ठ सन्निहिता भव सन्निरुद्धा भव अत्राधिष्ठानं कुरु मम पूजां गृहाण इत्यावाहनस्थापनसन्निधापनसन्निरोधनामृतीकरणसकलीकरणावगुंठनमुद्राभिर्देवीमावाह्य देव्यंगे षडंगानि विन्यस्य पुष्पांजलिं दत्वा पुनर्देवीं ध्यात्वा षोडशोपचारैः पूजयेत् यथा पाद्यार्घ्याचमनेति ततो मूलमंत्रेण पाद्यादिकं दद्यात् यथा मूलमुच्चरन् इदं पाद्यं छिन्नमस्तायै कल्पयामि नमः एवार्घ्यं छिन्नमस्तायै नमः स्वाहेति केचित् एवं इदमाचमनीयं इदं स्नानीयं वस्त्रं आभरणानि गंधं पुष्पं धूपं दीपं च दत्वा नैवेद्यं प्रददः।

५

:

समानीयार्घ्यजलेनाभ्युक्ष्यास्त्रेण संरक्ष्य कवचेनावगुंठ
नमितिधेनुमुद्रयामृतीकृत्य तदुपरि मूलमंत्रमष्टधाज
प्त्वा इदं नैवेद्यं छिन्नमस्तायै कल्पयामि नमः इत्युत्सृज्य
मृतोपस्तरणमसि स्वाहेति जलगंडूषं दत्वा प्राणाय स्वाहा
स्वाहा अपानाय स्वाहा समानाय स्वाहा उदानाय स्वा
हा व्यानाय स्वाहा इति पंचप्राणाहुतीः कृत्वा तस्याः
स्वीकारं विभाव्यामृतापिधानमसि स्वाहेति पुनरपो
शानं दत्वा इदं आचमनीयं छिन्नमस्तायै कल्पयामि न
म इति आचमनीयं दत्वा एतानि ताम्बूलानि छिन्नमस्ता
यै कल्पयामि नमः मूलमुच्चरन् छिन्नमस्तायै इदं पु
ष्पं छिन्नमस्तायै वषट् नम इति पुष्पांजलित्रयेणाभ्य
र्च्य श्री छिन्नमस्तां तर्पयामि नमः स्वाहा इति देव्यामुखे
वारत्रयं संतर्प्य ततो देवी दक्षिणवामक्रमेण चतुष्ट
येच तद्दिक्षु षडंगेनाभ्यर्च्य आवरणान्यूजयेत् यथा
वा यव्यां गणेशाय नमः ऐशान्यां गुरुभ्यो नमः आग्ने
य्यां परमगुरुभ्यो नमः नैरृत्यां क्षेत्रपालाय नमः पूर्वे क
रालाय नमः दक्षिणे अतिकरालाय नमः पश्चिमे वि
करालाय नमः उत्तरे महाकरालाय नमः मध्ये ॐ आ
धारशक्त्यै नमः कूर्माय नमः ॐ अनन्ताय नमः ॐ पृथि
व्यै नमः ॐ आनन्दकन्दाय नमः ॐ नालाय नमः ॐ प

© Dharmartha Trust J&K. Digitized by eGangotri

आ
२७५
275

ग्नायनमः ॐकर्णिकायैनमः ॐआदित्यमंडलायन
मः ॐसोममंडलायनमः ॐवह्निमंडलायनमः ॐसत्व
त्वायनमः ॐरंरजसेनमः ॐतंतमसेनमः ॐवेंत्यैनमः
ॐकामायनमः इतिसंपूज्यपूर्वादिदेव्यावामक्रमेण
पत्रेषुपूजयेत् ॐह्रीं एकलिंगायैनमः ॐह्रीं योगिन्यै
ॐह्रीं डाकिन्यैनमः ॐह्रीं भैरव्यैन० ॐह्रीं महाभैरव्यै
ॐइन्द्राक्ष्यै ॐह्रीं असितांग्यैनमः ॐह्रीं संहारिण्यैन
ॐमध्येदेवीसिंहासनायनमः देवीदक्षिणे ॐह्रीं प्रकृ
त्यैवर्णिन्यैनमः वामे ॐह्रीं प्रकृत्यैडाकिन्यैन० इतिसं
पूज्यपुनरपिगंधादिभिर्देवीसंपूज्यपुष्पाञ्जलित्रयेण
भ्यर्च्य सेषादिबलिंदद्यात् बलिमंत्रोयथा ॐसर्वसि
द्धिप्रदेवर्णिनीये सर्वबुद्धिप्रदेडाकिनीयेछिन्नमस्ते
एह्येहि इमंबलिंगृह्ण २ ममसिद्धिंदेहि २ हूं हूं फट्
स्वाहा इतिबलिंदत्वाआत्मानंतद्रूपंविभाव्यगुरुंनम
स्कृत्य आदौदेवीगायत्रींजप्त्वामूलमंत्रमष्टोत्तरसहस्र०
संशतंवाजपेत् गायत्री यथा वैरोचनीयेविद्महेछि
न्नमस्तायैधीमहि तन्नोदेवीप्रचोदयात् इतिजप्त्वामू
लंजपेत् ततोजपंसमाप्यप्राणाया
मंकृत्वापुष्पंगृहीत्वा ॐगुह्यातिगु
ह्येत्यादिनादेव्यावामहस्ते

© Dharmartha Trust J&K. Digitized by eGangotri

तेजोरूपं जपं समर्प्य मूलमंत्रेण तां मूलेन निवेश्य स्तुत्वा दं
अप्रणामं कृत्वा पवित्रार्घोदकेन ततः पूर्वं प्राणबुद्धिदेहध
र्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा
हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्कृतं यदुक्तं यत्स्मृतं तत्
सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं च श्रीछिन्नमस्ता
यै समर्पये इत्यात्मानं सपरिच्छन्नं देव्यै समर्पये इदं पु
नराचमनीयं छिन्नमस्तायै कल्याणि नमः ततो भगव
ति छिन्नमस्ते पूजितासि त्वमस्वेस्मत्कां संहारमुद्रया स्वा
मंडलात्सुषुम्णामार्गाय वहन् नासापुटेन देवीं स्वहृदि
समानीय अनेन मंत्रेण प्रार्थयेत् तत्र मंत्रः उत्तरे शिखरे
जाते भूम्यां पर्वतवासिनि ब्रह्मयोनिसमुत्पन्ने गच्छ देवि
समांतरे इति देवीमंतर्नीत्वा हृत्पद्मे संस्थाप्यात्मानं तद्रू
पं विभाव्य निर्माल्यं शिरसि धृत्वा चरणामृतं पीत्वा यथा
सुखं विहरेत् इति छिन्नमस्तापूजापद्धतिः अथ स्तुतिः
नाभौ शुभ्रसरोजमध्यविलसद्बंधूकपुष्पारुणां भास्वद्भा
स्करमंडलं तदुदरे यद्योनिचक्रं महत् तन्मध्ये विपरीत
मैथुनपरां प्रद्युम्नतत्कामिनीपृष्ठस्थां तरुणार्ककोटिवि
लसत्तेजःस्वरूपां स्थितां १ वामे छिन्नशिरोधरां तदितरे
पाणौ महत्कर्तृकां प्रत्यालीढपदां दिगंतवसनामुन्मुक्त
केशावृतां छिन्नात्मीयशिरःसमुच्छलदसृग्धारां पिबंतीं

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा

२०६

276

परांभालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीं
कामादन्यवनाडीवज्रवहलगलद्रक्तधाराभिरुक्षैः पा
यंतीमस्थिभूषावरकमललसत्कार्तृकांशुभ्रवर्णामू
र्ध्वाकारकेशामपगतवसनां वर्णिनीमात्मशक्तिं
प्रत्यालीढोरुपादामरुणितनयनां योगमुद्रां ३ दिग्व
स्त्रां सत्स्वकोशं प्रलयघनघटाघोररूपां प्रचण्डां दंष्ट्राट्ट
हासवक्त्रोदरविवरवलल्लोलजिह्वाग्रभासे विद्युन्नेत्रा
लातिपुञ्जां हृदयतटलसद्भोगिभीमां स्वमूर्तिं सद्यश्छि
न्नात्मकंठप्रगलितरुधिरैः डाकिनीं वर्धयंतीं ४ ब्रह्मेन्द्रे
शाच्युताद्यैः शिरसि विनिहितानन्दपादारविन्दामात्म
ज्ञैर्योगिमुख्यैः प्रतिपदमनिशं चिंतितां चिन्त्यरूपां संसा
रे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्तां मिष्टां ता
मिष्टदात्रीं कलिकलुषहरां चेतसा चिंतयामि ५ उत्प
त्तिस्थितिसंहृतीर्घटयितुं धत्ते त्रिरूपां तनुं त्रैगुण्याज्जग
तो यदीयविकृतिर्ब्रह्माच्युतः शूलभृत् तामाद्यां प्रकृतिं
स्मरामि मनसा सिद्धार्थसंसिद्धये यस्याः स्मेरपदार
विन्दयुगले लाभं भजन्ते नराः ६ अलिपिशितपुरंध्री
भोगपूजापरोहं वहृविधजलकर्मारंभसंभावितोहं
मप्रपञ्चजनविमुक्तोहं भैरवीसं
स्थितोहं ।

© Dharmartha Trust J&K. Digitized by eGangotri

गुरुश्च वरुणा परोहं भैरवोहं शिवोहं ७ इदं स्तवं महापुण्यं
ब्रह्मभाषितं पुरा यः पठेत्प्रातरुत्थाय देव्याः सन्निहितो
पि वा तस्य सिद्धिः भवेद्देवी वांछितार्थप्रदायिनी यन्त्रे था
त्वं मूर्ते जायांद्धृदयेहस्तिनमेवच वक्त्रं परां महाविद्यां मन्त्रो
सिद्धिः लभेद्ध्रुवं इति ब्रह्मयामले छिन्नमस्ता स्तोत्रम्
अथ संवत्स रेयावत् फलहारी यतव्रतः विमुनीमन्त्र
रूपरः शिवभक्तिपरायणः यथाशक्तिजपेन्नित्यं
ध्यात्वा देवीं यथोदितां फले पत्राव कुष्माण्डे वर्जनी
यो प्रयत्नतः अथ संवत्सरे तीते शौर्ये रामं तकतुल्यकः
मासमध्ये न भवेद्विष्णुर्विक्रमे रणादि वस्पतिः सर्वज्ञः शंभु
नातल्पस्तेजसाच दिवाकरः वर्षार्द्धं च तद्देहे देवत्
पंचत्वमपते यद्यत्रव्यभिचारः स्यात्तदा देवी तु तत्परं शी
घ्रं माव्पाति क्रुद्धा सर्वकामफलप्रदा अथ काम्यानि
भूक्तौ मुक्तौ च शांतौ च श्वेतपुष्पं विनिक्षिपेत् आकृष्टौ च
वशीकारे रक्तमेव विनिर्दिशेत् स्तम्भने मोहनी मन्त्री
पीतपुष्पं विनिक्षिपेत् उच्चाटने मारणे च कृष्णमेव वि
निक्षिपेत् काम्यकर्माणि सर्वत्र ध्यानं स्यात्पुष्पवर्णकं
पुष्पवर्णकमिति यद्वर्णपुष्पैः पूजा तद्वर्णां देवतां ध्या
येत् इत्यर्थः रात्रौ बलिः प्रदातव्यो मत्स्यमांसासवादिभिः
अथ वामभुपानाद्यैः मधुरैर्विभवविस्तरैः ताम्बूलवद

श्री
२७७
277

नाः श्रीमान् गुरुभक्तिपरायणाः जपेन्मंत्रं विशुद्धेन स
र्वैरेव हि पानकैः तांबूलेन विना चैव मत्स्यमांसैस्तथा
सर्वैः मांसभक्तिवलिर्देवि मंत्रसिद्धिं प्रयच्छति तस्मात्
सर्वप्रयत्नेन बलिर्देयः सदामिषैः आमिषेण विना तत्र
देवी तुष्टिं न यच्छति स्वैरेति चरमजातिपरं प्रथ्यवेति
मधुपानेति हेहः पानेत्तीरादिकर्मधारयपदेति केचि
त् अन्यथा बलिदानेन न व्ययप्रसंगात् बलिदानमंत्रः श
त्रापद्दतो लिखितः अनास्थाविघ्नमत्यंतमश्रद्धा जप
कर्मणि आलस्यं भीरुता शाक्तिः मंत्रहानिः सुनिश्चयः
नारदेषो न शौचं च नियमो न च सिद्धमंत्रतयानाचगुरु
सेवापरिश्रमः जाग्रत्स्वपन् उत्तिष्ठन् भुंजानो मैथु
नेरतः सदा कालं जपेन्मंत्रमिष्टसिद्धिप्रदायकं लि
खित्वा स्वकरे मंत्रमातृवं संस्पृशेन्नरः विमुंचति हि
ढाद्रोगान्दीर्घमायुश्च जायते शुक्लेन ध्यानमात्रेण मृ
तमुत्थापयेन्नरः महारोगशान्तेः दष्टं मृतमुत्थापये
द्ध्रुवं रक्तेन वश्यमायाति सर्वमाकृष्यते जगत् पीते
न स्तंभयेत्सर्वं लोकं वाजिगजादिकं कृष्णेन ध्यानयो
गेन विद्वेषमुच्चाटयेन्नरः मारयेदप्रयत्नेन कृष्णे ध्याना
त्संशयः तर्पणं च प्रकुर्वीत पयसा पायसेन च आ
ज्येन मधुना वापि स्वरयामंत्रसाधकः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मणैः तद्विधैर्विशेषैः शूद्रैरस्य यथाक्रमं तर्पण
स्य विधानेन दृष्टा सिद्धिः प्रजायते तथा क्षीरेण ब्राह्म
णैस्तर्प्पणात् घृतेन नृपवंशजैः मालिकैर्वैश्यवर्णैश्च
आसवैः शूद्रजातिभिः ततो जपं प्रकुर्वीत जायन्ते येन
सिद्धयः लक्षं जप्त्वास्य मन्त्रस्य लभेत्सिद्धिं यथेप्सितां स
र्वं संपद्यते देवि जपहोमात्त संशयः अथ होमविधिं व
क्ष्ये सर्वसिद्धिप्रदायिनीं विधाय मण्डलं पूर्वं पूर्वोक्तं च य
थाविधि षट्कोणमण्डले चैव वह्नेः स्थापनमाचरेत्
ततो होमं प्रकुर्वीत समिद्भिः कुसुमैर्नवैः श्रीफलानां
पलाशानां तथैवोडुम्बरस्य च सर्वसिद्धिप्रदो होमः
कर्त्तव्यो मधुसंयुतैः घृतेन सहितो वापि वाग्मीशत्वप्र
दायकः आज्ययुक्तेन भक्तेन बलिर्देयः सदामिषैः
षण्मासं दधिसंयुक्तो लक्ष्मीस्तस्य स्थिरा भवेत् छागमां
सं सरक्तं च घृतेन प्लावितं तथा यो जुहोत्यघृते देवि रा
जा तस्य वशो भवेत् श्वेतेन करवीरेण होमं सम्यक्करो
ति यः तत्क्षणाद्विधानेन सञ्जीवेत्कालदष्टकः क
र्णिकारसहस्राणि यो जुहोति घृतैः सह स प्राप्नोति
परां सिद्धिमीप्सितां सुरसुन्दरि वंधककुसुमं कृत्वा हू
तेनायुतसंख्यकं तस्याधीना भवेद्देवि सर्वसिद्धिफल
प्रदा तिलतण्डुलहोमं तु यो घृतेन समाचरेत् जगंते

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा
२०८
278

तस्य मित्राणि जायंते सुरसुन्दरि पायसेन च वै होमं
घृतेन सह सुन्दरि त्रिसंध्यं मासमात्रेण वाणीशत्वमवा
प्नुयात् अन्यच्च कथितो देवि क्रमे होमविधिर्मया अप
रं च प्रवक्ष्यामि कामनाया विशेषतः गोधामांसं च म
धुना वा सहस्रेण होमयेत् अपि देवा वशं यान्ति किं
पुनः तु इमा मानुषाः रुरुमांसेन साज्येन कृत्वा होमं व
रानने सर्वसिद्धिमवाप्नोति सुराणामपि दुर्लभं प
ललं माहिषं कृत्वा मधुना सह सुन्दरि संभक्षयित्वा शु
शत्रूणां बले ह्देवि संस्थिते चापकं घृतसंयुक्तं कृत्वा
नगवान्मज्जेरिपुसैन्यं महाघोरं स्तंभयत्यचिराच्छिवे
मद्योगोमायुमांसेन होमश्च सुरवान्विते वृनेहस्ते भ
वेत्तस्य सर्वसिद्धिप्रवर्तते गोमायं होमयेभ्यस्तु धन
देन समो भवेत् जम्बामञ्जीकृतो रात्रौ राष्ट्रं च विनिपा
तयेत् श्रीफलानां पलाशानां फलं चोडुम्बरस्य च
पोलतं होमयेदाशु धनदेन समो भवेत् महामांसे
नयः कश्चिद्धोमयेन्मधुसंयुतं प्रातमष्टोत्तरं देवि सि
सत्यं साधकोत्तमः सभुंक्ते मेदिनीं कृत्स्नां षण्मासेन
न संशयः राज्यं तस्य प्रयच्छन्ति भाकिन्यः प्रीतिसं
युताः कोकिलापललं तु योजुहोति चितानले सं
मारयति शत्रूणां बले ह्रेरण संस्थिते काकपतैः कृ
तो होमो दत्तरात्रौ समाहितः ।

© Dharmartha Trust J&K. Digitized by eGangotri

मालोच्चाकटुतैलेन सद्योच्चाटनमारणे शांतिकार्ये त
थाकुंडे चतुरस्रं समाचरेत् वशीकारे त्रिकोणं च मा
रणोच्चाटने तथा वर्तुलं मंडलाकारं कुर्यात्कुंडं विचक्ष
णः भुक्तौ मुक्तौ तथा देवि दीर्घकुंडं समाचरेत् अथ
बलिः ह्रीं सर्वयोगिनीभ्यो गृह्ण गृह्ण स्वाहा इति गृ
हबलिं दद्यात् ततः क्षेत्रपाल इमं बलिं गृह्ण गृह्ण
स्वाहा इति गृहकोणे दद्यात् ह्रीं ह्रीं देवीपुत्र वटुक
नाथ कपिलजटाजूटभारभास्वर त्रिनेत्र इमं बलिं गृ
ह्ण गृह्ण स्वाहा इति गृहमध्ये दद्यात् ह्रीं योगिनी
भ्यः सर्वक्षेत्रवासिनीभ्यः सर्वपीठोपपीठ सर्वसंदेहो
पसंदेह चत्वरोपचत्वरवासिनीभ्यः इमं बलिं गृह्ण
गृह्ण स्वाहा इति गृहमध्ये दद्यात् मांसभक्तबलिं
अपरं च प्रवक्ष्यामि विद्याद्रव्यप्रकाशकं अथ कृष्णच
तुर्दश्यां मंत्रकारे निशार्धके गृहाभ्यंतरगो भूत्वा वि
मुक्तो दशरात्रतः देवीरूपं स्मरन्भक्त्या ध्यायेद्वा साध
कोत्तमः पूर्वं मंडलमालिख्य षट्कोणं तत्र संलिखे
त् पूजयेद्रंग देवीश्च मंडले कथितास्तु प्रिये नानावि
धैः पुष्पैः श्वेतकृष्णकलोहितैः देवीरूपेण संचिंत्य पू
जयेत्साधकोत्तमः सहस्रमयुतं वापि जपेद्भक्तिः समा
हितः बलिं च तत्र मंत्रेण दद्याद्दष सिमज्जनात् नाना

गीस्तोषयन्मंत्रैर्वस्त्रालंकारभूषणैः ब्राह्मणान्भोज
येत्तत्र गुरवेदक्षिणां दत्वा अनेनविधिनालक्ष्मीविद्यां
सर्वामवाप्नुयात् एकरात्रेणालभतेविद्यालक्ष्मीनसंश
यः द्विरात्रेणयशोराशिं त्रिरात्रेणागुरुः स्वयं विप्रक
इति दशरात्रेयावत्तंसर्गाभून्यइत्यर्थः सर्वकल्पेसदा
कार्यंब्रह्मचारिव्रतंशिवे अस्मिन्पक्षेमहेशानिस्वे
च्छयाकर्मचारभेत् भैरवउवाच दिनसः प्रातरुत्थाय
शाध्यानलसमाश्रितः ध्यात्वाभ्यस्ताच्छिन्नमस्तांजा
पेदष्टोत्तरंशतं त्रिशातंवाजपेन्नित्यमष्टोत्तरसहस्र
कं षण्मासेनमहावाग्मीगद्यपद्यमयीभवेत् वत्सरा
द्देदशास्त्राणांनिश्चितंपारगोभवेत् त्रिवत्सराभवे
दूर्ध्वंवाग्मीस्वरइवापरः तस्यदर्शनमात्रेणवादिनो
निष्प्रभावतो पलायंतेतथाभूमौयथासिंहभयाद्ग
जाः दशांशेनांगमंत्राणांमूलमंत्रानुसारतः सहस्र
त्वातज्जपन्नित्यंकेचित्पक्षमिदंशिवे आदौसर्गविद्या
श्रीचपोषिकाचततोमता संहारकारिणीपश्चाच्छिन्नमू
र्तिः सैवकथ्यते इत्याः छिन्नमस्तायाः पूजाप्रकरणं
अथप्रकीर्णकं अथसारस्वतमंत्राः वरवरदांवादिनि
स्वाहा दशलक्षंजपेत् ॐनमोभगवतिवरवरदवाग्वादि
स्वाहा अष्टलक्षंजपेत् ऐंक्लींऐंक्लींसरस्वत्यैनमः ॥

२९

© Dharmartha Trust J&K. Digitized by eGangotri

द्वादशलक्षंजपेत् ऐंवाचस्पतेअमृतेप्लुवःप्लु एकादश
लक्षंजपेत् ऐंक्लींसौः त्रिलक्षंजपेत् अथलक्ष्मीमंत्राः श्रीं
द्वादशलक्षंजपेत् ऐंश्रींह्रींक्लींद्वादशलक्षंजपेत् नमः
कमलवासिन्यैस्वाहा दशलक्षंजपेत् ऐंक्लींसौः त्रिलक्षं
जपेत् अथलक्ष्मीमंत्राः श्रीं द्वादशलक्षंजपेत् ऐंश्रींह्रीं
द्वादशलक्षंजपेत् नमःकमलवासिन्यैस्वाहा दशलक्षं
जपेत् ॐऐंह्रींश्रींक्लींसौः जगत्प्रसूत्यैनमः द्वादशल
क्षंजपेत् ॐह्रींश्रींकमलेकमलालयेप्रसीदप्रसीदश्रीं
ह्रींश्रींमहालक्ष्म्यैनमः लक्षंजपेत् अथभुवनेश्वरीमंत्राः
ह्रींद्वात्रिंशल्लक्षंजपेत् ऐंह्रींश्रींद्वादशलक्षंजपेत् ऐंह्रीं
ऐं २४ लक्षंजपेत् आंह्रींक्रौं २४ अथत्वरितामंत्रः ॐह्रीं
हुंखेचछेक्षः स्त्रींहुंक्षेंह्रींफट् १ हुंखेक्षः त्रिकंठकीयं
सेस्त्रींक्षः वषणत्रिकंठीयं विनियुक्तंजपेत् ॐह्रींऐंनित्य
क्लिन्नेमदद्रवेस्वाहा ४ ऐंह्रींनित्यक्लिन्नेमदद्रवेस्वाहा वं
अमस्त्वारिणीयं १ श्रींह्रींक्लींत्रिपुटेयं १२ ॐश्रांह्रींक्रौं
एहिपरमेश्वरिस्वाहा अश्वारूढयं ५ ॐनमोभगवति
माहेश्वरिअन्नपूर्णेस्वाहाषोडशसहस्रंजपेत् ह्रींपद्माव
तिस्वाहा २ इतित्वरितायादशमन्त्रः अथदुर्गामंत्रः
ॐह्रींदुर्गायैनमः ८ महिषमर्दिनीस्वाहा ८ ॐदुर्गेदुर्गे
रक्षणिस्वाहा ५ ज्वलज्वलशूलिनिदुष्टग्रहहुंफट्स्वाहा

१५

© Dharmartha Trust J&K. Digitized by eGangotri

श्री०

१८०

280

नवदुर्गामंत्रः उग्निष्टप्रूरुषिकिंस्वापिपिबिभयंमेसमुपास्थि
ते यदि शाकमशाकं वा तन्मे भगवति शमय स्वाहा ५
शतदुर्गायाः पंचमंत्राः अथ भैरवीमंत्राः वाला ऐं क्लीं सौः
स्त्रीं हसकल ह्रीं ह्सौं २४ अथ मातंगीमंत्राः ऐं क्लीं श्रीं ॐ न
मो भगवति श्रीमातंगेश्वरि सर्वजनमनोहरि सर्वमुखरा
जि सर्वमुखरंजनि सर्वराजवशंकरी सर्वस्त्रीपुरुषवशं
करि सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि सर्वलोकम
मुकमेव वशमानय स्वाहा अष्टाशीत्युत्तरो मन्त्रः अयुतं
जपेत् अथ गणपतिमंत्राः गं ४ महागणपतिमंत्राः
ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमा
नय स्वाहा २ ॐ तिप्रप्रसादनाय नमः १ हेरंबमंत्रः ॐ गूं
नमः ३ अथोच्छिष्टगणपतिमंत्रः ॐ हस्तिपिशाचिलिखे
१९·· ॐ हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने
क्रों ग्रौं ह्रीं उच्छिष्टाय स्वाहा हस्तिमुखाय लंबोदराय उच्छि
ष्टमहात्मने आं क्रों ह्रीं श्रीं रंवें रंवें उच्छिष्टाय स्वाहा एकोन
त्रिंशदक्षरो मंत्रः १ अथ वक्रतुंडमंत्रः वक्रतुंडाय हुं वक्र
तुंडाय हुं वक्रतुंडाय क्लीं नमः १२·· अथ हरिद्रागणपति
मंत्राः ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्वजनहृदयं
स्तंभय स्तंभय स्वाहा अष्टाधिकसहस्रं
जपेत्सत्यं॰ दृम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथकार्तिकेयमंत्रः ॐवचद्भुवेनमः अथचन्द्रमंत्रः सों

सोमायनमः ९ अथविद्यामंत्रः अथविद्येविद्यामालिनि

चंद्रिणिचन्द्रमुखिस्वाहा अथसूर्यमंत्रः ह्रांणिसूर्यआ

दित्य ८ ह्रांह्रींसः १२ हंस १२ अथैहींमन्त्र ॐभूर्भुवःस्व

रग्निजातवेदइहावहसर्वकर्माणिसाधयस्वाहा १२ उत्ति

ष्ठपुरुषहरिपिंगललोहिताक्षदेहिमेददापयस्वाहा १

अथविष्णुमंत्रः ॐनमोनारायणाय १९ ॐनमोभगवते

वासुदेवावासुदेवाय ॐह्रींह्रींश्रींश्रींलक्ष्मीवासुदेवायन॰

अथदधिवामनमंत्रः ॐनमोविष्णवेसुरपतयेमहाबला

य ८ अथहयग्रीवमंत्रः उद्गिरप्रणवाद्गीथसर्ववागी

श्वरीश्वर सर्ववेदमयाचिंत्यसर्वंवोधयवोधय ५ अथ

रघुनाथमंत्रः रांरामायनमः श्रींसीतायैनमः ॐनमोभ

गवतेरघुनन्दनायरक्षोघ्नविषदायमधुरप्रसन्नवदनाया

मिततेजसेवलायरामायविष्णवेनमः ॐजानकीवल्ल

भायस्वाहा अथादिवराहमंत्रः ॐनमोभगवतेवराह

रूपायभूर्भुवःस्वःपतयेभूपतित्वंमेदेहिददापयस्वाहा

अथधरणीमंत्रः ॐनमोभगवत्यैधरणीधरणीधरेधरे

स्वाहा १ अथनरसिंहमंत्रः उग्रंवीरंमहाविष्णुंज्वलंतंस

र्वतोमुखं नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहम् १

क्ष्रौं ॐ क्ष्रौं नमोभगवतेनरसिंहायज्वालामालिनेदीप्तदं

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा॰
२८१
281

म्राय अग्निनेत्राय सर्वेश्वरोग्राय सर्वभूतविनाशाय सर्वभूतविनाशनाय सर्वज्वरविनाशनाय दह दह दह पच पच रक्ष रक्ष हुं फट् स्वाहा १ ॐ ह्रीं क्लीं फट् स्वाहा ९ सुदर्शनास्त्रमंत्रः ॐ सहस्रार हुं फट् अथ प्राकारमंत्रः ॐ त्रैलोक्यं रक्ष रक्ष हुं फट् स्वाहा १२ महासुदर्शनास्त्रमंत्रः ॐ नमो भगवते महासुदर्शनाय हुं फट् स्वाहा १ अथ पुरुषोत्तममंत्रः ॐ क्लीं श्रीं नमः पुरुषोत्तम अप्रकृतिरूपलक्ष्मीनिवास सकलजगत्क्षोभन सर्वस्त्रीहृदयविदारण त्रिभुवनमदोन्मादकर सुरासुरमनुजसुन्दरीजनवल्लभ मनोसिताप यताप दीपय दीपय शोषय शोषय मारय मारय स्तम्भय स्तम्भय मोहय मोहय द्रावय द्रावय आकर्षय २ समस्तपरमसुभग सर्वसौभाग्यकर सर्वकामप्रदामुकं हन २ चक्रेण गदया खड्गेन सर्ववाणैः भिन्द २ पाशेन कट्ट २ अंकुशेन ताडय २ तुरु तुरु किं तिष्ठसि तावद्यावत्समीहितं मे सिद्धं भवति हुं फट् नमः द्विपाताक्षरो मंत्रः ८ अथ गोपालस्य क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा अयुतद्वितयं जपेत् क्लीं कृष्णाय स्वाहा गोपीजनवल्लभाय स्वाहा १ ॐ नमः कृष्णाय देवकीपुत्राय हुं फट् स्वाहा १॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीं क्लीं नमो भगवते नन्दपुत्राय बालवपुषे श्यामला
यगोपीजनवल्लभाय स्वाहा १ क्लीं कृष्णगोविंदाय १ क्लीं
गोपालस्य मालामंत्रः नमः कामदेवाय सर्वजनप्रिया
य सर्वजनसंमोहनाय ज्वल २ प्रज्वल २ सर्वजनस्य हृद
यं मम वशं कुरु कुरु स्वाहा अथ महेशमंत्रः ॐ नमः
शिवाय २४ ह्रीं ॐ नमः शिवाय ह्रीं १८ ह्रौं ५ ॐ ह्रीं ह्रौं
नमः शिवाय ८ अथ मृत्युंजयमंत्रः ॐ जुंसः २ ॐ ह्रीं
दक्षिणामूर्तये तत्पवटमूलनिवासिने ध्यानैकनिर
ताय नमो रुद्राय शम्भवे प्रोह्रीं अथुतद्वयसंपुटं
गुणालंतं जपेन्मंत्रं ॐ नमो भगवते दक्षिणामूर्तये म
ह्यं मेधां प्रयच्छ स्वाहा १ अथ चिंतामणिमंत्रः क्ष्रौं
रतमलवैं ॐ अर्धनारीश्वरोयं मंत्रः १ अथ मालामंत्रः
ॐ नमः पशुपतये ॐ नमो भूताधिपतये ॐ नमो रुद्राय
ललखट्वांगवाराणविहरविहरसरसरहुत्वन्तत्वश्मशान
वासिभस्मार्चितशरीरायमवंठाकपालादिधरायव्या
घ्रचर्मपरीधानाय शशांककृतशेखराय कृष्णसर्प
यज्ञोपवीतिने चलाचलाचलचलअनिवर्तकपालिने हन हन
नभूतान् त्रासय २ मंडलमध्ये कट्ट कट्ट रुद्रांकुशेन शम
य २ प्रवेशय २ आवेशय चंडासिधाराधिपतिरुद्र
ज्ञापयति स्वाहा अथ अघोरास्त्रमंत्रः ह्रीं स्फुर स्फुर प्रस्फु

© Dharmartha Trust J&K. Digitized by eGangotri

श्री
२८२
282

रक्ष स्फुर घोर घोर तन तनु हुं पच पच टच टच चट चट टक
टक कटु वम वम वन्ध वन्ध घातय घातय हूं फट् स्वाहा
अथ पाशुपतास्त्रमंत्रः ऐं श्रीं पशु हूं फट् ६ अथ
क्षेत्रपालमंत्रः ॐ क्षौं क्षेत्रपालाय नमः । आपदु
द्धारवटुकमंत्रः ह्रीं वटुकाय आपदुद्धारणाय कु
रु कुरु वटुकाय ह्रीं । इति शारदातिलकविद्याप्रकरणं
अथ क्रमदीपिकोक्तगोपालमंत्राः क्लीं ८ क्लीं कृष्णा
य गोविन्दाय गोपीजनवल्लभाय स्वाहा । गोपीज
नवल्लभाय स्वाहा । क्लीं ग्लौं क्लीं श्यामलांगाय नमः
क्लीं कृष्ण क्लीं । क्लीं कृष्णाय नमः । क्लीं गोकुलना
थाय नमः कृष्ण गोविन्दाय न० । बालवपुषे कृष्णा
य स्वाहा । क्लीं हृषीकेशाय नमः श्रीं ह्रीं क्लीं गोपी
जनवल्लभाय स्वाहा त्रयोदशाक्षरोयं । ऐं क्लीं
श्रीं ह्रीं गोपीजनवल्लभाय स्वाहा चतुर्दशाक्षरोयं
ऐं क्लीं श्रीं नमो भगवते नन्दपुत्राय श्यामलांगाय बा
लवपुषे कृष्णाय गोपीजनवल्लभाय स्वाहा । ॐ न
मो भगवते नन्दपुत्राय नन्दवपुषे श्रीगोपीजनवल्ल
भाय स्वाहा । गोकुलनाथाय नमः । ॐ श्रीं ह्रीं क्लीं कृ
ष्णाय गोविन्दाय श्रीगोपीजनवल्लभाय स्वाहा । क्लीं
कृष्ण । क्लीं कृष्णाय नमः क्लीं कृष्णाय क्लीं । गोपालाय
स्वाहा । क्लीं कृष्णाय स्वाहा । ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कृष्णाय गोविंदाय श्रीं क्लीं क्लीं कृष्णाय क्लीं । क्लीं कृष्णा
य गोविन्दाय । दधिभक्षणाय स्वाहा । समस्तज्ञानात्मने
नमः । श्रीमन्नन्दनन्दचरणौ सदाशरणमहं प्रपद्ये ।
समस्तन — न्तमिनवाललीलात्मने हूं फट् स्वाहा । गो
पालवेशधराय वासुदेवाय हूं फट् स्वाहा । क्लीं श्रीं क्लीं
कृष्णाय गोपीजनवल्लभाय गोविन्दाय स्वाहा । श्रीं क्लीं
क्लीं कृष्णाय गोविन्दाय स्वाहा । षोडशी श्रीं क्लीं क्लीं
गोपीजनवल्लभाय स्वाहा क्लीं क्लीं श्रीं । क्लीं श्रीं गोपी
जनवल्लभाय स्वाहा । ॐ नमो भगवते रुक्मिणीवल्लभा
य स्वाहा । क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय
स्वाहा क्लीं । क्लीं क्लीं गोपीजनवल्लभाय स्वाहा । ऐं
क्लीं कृष्णाय क्लीं गोविंदाय श्रीं गोपीजनवल्लभाय स्वा
हा सौः इति गोपालमंत्रप्रकरणं अथ रामार्चनचंद्रि
कोक्त रघुनाथमंत्राः रां ५ राम ५ ॐ राम ५ क्लीं राम ५
श्रीं राम ५ क्लीं राम ५ ऐं राम ५ रां राम ५ रामचन्द्र ५ रा
मभद्र ५ रामाय नमः ५ रां रामाय नमः ५ क्लीं रामाय नमः
५ क्लीं रामाय नमः ५ ऐं रामाय नमः ५ श्रीं रामाय नमः
५ रामाय नमः ५ इति समष्ट्यामंत्राः श्रीं रामाय नमः ५ श्रीं
रामाय नमः ५ एवं प्रकारेण पंचाशन्मंत्रा भवंति श्रीं
रामाय नमः श्रीं रामाय नमः अस्यादिक्रमेण समाहृ

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा
२८६
283

गाः पंचाशत्संख्याभवंति इति केचित् श्रीं क्रीं क्लीं रा·
मायनमः ५ श्रीं ऐं क्लीं रामायनमः इति केचित् श्री
रां रामायनमः ऐं रां रामायनमः क्लीं रां रामायन·
श्रीं यं रामायनमः इति केचित् ॐ रां रामायनमः
श्रीरामचंद्र श्री क्रीं रामचंद्र क्री क्लीं रामचंद्र क्ली ।
एवं प्रकारेण रामभद्रस्यापि श्रीं क्रीं क्लीं इति बीजत्र
यं प्रत्येकेन आद्यंतं दत्वा मंत्रमुद्धरेत् श्रीरामचंद्र श्री
स्वाहा क्लीं रामचंद्र क्लीं हुं फट् क्लीं रामचंद्र क्लीं नमः
ॐ रामचन्द्राय नमः ॐ रामभद्राय नमः रां रामचं
द्राय नमः रां ॐ रामभद्राय नमः ॐ रां रामभद्राय
नमः रां ॐ रामाय हुं फट् स्वाहा ॐ क्लीं नमो रामाय
क्लीं हुं जानकीवल्लभाय स्वाहा ॐ नमो भगवते राम
चंद्राय ॐ नमो भगवते रामभद्राय नमः जय श्री
रामचन्द्र रामभद्र जय श्रीरामचन्द्र जय रामचंद्र जय
इति वा ॐ नमो रामाय भगवते महापुरुषाय नम
रामभद्र महेष्वास रघुवीर नृपोत्तम दशास्यान्तक
मां रक्ष देहि दापय मे श्रियं ॐ नमो भगवते रघुनंद
नाय रक्षोघ्न विशदाय मधुरप्रसन्नवदनायामिततेज
से बलाय रामाय विष्णवे न· श्रीं सीतायै स्वाहा ... लक्ष्म
णा· ... रामाय न· ... इति ... मंत्र·

अथ हनुमंत्रः ॐ ह्रीं हनुमताय महावीरपराक्रमाय
नमः क्रों सर्वकार्याणि साधय २ हूं फट् स्वाहा ह्रीं ॐ
इदानीं षपामंत्रो कल्पामामंत्रा क्लीं १ क्रीं क्लीं क्रीं
हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं फट्
स्वाहा ॐ ह्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं
हूं ह्रीं ह्रीं क्रीं हूं ह्रीं ऐं हूं ॐ ऐं ह्रीं फट् स्वाहा क्रीं क्रीं हूं
हूं ह्रीं ह्रीं क्रीं दक्षिणे कालिके क्रीं स्वाहा हूं ह्रीं दक्षिणे
कालिके हूं ह्रीं स्वाहा कालीहृदये ॐ ह्रीं ह्रीं स्वाहा क्रीं
हूं ह्रीं दक्षिणे कालिके क्रीं हूं ह्रीं ॐ क्रीं क्रीं क्रुं फट् स्वाहा
कालिके हूं नमः स्वाहा ऐं ह्रीं श्रीं क्लीं कालिके क्लीं
श्रीं ह्रीं ऐं क्रीं कालिकायै नमः क्रीं क्रीं हूं ऐं हूं ॐ ऐं
ह्रीं फट् स्वाहा क्रीं क्रीं हूं हूं ह्रीं ह्रीं क्रीं दक्षिणे कालिके
ह्रीं स्वाहा क्रीं क्रीं दक्षिणे कालिके हूं ह्रीं स्वाहा क्रीं हूं ह्रीं
दक्षिणे कालिके क्रीं हूं ह्रीं ह्रीं स्वाहा हूं हूं दक्षिणे कालि
के हूं हूं स्वाहा क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं हूं हूं स्वाहा
क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं हूं हूं स्वाहा क्रीं क्रीं सर्व॰
द्वाविंशान्तरी वह्नौ ध्येयं इति षपामामंत्र प्रकरणं अ
थ नतत्रविद्या प्रकरणं एकाक्षरी श्रीं सार्थपंचाक्षरी
ॐ ह्रीं स्त्रीं हूं फट् षडक्षरी ॐ ह्रीं स्त्रीं हूं नमः एकज
टा ह्रीं स्त्रीं हूं फट् नीलसरस्वती ह्रीं स्त्रीं हूं बीजेका

© Dharmartha Trust J&K. Digitized by eGangotri

श्री०

२८७

284

तरी हूं वज्रतारा ऐं क्रीं स्त्रीं हूं फट् श्रीताराश्रीं क्रीं स्त्रीं
हूं ताराहृदये क्रीं क्रीं स्त्रीं हूं फट् वीज्जतारा ॐ हूं स्त्रीं
हूं फट् कामरूपिणी क्लीं क्रीं स्त्रीं हूं फट् महाषड
तरी ॐ क्रीं हूं हूं नमः अष्टातरी ऐं सौः ॐ ऐं क्लीं फट्
स्वाहा समातरी खें हूं ह्रौं ॐ ऐं श्रीं क्रीं ॐ क्रीं ह्रौं ॐ वम
स्तारायै सकलदुःस्तरं तारय तारय ॐ नमः ॐ स्वाहा
हंसः ॐ क्रीं स्त्रीं हूं फट् हंसः नवातरी ऐं क्रीं श्रीं सौः
सौः सौः वद वद वाग्वादिनि क्लीं क्लीं क्लीं ऐं ऐं कति
कति कलरी स्वाहा ॐ क्रीं स्त्रीं हूं क्रीं ई उग्रतारे ऐं क्रीं सौः
श्रीं क्रीं क्रीं इति नतत्र विद्याप्रकरणं अथ छिन्नमस्ता
मंत्राः श्रीं हूं क्रीं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा क्रीं
हूं ऐं ॐ वज्रवैरोचनीये हूं फट् स्वाहा इति छिन्नमस्ता
प्रकरणं अथ त्रिपुरासारसमुच्चये भैरवीमंत्राः तत्र
संपत्प्रदा ह्स्रैं हसकलरीं ह्स्रौं चैतन्यभैरवी ह्स्रैं सक
लह्रीं ह्स्रौं अघोरभैरवी ह्स्रैं क्रीं हसकलरीं ह्स्रौः रुद्र
भैरवी ह्स्रैं ह्स्रौः भुवनेशीभैरवी ह्स्रैं हसकलह्रीं ह्स्रौः
गगनेशीभैरवी ह्स्रैं सहकलह्रीं ह्स्रौं सकलसिद्धिदा
भैरवी सहैं सहकलरीं ह्स्रौं इति भैरवीप्रकरणं अथ
श्रीविद्याप्रकरणं अथ मेरुः लंह्रीं लसहईपरकर
कामेश्वरी कलह्रीं लोपामुद्रा हसकलह्रीं ।

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रसकह्लक्लींसकलक्लीं मनुपूजिता कह्रपईलक्लीं
ह्रकपईलक्लींसह्रकपईलक्लीं चन्द्राराधिता सह्रकप
ईलक्लींसह्रकह्रपईलक्लींह्रसकपईलक्लीं कुवेरोपासि
ता ह्रसकपईलक्लींह्रसकह्रपईलक्लींसह्रकपईलक्लीं
अगस्त्यपूजितांकपईलक्लींह्रसकह्रक्लींसह्रसकलक्लीं
नंदिपूजिता सपईलक्लींसह्रसकह्लक्लींसकलक्लीं
इन्द्राराधिता कपईलक्लींह्रसकह्लक्लींसकलक्लीं
सूर्यपूजिता ह्रसकलक्लींसह्रकलक्लींसकलक्लीं च
तुष्कूटाशांकरी ह्रसकलक्लींह्रसकह्लक्लींसकल
क्लींह्रसकलह्रसकह्लसकलक्लीं षट्कूटवैसवी
ह्रसकलक्लींह्रसकलं ह्लक्लींसकलक्लींसपईलक्लीं
सह्रकह्लक्लींसकलक्लीं दुर्वासाराधिता कपई
लह्रईंह्रसकह्लह्रईंसकलह्रईं क्लींश्रीं इतिवी
जद्वयंयदिविपर्ययेनादीयते तदात्रिकूटः सकलाः
पंचकूटभवंति चतुष्कूटाशांकरी षट्कूटभवति
वसुकूटवैसवी पंचकूटशांभवी ईंह्रींजद्वयस्या
दौप्रणवंदत्वा ॐक्लींश्रीं इतिवीजत्रयंयदि विपर्ययेनादीय
यदिदीयते तदात्रिकूटाः सकलाः षट्कूटाभ
वंति सप्तकूटाशांकरीनवकूटावैसवी इतिभेदत्रयं
विपरीतक्रमेणपूर्ववीजद्वयमादौदेयं प्रणवं क्लीं·

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

२८५

285

ऐंसौः इति बीजत्रयं देयं अनंतरं षट्कूटा देया ततः
दत्त पंच बीजानि उदितक्रमेण देयानि इति भेदश्च
तद्यथा ह्रीं श्रीं क्लीं गं ऐं ई इति बीजानां मध्ये यद्येकं
बीजं त्रिकूटादौ दीयते तदा त्रिकूटाः सकला षोडशा
भवंति वैसद्य्येकोनविंशार्णो इति आदौ पंच बीजा
नि देयानि अनंतरं नवकूटा वैसबी देया तत्पश्चात्
उदितक्रमेण पूर्ववं दत्त पंच बीजानि देयानि एकोन
विंशार्णा वैसबी यो दीसमादशान्तरीति आदौ पंच
बीजानि देयानि अनंतरं सप्तकूटा वैसबी देया तत्प
श्चादुदितक्रमेण पंचबीजानि देयानि अथ पंचमी
कएईलह्रीं हसकलह्रीं हकहलह्रीं कहयलह्रीं
हसलसह्रीं द्वितीया पंचमी कएईलह्रीं कहयल
ह्रीं हसलसह्रीं द्वितीया पंचमी कएईलह्रीं हस
कलह्रीं हकहलह्रीं कहयलह्रीं हसलसह्रीं एका
दशी श्रीविद्या ह्रीं वामाज्येष्ठारौद्रीशक्तित्रितया
त्मिका श्रीं ह्रीं क्लीं ऐं ह्रीं सौः ऐं ह्रीं श्रीं श्रां ह्रीं क्लीं श्रीं
ह्रीं क्लीं सौः पारिजातेश्वरी ओं ह्रीं ह्स्त्रैं ह्रीं सरस्वत्यै नमः
पंचबाणेश्वरी द्रां द्रीं क्लीं ब्लूं सः पंचकामेश्वरी अथवा
नीली ऐं ब्लीं ऐं नमो भगवति वार्तालि वार्तालि वाराहि
वाराहवराहि अंधे अंधिनि नमो रुंधे रुंधिनि नमो जंभे जंभि
नमो मोहे मोहिनि नमः स्तंभे स्तंभिनि नमः

२

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वेऽष्टप्रइष्टकसामंतानांसर्वेषांसर्वत्राकचिनवल्ल
मुखगतिजिव्हाखेभंजरुरुरुशीघ्रवधंकरुकरु पं
ष्ठौंठः ठः हूंफट्स्वाहा अथललिता ॐनमोभगवति
महात्रिपुरभैरविममवैपुरवलाञ्जरुरुरु अथभैरवा
नाह असितांगोरुरुश्चण्डः क्षेत्रश्चोन्मत्तभैरवः वटुको
भूतनाथसंहारश्चाष्टभैरवः एतेषांमंत्रः क्षेत्रपालस्य ॐ
क्षौंक्षेत्रपालायनमः संहारभैरवस्य ॐक्रांक्रींहूंक्रैंक्रौं
क्रः हनहन उन्मत्तभैरवस्य क्रांक्रींहूं घेघे स्वाहा भूतभै
रवस्य ॐक्रींभूतभैरवायस्वाहा रुरुभैरवस्य ॐक्रींभैर
वायरक्षकवचायरक्षवर्णायहूंफट् स्वाहा अथवटु
कानाह हेमकत्रिपुरान्तकवेतालवह्निजिह्वाकालान्त
करालकापकपादभीमरूपअचलहाटकेश्वराः ॥
इत्यागमकल्पलतायामेकविंशः ॥ पटलः

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ नमस्ते ॐ अथ स्तवकवचानि निरूप्यन्ते अथ भव
नेश्वरीस्तवः आनन्दमयी साक्षाच्छब्दब्रह्मस्वरूपि
णी ईडे सकलसम्पत्त्यै जगत्कारणमम्बिकां
आद्यामशेषजननीमरविन्दयोनेर्विष्णोः शिवस्य च
वपुः प्रतिपादयित्री सृष्टिस्थितिक्षयकरी जगतां त्र
याणां स्तुत्वा गिरं विमलयाप्यहमम्बिके त्वां १ पृथ्व्या
जलेन शिखिना मरुताम्बरेण होत्रेन्दुना दिनकरेण च
मूर्तिभाजः देवस्य मन्मथरिपोरपि शक्तिमत्ता हेतुस्त्व
मेव खलु पर्वतराजपुत्रि २ त्रिस्रोतसः सकललोक
समर्चिताया वैशिष्ट्यकारणमवैमि तदेवमातः त्वत्पा
दपङ्कजपरागपवित्रितासु शम्भोर्जटासु सततं प
रिवर्तनं यत् ३ आनन्दयेत्कुमुदिनीमधिपः कलानां
नान्यामिनः कमलिनीमथ नेतरां वा एकस्य मोदन
विधौ परमेकमीष्टे त्वं तु प्रपञ्चमभिनन्दयसि स्वदृष्ट्या ४
आद्याप्यशेषजगतां नवयौवनासि शैलाधिराजत
नयाप्यतिकोमलासि त्रय्याः प्रसूरपि तया न समी
क्षितासि ध्येयापि गोचरमसि न मनसो न याधिस्थितासि ५
आसाद्य जन्म मनुजेषु चिराद्दुरापं तत्रापि पाटवम
वाप्य निजेन्द्रियाणां नाभ्यर्चयन्ति जगतां जननि ये
त्वां निःश्रेणिकां समधिरुह्य पुनः पतन्ति ६ कश्च

© Dharmartha Trust J&K. Digitized by eGangotri

287

र्पूरहिमवारिविलोडितेनयेचंदनेनकुसुमैश्चसुजा
तगंधैः आराधयंतिहिभवानिसमुत्सुकास्त्वांतेखल्व
शेषभुवनाधिभुवःप्रथंते ७ आविश्यमध्यपदवींप्र
थमेसरोजेसुप्ताहिराजसदृशीविरचय्यविश्वं विद्यु
ल्लतावलयविभ्रममुद्वहंतीपद्मानिपंचविदलय्य
समश्नुवाना ८ तन्निर्गतामृतरसैरभिषिच्यगात्रं
मार्गेणतेनविलयंपुनरप्यवाप्ता येषांहृदिस्फुरसि
जातुनतेभवेयुर्मातर्महेश्वरकुटुंबिनिगर्भभाजः ९
आलंबिकुंडलभरामभिरामवक्त्रामापीवरस्तनतटीं
तनुवृत्तमध्यां चिंतास्तसव्यकलशांलिखिताक्ष
